त्वयोत्तनायेत्यन्वये ७ चिंतयन्निति महृदयशस्करमिदं कर्म कृतमिति चिंतयन् सत्यसंकल्पतया इत्यं-
मतिं संकल्पं चकार तदभिलाषकं चेदं वाक्यं शिष्यमब्रवीदिति संबंधः ८

श्री. रा. बा. टी. २२

पादेति श्लोकस्तत्रानुष्टुप्पादैर्बद्धः प्रत्यक्षरसमः छंदः पादस्तोकगुरुलघुवर्तवैषम्यरहितः तथा तंत्रीवीणा
लयस्तालसमृदंगवेणुहस्ताभिनयानां समकालं विरामस्ताभ्यां युक्तः तंत्र्या मार्दव्यवाद्यैः सह गातुं योग्य
इति यावत् एवंभूतः शोकार्तस्य मम प्रवृत्तः यो नो विस्मेन प्रवृत्तोऽपि मे मम श्लोकोऽयं यशोरूपो भवतु नान्यथा ॥

पादबद्धोक्षरसमस्तंत्रीलयसमन्वितः शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा १८ शिष्य-
स्तु तस्य ब्रुवतो मुनेर्वाक्यमनुत्तमं प्रतिजग्राह संहृष्टस्तस्य तुष्टोऽभवन्मुनिः १९ सोभिषेकं ततः कृ-
त्वा तीर्थे तस्मिन्यथाविधिः तमेव चिंतयन्नर्थमुपावर्तत वै मुनिः २० ।

पद्यशोकरूपो मा भूदित्यर्थः अभ-
वदिति पादबद्धत्वादिगुणकसंमतत्वार्थं संमतस्य श्लोकोऽयं यथास्मि पद्ये चेति निश्चितः १८ शिष्य इति एवं ब्रु-
वतस्तस्य उरवैर्वाक्यं यशोभवतीत्येवं रूपं संहृष्टः सन् तथैवेदं यशोरूपमेवेदमित्यनुमोदनेन प्रतिजग्रा-
ह अंगीचकार अयं यशोरूपोऽपि यशस्त्वानुमोदनेन गुरुस्तस्य तुष्टोऽभवदित्यर्थः १९ स इति अभिषेकमि-
ति मध्याह्नकृतवान् अनुष्ठानोपलक्षणं तमेवार्थं प्रवृत्तः पापाकारश्लोकोन्यत्रिरूपं उपावर्तत समवर्तत

२१

कृतवान्वङ्कृतः पृष्ठतः पृष्ठभागेन प्रसारितकरोपरि पूर्णं कलशमादाय गुरुं पश्चादाजगामेत्यन्व।
यः स इति मत्वेतोन्याः कथाश्चकार मनसा तथा पार्थिकश्लोकविषयं ध्यानमास्थितः यत्तु ध्यानमेवा।
नयागाय ग्रास्त्रतं वावकृद्वप्राधान्येन ध्यानमास्थित इत्यर्थं इति तत्र तदास्थितोन्याः कथाश्चकारेत्यस्या।

भरद्वाजस्ततः शिष्यो विनीतः कृतवान्गुरोः कलशं पूर्णमादाय पृष्ठतोनुजगाम ह २१
स प्रविश्याश्रमपदं शिष्येण सह धर्मवित् उपविष्टः कथाश्चान्याश्चकार ध्यानमास्थितः २२
आजगाम ततो ब्रह्मा लोककर्ता स्वयंप्रभुः चतुर्मुखो महातेजा द्रष्टुं तं मुनिपुंगवं २३ वा
ल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः प्रांजलिः प्रयतो भूत्वा तस्थौ परमविस्मितः २४

सेगतेरिन्यलं ध्यानपदार्थानभिस्नहृष्णाभिनिवेशेन २२ अथ तच्चिंतां निवर्तयितुं ब्रह्मागमनमाह आज
गामेति स्वयंप्रभुः अनन्यसुखविनीतकतया सर्वलोकसृष्ट्युपयोगिज्ञानैश्वर्यादिशक्तिमान् अतएव भूतादि
लोकनिर्माता तेषां पवाकोच्चारणवशादतिचिंताक्रांते २३ वाग्यतः प्रतिसंभ्रमवशात् यतवाक् प्रयतोतिन

२५

रा० १२

श्री. रा. बा. टी. २८

पूजयामासेति वेदनंस्त्वातिः प्रणम्येतिश्लोकयुग्मस्येः पुनमित्पाञ्चनवान्वायि ३५ पनं सुनिं ब्रह्माणनामयं
पृष्ट्वा मयः पीडानद्गहितेव्ययहीनमितियावत् तपइतिशेषः नत्स्हाव्रनेनतं स्वयमासनेउपविश्य अथ
वेशासनं संदिदेशाऽऽसनेउपविष्टमत्रमेनइत्यर्थः वाल्मीकयेचऋषयइतिपाठः पतेनब्राह्मणोक्ताः

पूजयामासतंदेवंपाद्यार्घ्यासनवंदनैः प्रणम्यविधिवच्चैनंपृष्ट्वाचैवनिरामयं २५ अथोपवि-
श्यभगवानासनेपरमार्चिते वाल्मीकयेचऋषयेसंदिदेशासनंततः २६ ब्रह्मणासमनुज्ञा
तःसोप्युपाविशदासने उपविष्टेतदातस्मिन्साक्षाल्लोकपितामहे २७ तद्गतेनैवमनसावाल्मी
किर्ध्यानमास्थितः पापात्मनाकृतंकष्टंवैरग्रहणबुद्धिना २८ ॥

पापात्मना कृतमनस्केन
वैरग्रहणं वैरकर्म्मसं
पादने बुद्धिर्यस्य तेन

लं स्वच्छेनत्र वंधु मनामयमित्युक्तेः
ब्रह्मणोपत्यर्थं प्रश्नः स्वार्तीचारविरुद्धः तं देवमित्यनेनैवसिद्धेपुनमित्यस्यवैयर्थ्यापत्तिरित्यतिप्रणा-
मं २९ लोकपितामहेउपविष्टेसतितदनुज्ञयास्वयमुपाविशदितिसंबंधः २७ तद्गतेनक्रौंचगतेनवैर-
ग्र हणतिसाचासोबुद्धिस्तद्वता कर्त्तरितृडवाद्दलकात् निषादेनेतिशेषः कष्टंकृतंक्रौंचवधरूपं

[illegible] २८

कष्टमेवाहयइतिहन्यात हतवानित्यर्थः क्रौंचसंप्रकारणात दृश्यमानकारणंविनाउपसमीपेब्रह्मणःस
मीपे २९ शोकपरायणः क्रौंचवधहतक्रौंचीदुःखदर्शनजेन स्वस्यभावतस्ययोहानिकदशायाश्चकरुणा।
दृष्टातोनिःसरणजेनचशोकेनव्याप्तः अतएवांतर्गतमनाश्रुतगतश्लोकार्थमवदतचिंत्यःश्लोकंजगाविति।
संबंधः तंतथाशोकग्रस्तंहसन् महर्षियावतीर्णांसरस्वतींनर्त्तवादिनीत्याहसंकुचेन ३१ तद्वचनमेवाह

यस्मात्दृष्टंवाहरेवंक्रौंचंहन्यात्दकारणात शोचन्नेवघनःक्रौंचीमुपश्लोकमिमंजगौ २९ पुनरं
तर्गतमनाभूत्वाशोकपरायणः तमेवार्थमतोब्रह्माप्रहसन्मुनिपुंगवं ३० श्लोकपवाम्लयंव।
होनात्रकार्याविचारणा मच्छंदादेवतेब्रह्मन्प्रवृत्तेयंसरस्वती ३१ ॥

श्लोकपवाम्लयमिति श्रयेन।

यावद्धःश्लोकोयशोत्रुपपदास्तश्लोकपादस्यपद्यपरतयायोजनेस्थितियाद्धस्यासंगत्यापत्तेःश्लोकत्वा
केरेवब्रह्मणश्रोविन्यात ममतथ्रयशोत्रुपस्यशोत्रुपताशीदीनमितिनासंगतिःश्लोकपवत्तेयातिपा
देपियशोत्रुपपवायंव यावद्दोत्रतवविचारः संदेहोमास्त मद्वचनात्तसंकल्पाद्वास्यतथाभावप्राप्तेवि।
त्याशयः ननुभवता वदाशिषातथावमस्याःपरंतथातस्वभावस्यजरषेमेमेहशीवागत्यंतमनुचितत्वपि

रामस्येति हे ऋषिसत्तम ...: कृत्स्नं यावत्त्वदुहि... तं रामस्य चरितं कुरु वर्णय ... तदेव विशदयन्नाह धर्मेत्यादिना धर्मात्मनः धर्मयोः पित्रा त्यापित ... आत्मा मनो यस्य इत्यनेन वाला
... सत्तम धीमतः ... सुग्रीव ... कृतो प्रकृति को हनुमान् ... अनेन किष्किंधा सुंदरकांडकथा संक्षिप्य सूचनम् ... श्रीरस्य रामु
... कांडकथा संक्षिप्य सूचनम् ... अनेन युद्धोत्तरकांडकथा संक्षिप्य सूचनम् ... कारेण नारदो ... श्रीरस्येति पाठे बुधियः रावणादीनां ... ब्रह्मादीनां चतुर्द्धः ईश्वरेति ... तीति धी
रस्य स्वेत्यर्थः अनेनापि सं
उद्धृतार्थसंग्रहः स्फुट एव २

श्री.
रा. बा.
टी.
२५

मद्धं दारिति मत्तं कल्यादिसर्थः विमोरवतारमन्तस्य रामस्य संकल्पोपि स्वसंकल्पवेनोक्तेः प्रकमर्ति
स्मयो देवा रुद्द विस्मापिता महाश्तिहरि वंशोक्तेः नवीट यासंकल्पो ब्रह्मणोपि किमर्थं इति चेन्न स्त्रीणां पं
यां परस्य दारवियोगादिजनकं कर्मस्वस्य दारवियोगादिकं जनयति तेनालं तेषामपि ब्रह्मणापत्तजन
नेनेमिति लोके बालानामाहात्म्यं स्व चयितु एवं रामादि सर्वेपि कामजय एवोत्तमोनन्तेन भोगचापल
मिति वस्तव्यवहारेणापित्वं तन्नायश्चित्तविधेयस्यकीर्तिवर्णनेन मन्नेय मोहद्य यंभगवद्विषयम

रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम धर्मात्मनो गुणवतो लोके रामस्य धीमतः ३२।

हो पापप्रायश्चित्तवान् कैमुतिकन्यायेनेतरजनानां सर्वपापप्रायश्चित्तं रामायणश्रवणादित्यर्थः
बोधयितुं वेति मद्वाणप्रतट यत्तरसारस्य बलेन मयायोजितमनो निरी[illegible]सत्तद्दयाविचारयेत ३८।
एवं परवशप्रहृतस्यापि शापस्य भवावद्विपूयनयेतर सकलमवाप्नुहि प्रायश्चित्तानि वर्मस्य यं प्रेम
सौशायस्य चरितं वर्णनरूपं प्रायश्चित्तमपदिशति रामस्य चरितमिति लोके रामस्यरमते ३१ तिरा
मः वाङ्मलकात्मकेन रचिन्तेन लोकाधिष्ठानलोकांतर्यामिणाभ्रमंपध्यः कुरु वर्णय स धर्मात्मनस्य ने
नरावणादिवधवत् क्रौंचवधोपि धर्मफलरूपबलोकव्यवहारेण लोकहितन्वाद्दत्त कनाचेतिस्त्रचिते

त्य

३२
२५

वृत्तमितिश्चस्यनारदोक्तविशेषपरत्वादमौनकाङ्क्षिः धियमीरयतीतिधीरः तेनबुद्धिप्रेरकस्येत्यर्थः तेनयथा
यथार्थम् तस्येत्युक्तं रामलक्ष्मणयोराक्षसानांसीतायाश्चयत्प्रकाशंतदीयानांप्रकाशेनवाविदितं यदिवाय
हस्यंतदीयानामपिरहः अविदितंतत्तवत्तमत्तरामविदितंतदपिसर्वंतेविदितंभविष्यति अनेनतत्करणयो
ग्यतादानं यच्चमानिषादेतिपद्यंलोकाद्यपिवाक्तत्त्रोतिः सविष्यति सापिनान्यथाभविष्यतितेनाप्युपिसत

वृत्तंकथयधीरस्ययथातेनारदाच्छ्रुतं रहस्यंचप्रकाशंचयद्वृत्तंतस्यधीमतः ३३ रामस्यसहसौमित्रे
राक्षसानांचसर्वशः वैदेह्याश्चैवयद्वृत्तंप्रकाशंयदिवारहः ३४ तच्चाप्यविदितंसर्वंविदितंतेभवि
ष्यति नतेवागनृताकाव्येकाचिदत्रभविष्यति ३५ कुरुरामकथांपुण्यांश्लोकबद्धांमनोरमां या
वत्स्थास्यंतिगिरयः सरितश्चमहीतले ३६ तावद्रामायणकथालोकेषुप्रचरिष्यति यावद्रामस्य
त्वंभावीतिध्रुति (चकथात्वत्कृताप्रचरिष्यति ३७ तावदूर्ध्वमधश्चत्वंमल्लोकेषुनिवत्स्यसि ॥ तं ३३ ३४ ३५
एवंरामकथांदत्वोपसंहरतिकुर्वितियावदित्याद्युत्तरान्वयि ३६ ३७ तावदिति यावत्त्वत्कृतकथाप्रचारस्ता
वदयमर्थंदयाहूर्ध्वमपिकर्मोपकारणानं अधोगमनयोग्योपित्वंऊर्ध्ववर्तमानेषुमल्लोकेषुनिवासंप्राप्स्यसि त
तोमयासहमोक्ष्यसइत्यर्थः लोकेष्विति नरवयवाभिप्रायंबहुवचनेऊर्ध्वमधश्चविद्यमानेषुमल्लोकेषुम

लोकेषुप्रसिमिल्लोकेषुनिवत्स्यसि ॥

31

पु॰
वा॰ टी॰
३९

सर्वत्राप्रतिहतगतिः संचरिष्यसि ततः परं मुक्तिं प्राप्स्यसीति तीर्थः तत्रमलोके ऽपि त्वस्य चरिताख्यायिका चिंत्य इ
तीति तत्रैवांतरधानेनास्यादृश्यतया सिद्धत्वेनोक्ता २८ तत इति विस्मयं प्राप्य यतस्य तिप्रीयमाणाः प्राप्यै
मित्यन्वयः ऋषयः पद्यं यद्बहुलक्षणाय्यनमोदितं प्राहुश्च वक्ष्यमाणमित्यर्थः २९ तदेवाह समेतिसाम्यं गुरुलघु
तरवेषम्यराहित्यं यः क्रौंचविषादगीतः सनुप्रतिपादितशोकोऽस्मिन्नेनतरं व्याहरणात् भूयः शोकाः वि
पुनः शोकमवश्लोकत्वं प्राप्त इति वयं मन्यामहे इति प्राहुरिति संबंधः उपदेशाचर्येतेनास्यश्लोकस्य कह॥

इत्युक्त्वा भगवान्ब्रह्मा तत्रैवांतरधीयत २८ ततः सशिष्यो भगवान्मुनिर्विस्मयमाययौ त॰
स्य शिष्यास्ततः सर्वे जगुः श्लोकमिमं पुनः २९ मुहुर्मुहुः प्रीयमाणाः प्राहुश्च भृशविस्मिताः स
माक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा सोऽनुव्याहरणाद्भूयः शोकः श्लोकत्वमागतः ४॰ ॥।

णरसमयत्वं ध्वनितं पुनश्च क्रौंचालंबनकः क्रौंचीविरावाद्युद्दीपितोऽनिदविषयक्रोधव्यभिचारिको मा॰
निषादेत्यादिवाक्यानुभावकः करुणो रस इति बोध्यं यतश्च पूर्वं श्लोके प्राक्तः इत्यस्य पदं तीव्रस्य करणं॰
पुनः पाठेनानंदवं तोमम्यनीति फलितार्थकथनं पूर्वं च श्लोकं भूयोऽनुव्याहरणात्तत्कर्मकृतः शिष्यैः पुनः
पाठात् लोके शोकः श्लोकत्वेन प्रतिबद्धोऽभवत् श्लोकत्वं प्राप्त इत्यर्थ इति तीर्थादिव्याख्यानेन दर्शितमिः॥

२९

नस्योति ईदृशोमीनिषादेतिवत्करुणरसप्रधानैरित्यर्थः अनेनान्येरसाश्चत्रगुणीभूताइतिध्वनितं ४। उदा
रेतिउदारस्ययद्वृत्तंचरितंउदारंवायच्चरितंतन्नरूपार्थबोधकैः पदैः मनोरमैः श्रुतिकटुत्वादिदोषरहितैः अस्य
यथाश्विनोनामस्यदाशरथेरामस्यनारदोपदिष्टस्यश्लोकपानैरितिशतग्रहोनंतवाची ४२ एवंकाव्यनिर्मा-
णमुक्त्वातत्रश्रोतॄनभिमुखीकरोति तदितिसमासः तत्पुरुषादिः संधिरेकादेशादिः योगाः प्रकृतिप्रत्यय-
योः एतैरुपगतायथाव्याकरणालंकारशास्त्रमर्यादंयस्मिन्काव्येनादृशकाव्यरघुवरचरितेनतद्गुणेनरूपंस

कार तस्यव्युत्पत्तिरियंजातामहर्षेर्भावितात्मनः कृत्स्नं रामायणंकाव्यमीदृशैःकरवाण्यहं ४। उदार
वृत्तार्थपदैर्मनोरमैस्तदास्यरामस्यचरितंकीर्तिमान् समाक्षरैःश्लोकशतैर्यशस्विनोयशस्करंकाव्य-
मुदारदर्शनः ४२ तदुपगतसमाससंधियोगंसममधुरोपनतार्थवाक्यबद्धं ॥ म

सः एतत्स्वरूपश्रुतिदोषरहितोमधुरः करुणरसयुक्तत्वेनमाधुर्यगुणप्रधानः उपनतः प्रसन्नतयार्थस्तद्बोध-
कवाक्यैर्निबद्धं उपनततेनप्रसादगुणवत्त्वादर्शितासमुदायेनैवदर्भीरीतिमत्त्वंध्वनितं रघुवरचरितंमुनिप्रणीतं
रघुवरमाहेननस्यसर्वोनयामितेध्वनितं ईदृशास्यापिमिथ्यार्थकत्वेऽनुपादेयत्वंस्यादत आह मुनिप्रणीतं।
श्रेलानुग्रहप्राप्तसत्य—वाग्दृष्टिप्रणीतंपुरुषार्थस्वर्गमोक्षादिसाधनत्वंरघुवरचरितमित्य ॥।।

बा॰
बा॰टी॰
३१

नैनोक्तमेवदशशिरसश्ववधमित्यनेनतदंतमिदंश्रोतव्यमितिसूचितंतेनैवसूचितफललाभात् ३।
सरकांडेकस्याविलंभावतस्यहरिवंशावत् प्रतपवाश्रिमसर्गेवनसंचरणपर्यंतहृत्तान्वेषणमेवसमाप्ति
नाक्रमेषवेदसूनीतिप्राचः पेरनदशशिरसोवधंचेत्यन्वयः तेनसीतात्यागादिरूपोत्तरकांडीयहृत्तांतसंग्र
हइत्याहु ५२ इतिश्रीरामायणेतिलकेबालकांडेद्वितीयःसर्गः २ श्रुत्वेतिनारदात्काव्यविषयंरामच
रितंरूपंवल्लभ्यतामसमग्रंप्रकाशरहस्यसहितंकविरितिवब्रह्मलब्धवोक्तवातस्यधीमतोरामस्यहृत्तंचरि

रघुवरचरितंमुनिप्रणीतंदशशिरसश्ववधंनिशामयध्वं ५२ इत्यार्षेरामायणेवाल्मीकीयेबाल
कांडेद्वितीयःसर्गः २ श्रुत्वावस्तुसमग्रंतद्धर्मार्थसहितंहितं व्यक्तमन्वेषतेभूयोयद्वृत्तंतस्यधी
मतः १ उपस्पृश्योदकंसम्यङ्मुनिःस्थित्वाकृतांजलिः प्राचीनाग्रेषुदर्भेषुधर्मेणान्वेषतेगतिम्।

तंसरहःप्रकाशंतत् भूयःपुनःव्यक्तंसाक्षात्कारविषयोयथाभवतितथाकर्तुंअन्वेषतेव ३ श्वक्रेस्मेतिशे
षः धर्मार्थेतित्रिवर्गोपलक्षणफलत्वेनतत्सहितं हितंमोक्षफलकं १ उपयोगमेवाह उपेति प्राचम्य
त्यर्थः सम्यक्स्पृश्य ज्ञाचमनतीत्याइदमग्रेषामपिप्रायत्यसंपादकानामुपलक्षणंप्रागग्रेषुदर्भेषुस्थित्वा
धर्मेणयोगजेनब्रह्मप्रसादजरूपेणवगतिंरामादीनांचरितरूपांअन्वेषतेप्रतिपत्तेनपश्यतिस्म २।। २।

33

रामेत्यादि श्लोकद्वयमेकं वाक्यं भार्याः कौसल्याद्याः तत्सहितेन रामादिभिश्च यत्प्राप्तं सर्वं वृत्तं चरिते रा
ज्यपालनादि रूपं च तत्सर्वं तत्र समाधौ तत्त्वतः धर्मवीर्येण योगजबलेन पश्यति स्म ३।४ अयोध्यावास-
कालिकं वृत्तं निर्दिष्टवनदर्शनं तत्रैव वनकालिकं च निर्दिष्टमित्याह स्त्रीतृतीयेनेति द्वितीयो लक्ष्मणः तत्स-
र्वं चेति चस्मात् उत्तरकालिकमुत्तरकाण्डस्थं चेत्यर्थ इत्यपरे ५ नेदं दर्शनं संभवदित्याह तत इति पूर्वं चारे

राम लक्ष्मण सीताभी राज्ञा दशरथेन च सभार्येण सराष्ट्रेण यत्प्राप्तं तत्र तत्त्वतः ३ हसितं भाषितं चै
व गतिर्यावच्च चेष्टितं तत्सर्वं धर्मवीर्येण यथावत्संप्रपश्यति ४ स्त्रीतृतीयेन च तथा यत्प्राप्तं चर-
ता वने सत्यसंधेन रामेण तत्सर्वं चान्ववेक्षत ५ ततः पश्यति धर्मात्मा तत्सर्वं योगमास्थितः पु
रा यत्तत्र निर्वृत्तं पाणावामलकं यथा ६ तत्सर्वं तत्त्वतो दृष्ट्वा धर्मेण स महामतिः अभिरामस्य रा
(मस्य तत्सर्वं कर्तुमु

तयोगाभ्यासादित्यर्थः योगं समाधिं तत्र समाधौ पुरा पश्यति संप्रपश्यदित्यर्थः य
निर्वृत्तं जातं इदं च पलक्षणं यच्च भावि तच्च चरितं पश्यति स्मेति यावत् ६ नदीति धर्मेण योगजेन प्रज्ञानप्रवस-
हामतिः तत्सर्वं मतीतमनागतं च तद्विषयकाव्यकरणं अभिरामस्येत्यनेन तादृशकाव्यकरणस्य रागप्राप्त

= २ हि

= २ हि

रा.
कु. टी.
३२

कामेतिकामरूपोयोर्थः पुरुषार्थस्तद्रूपेणगुणेनफलेनयुक्तं धर्मार्थरूपपुरुषार्थफलेनविस्तरवत
विस्तरेणानुभयप्रतिपादकत्वात्तेनेत्यर्थः एतैः काव्यगुणालंकारध्वन्यादिभिः सर्वश्रुतिमनोम.
नोहरतः सारभूतामुपनिषदस्तासांहरतीत्यर्थप्रतिपादकंतेनमोक्षफलकत्वं व्याख्यानांतरंचमत्का.
रीत्युपेतमिति ८ सइति रघुवंशस्यतद्वंशावतीर्णरामस्यनारदकथनक्रमेणैवतच्चरितंतत्प्रतिपाद.
कंकाव्यंचकारेत्यर्थः ९ विस्तरेणवर्णनीयानर्थान्द्रष्टुंहिविदुषांलोकेसमासव्यासधारणमित्युक्ते

कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरं समुद्रमिवरत्नाढ्यंसर्वश्रुतिमनोहरं ८ सयथाक.
थितंपूर्वंनारदेनमहात्मना रघुवंशस्यचरितंचकारभगवान्मुनिः ९ जन्मरामस्यसुमहद्वी.
र्यंसर्वानुकूलतां ॥ ॥

समासेनसंक्षेपेणाह जन्मेत्यादिना वीर्यंस्वयमप्रमत्तस्यपराभिभवसामर्थ्यं
सर्वानुकूलतांसर्वेषामनुवर्तनरूपां प्रियतांविश्लेषासहत्वपर्यवसायिनीं वस्तुसौंदर्यबलादिविषयला
भेच्छानिवर्त्याविद्यमानानामपिदोषाणामदर्शनकरीं मनसस्संपातेच्छानिवर्त्यायामुपस्कृत
वस्तुमात्रालंबिनीइच्छाप्रेमपदवाच्येतिहिषयतांएवंभगवतिरामेमायापाव ॥
लेजातंप्रेमाविश्रमशुद्धिद्वारास्नेहविषयप्रेमोत्पादयनिदिध्यासनहृदाय ॥ रामः ॥ ॥

माक्तिजनकस्नानपर्यवसायीति बोध्यं स्तोतिउच्यमानोपि परुषं नोत्तरं प्रतिपद्यते इत्युक्तरूपां सौम्यतां
श्रुत्वा रदर्शनं तां ९ नानेति विश्वामित्रसहायने विश्वामित्रेणाश्रमगमने तत्रोपस्थितिकाले सभायां मार्गे
गमनकाले विज्ञाना नानाकथाश्चान्याश्च कथा योगवासिष्ठोक्ताः ब्रह्मप्रतिपादिकाः कथाश्च त्रयंबकेउक्ताः
गंगादिकथाश्चेत्यर्थः एतेनात्र श्लोकेन नानेति ग्रन्थाइ इति च व्यर्थमित्यपास्तं जानक्याश्चेति चेनाहिल्यादि

लोकस्य प्रियतां स्तोतिं सौम्यतां सत्यशीलतां ९ नानाविचित्रकथाख्यान्या विश्वामित्रसहायने
जानक्याश्च विवाहं च धनुषश्च विभेदनं १० रामरामविवादं च गुणान्दाशरथेस्तथा तथाभि
षेकं रामस्य कैकेय्या दुष्टभावतां ११ विघातं चाभिषेकस्य रामस्य च विवासनं राज्ञः शोकं वि
लापं च परलोकस्य चाश्रयं १२ प्रकृतीनां विषादं च प्रकृतीनां विसर्जनं निषादाधिपसंवादं
सूतोपावर्तनं तथा १३ गंगायाश्चापि संतारं भरद्वाजस्य दर्शनं १४ ॥

संग्रहः ११ रामेति द्वितीयः परशुरामः गुणान् विनयजपदूपान् १२ विघातेचेति विवासनं वनं प्रति
प्रस्थापनं परलोकस्य चाश्रयं परलोकगमनं मरणमिति यावत् १३ प्रकृतीनामिति प्रकृतीनां
वचनाद्वंकविसर्जनमयोध्यांप्रतिपरावर्तनं निषादाधिपगुहः सूतः सुमन्त्रः १४ ॥ ११

रा॰
बा॰टी॰
२२

गंगायाइतिप्रश्नप्रत्युत्तानसमाप्तिः १५ वास्त्विति वास्तुकर्मचित्रकूटेगृहनिर्माणं निवेशंतत्रगृहेप्रवस्था
नेप्रसादनेभरतकर्तृकं १६ पादुकेतिश्रेष्ठपादुकयोः भरतकृतंप्रभिषेकं नंदिग्रामस्थानितरांप्रति।
प्रायेणवासंतत्रभरतेनतत्रगतेनसर्वप्रजाः तत्रैववासंकृतवत्यइत्यर्थः १८ दर्शनमितिप्रश्नस्ययासमास्या

भरद्वाजाभ्यनुज्ञानाच्चित्रकूटस्यदर्शनं १५ वास्तुकर्मनिवेशंचभरतागमनंतथा प्रसा
दनेचरामस्यपितुश्चसलिलक्रियां १६ पादुकाग्र्याभिषेकंचनंदिग्रामनिवासनं दंडकार
ण्यगमनंविराधस्यवधंतथा १७ दर्शनंशरभंगस्यसुतीक्ष्णेनसमागमं प्रश्नस्ययासमास्या
वस्त्रंगरागस्यचार्पणं १८ दर्शनंचाप्यगस्त्यस्यधनुषोग्रहणंतथा शूर्पणख्याश्चसंवादंविरू
पकरणंतथा वधंखरत्रिशिरसोरुत्थानंरावणस्यच मारीचस्यवधंचैववैदेह्याहरणंतथा
राघवस्यविलापंचगृध्रराजनिवर्हणं कबंधदर्शनंचैवपंपायाश्चापिदर्शनं २१ शबरीद
दर्शनंचैवफलमूलाशनंतथा प्रलापंचैवपंपायांहनुमद्दर्शनंतथा २२। सहसीता। प्रश्नस्यया
याः समास्यामहासंनयप्रग्रथितत विराधवधात्सर्वमेव तथापिक्रमेणान्यर्थोभावाज्ञात्येनाभिधानंप्र
ग्रणानाःचरदनादिः १८ दर्शनमितिप्रगास्त्यसकाशात्धनुषोग्रहणं २६ वधमिति उत्थानंजानकीह

श्रीरामः
२२

अस्थ्नोतिप्रत्ययोत्पादनंशालभेदादिभिः सुग्रीवस्याविश्वासजननं विग्रहंयुद्धं २३ वालीनिसुग्रीवप्रति
पादनं सुग्रीवस्यराज्येस्थापनंसमयंधारादियात्राकर्तव्येति रामसुग्रीवयोः संकेतः वर्षेतिवर्षाका।
लिकवासांगीकरणं २४ कोपमितिउपसंग्रहंवानराणांमेलनंष्टाथिव्यास्थानिवेदनं सुग्रीववानराग्र

ऋष्यमूकस्यगमनंसुग्रीवेणसमागमं प्रत्ययोत्पादनंसख्यंवालिसुग्रीवविग्रहं २३ बालि
प्रमथनंचैवसुग्रीवप्रतिपादनं ताराविलापसमयंवर्षरात्रनिवासनं २४ कोपंराघवसिंह
स्यबलानामुपसंग्रहं दिशःप्रस्थापनंचैवपृथिव्याश्चनिवेदनं अंगुलीयकदानंचऋक्षस्य
बिलदर्शनं प्रायोपवेशनंचैवसंपातेश्चापिदर्शनं २९ पर्वतारोहणंचापिसागरस्यापिलंघ
नं समुद्रवचनाच्चैवमैनाकस्यचदर्शनं २८ राक्षसीतर्जनंचैवछायाग्राहस्यदर्शनंसिंहिका
याश्चनिधनंलंकामलयदर्शनं रात्रौलंकाप्रवेशंचएकस्यापिविचिंतनं आपानभूमिगमन

निदर्शीसंस्थाकथनं २५ अंगुलीयकदानंरामकौपकस्यापिविचिंतनं असहायस्यकर्तव्यार्थेविचारे।
वेदर्थः प्रबोधेन्तःपुरं २९ ॥ हैक हनुमानिप्रायोपवेशने प्रायेणअनशनेनवानराणामपवेशनंसम

सर्गोयमस्ताभ्यर्तितं २९ ॥

सप्तनीतिपाठः ५९॥

रा॰
बा॰टी॰
३४

यानंगमनं ३० प्रभिज्ञानं रामदत्तांगुलीयकं ३१ ३२ ग्रहणमिति लंकायादाहेनतत्र स्थानामाक्रंद
नं लंकादाहेहनुमद्गर्जनमित्यर्थो वा प्रभिमर्दनमितिपाठे लंकायादाहेनप्रमितामर्दनमित्यर्थः।
दर्शनं रावणस्यापि पुष्पकस्यच दर्शनं प्रेषणाकवनिकायानं सीतायाश्चापिदर्शनं ३१ प्रभि
ज्ञानप्रदानं च सीतायाश्चापि भाषणं राक्षसीतर्जनं चैव त्रिजटास्वप्नदर्शनं मणिप्रदानं सी·
ताया वृक्षभंगं तथैव च राक्षसीविद्रवं चैव किंकराणां निबर्हणं ३२ ग्रहणं वायुसूनोश्च लं·
कादाहाभिगर्जनं प्रतिप्लवनमेवाथ मधूनां हरणं तथा ३३ राघवाश्वासनं चैव मणिनि
र्यातनं तथा संगमं च समुद्रेण नलसेतोश्च बंधनं ३४ प्रतारं च समुद्रस्य रात्रौ लंकावरोध
नं विभीषणेन संसर्गं वधोपायनिवेदनं ३५ कुंभकर्णस्य निधनं मेघनादनिबर्हणं राव
णस्य विनाशं च सीतावाप्तिमरेः पुरे ३६ विभीषणाभिषेकं च पुष्पकस्य च दर्शनं अयोध्या·
याश्च गमनं भरद्वाजसमागमं प्रेषणं वायुपुत्रस्य भरतेन समागमं ३७ ॥ प्रतिप्लवनं पुनः सा·
गरोत्तरणं ३३ मणिनिर्यातनं सीतयादत्तस्य शिरोरत्नस्य राघवे दानं नलसेतोः नलनिर्मितसेतोः ३
प्रतारं सेतुनापारं तितीर्षुः ३५ निबर्हणं मारणं प्रेषः रावणस्य ३६ अयोध्यायाश्च गमनं तद्देशागम·

श्री
३४

रामाभिषेकाभ्युदयं रामाभिषेकोत्सवं सर्वं च चकारेत्यत्रकृष्यते ३८ अनागतं चेति यत्किंचिदित्यनेन
सीताविसर्जनात्पूर्वकालिकस्य भयस्यानंतरकालस्याप्रस्तुतायोत्यते तत्सर्वमुत्तरे सर्वतोविशिष्टे का-
व्ये चकारनिबद्धं पूर्वेत्यर्थः ३९ इतिश्रीरामायणतिलके बालकांडे तृतीयः सर्गः ३ ॥ प्राप्तेति प्राप्तरा-
ज्यस्य रामस्य वा अनेन रावणवधोत्तरमेतत्काव्यकरणमिति सूचितं वाल्मीकिः तद्विषयचामीत्यपि

रामाभिषेकाभ्युदयं सर्वसैन्यविसर्जनं स्वराष्ट्ररंजनं चैव वैदेह्याश्च विसर्जनं ३८ अनागतं च
यत्किंचिद्रामस्य वसुधातले तच्चकारोत्तरे काव्ये वाल्मीकिर्भगवानृषिः ३९ इतिश्रीरामायणे
बालकांडे तृतीयः सर्गः ३ ॥ प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः चकार चरितं कृ-
त्स्नं विचित्रपदमर्थवत् १ चतुर्विंशत्सहस्राणि श्लोकानामुक्तवानृषिः तथा सर्गशतान्पंच ष-
ट्कांडानि तथोत्तरं ॥ २ ॥

स्य

रित्यर्थो दर्वांगनत्वं चरितं
तत्प्रतिपादककाव्यं ॥ अर्थवत् धन्य-
लंकावादिप्रशस्तार्थं आत्मवानिति पादेष्ववहितान्तः करणः प्राधान्येन तत्र आत्मशाहुर्ज्ञातः कर-
णवाची १ ॥ चतुर्विंशादिति चतुर्विंशतिर्विषयत्वेन कच्छंदसः शतानीति पुंल्लिंगोऽप्यथ ॥

रा.
बा.टी.
३५

तत्र पंचशतानि पंचसर्गसंख्या षट्कांडानामेव श्लोकसंख्या तस्योत्तराणामित्याह । कृतवानिति कृत्स्नं उत्तरं संख्या
पेतया षट्त्रिंशत्सर्गसंख्याधिकादर्शनात् चतुर्विंशतिसहस्रायेतया श्लोकसंख्यायाश्च पिण्डाहिकादर्शना
चेउत्तरकांडीयसर्गसंख्यानुक्रमप्रतिपादने श्लोकानन्वाथ इत्याह । २ कृतवानिति महर्षिः सहितपदः ।
भविष्यामसहस्रसहितं विशिष्टं यदुत्तरं तेन सहितमिदं काव्यं बालकाण्डायोगानाम्प्रसादाच्च कृत्वा कोन्वयमः
प्र तत्प्रयुंजीयात्सभासु पठन्श्रावयेत्सभ्यानितिचिंतयामासस्यसुत्तरमित्यत्रान्तरपदार्थः सभाभविष्यति

कृत्वा तु तन्महाप्राज्ञः सभविष्यं सहोत्तरं चिंतयामास कोन्वेतत्प्रयुंजीयादिति प्रभुः ४ तस्य चिंत
यमानस्य महर्षेर्भावितात्मनः अगृह्णीतां ततः पादौ मुनिवेषौ कुशीलवौ कुशीलवौ तु धर्मज्ञौ रा
जपुत्रौ यशस्विनौ भ्रातरौ स्वरसंपन्नौ ददर्शाश्रमवासिनौ ५ ॥

सविशेषणत्वेप्यार्षः समासः भ
विष्यं च सीताविसर्जनमारभ्येत्येके तस्याः भूप्रवेशोत्तरकालिकमिति विशेषणत्वेप्यार्षः समासः भु
वि प्रयुंजीयादिति छांदसं ४ तस्येति भावितात्मनः एमचरितवंधनेन शुद्धचित्तस्य अगृह्णीतामिति ।
छांदसं आवां गानाचार्यविषयकमादरं ग्रहणं कृतवंतौ मुनिवेषौ राजकुमारौ वयावाश्रमस्थितिवशात् द्या
मतौ कुशीलवौ कुशीलवौ कुशाशाहृस्य कुशीभावः शृङ्खलेदवादिवान् ५ कुशीनिरदर्शकाव्यग्रहणयोग्य

३५

मविःतिधीर्धौरणावतीमेधापरिनिष्ठितौ जातवेदाध्ययनौ उपबृंहणं वेदस्य तत्तदर्थैतात्पर्यग्रहणं तद्रू
पायार्थीयप्रयोजनाय अनेन श्रुतितात्पर्यग्रहणं तद्रूपायार्थीयप्रयोजनाय अनेन श्रुतितात्पर्यविषयी
भूतार्थप्रतिपादकत्व याग्रामाण्यमस्योपादेयत्वं च सूचितं ६ काव्यमिति रामस्यायनं चरितं तत्प्रतिपादकं
तथा सीताचरितप्रतिपादकं च महत्काव्यं पौलस्त्यवधमित्येवं नामकं च कारेति तत्तावग्राहयतीति पूर्वे.

स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ६ काव्यं रामा-
यणं कृत्स्नं सीतायाश्चरितं महत् पौलस्त्यवधमित्येवं चकार चरितव्रतः ७ पाठ्ये गेये च मधुरं
प्रमाणैस्त्रिभिरन्वितं जातिभिः सप्तभिर्युक्तं तन्त्रीलयसमन्वितं ८ रसैः शृंगारकरुणहास्यरौद्र
भयानकैः वीरादिभी रसैर्युक्तं

एवं वधः यथा कस्यचिन्निवर्णनं तुपमाघकाव्यस्य शिशुपालवध
इति नाम ७ पाठ्ये इति ततः श्लोकचतुष्टयमेकान्वयं पाठ्यगेययोर्भावेऽपत् यतो तेन पाठेन गानेन च मधुः
गानं तन्त्रीनाडीसमस्यक्रान्तिभेदोपेतं उभयत्रापि मधुरं श्रोतृस्वावजनकं प्रमाणानि द्रुतमध्यविलंबि-
तानि सप्तजातयः षड्जादयः सप्तस्वराः सप्तस्वरविशिष्टगानानुबोधीनि यावत्तत्रसेवित्ति वीरादीत्यादि.

बा॰
बा॰ टी॰
३९

तौ विशेषयति तौ ति गांधर्वस्य समग्रेनायस्य तत्त्वज्ञौ स्थानेवमूर्छनाच तयोः समाहारः स्थानमू-
र्छनं तच्च कोविदौ तत्त्वज्ञौ तत्तेनयद्यं हृदयग्रंथयः कपोलफलकादयः प्राणसंचारणस्थानं स्थानमि-
त्यभिधीयते उरः कंठः शिरश्चेति तत्तु त्रिविधं भवेत् मंद्रं मध्यं च तारं चेति शांडिल्यः तथा पत्रेव
स्थः स्वराः श्रुतीनां मूर्छना मन्द्रादाहूनेतिच यत्र गीतिविशेषे इत्यर्थः रूपिणौ प्रशस्तरूपवंतौ ९।

तौ तु गांधर्वतत्त्वज्ञौ स्थानमूर्छनकोविदौ भ्रातरौ स्वरसंपन्नौ गंधर्वाविव रूपिणौ ९ रूपल-
क्षणसंपन्नौ मधुरस्वरभाषिणौ बिंबादिवोत्थितौ बिंबौ रामदेहात्तथापरौ ११ तौ राजपुत्रौ
कार्त्स्न्येन धर्म्यमाख्यानमुत्तमम् वाचोविधेयं तत्सर्वं कृत्वा काव्यमनिंदितौ ऋषीणां च द्विजाती-
नां साधूनां च समागमे यथोपदेशं तत्त्वज्ञौ जगतुस्तौ समाहितौ १३। रूपेति प्रत्यग्ररूपमवयवसंस्था-
नं उक्तस्वरसंपन्नाविन्यस्यैव विवरणं मधुरस्वरेति बिंबात्स्यादेकोत्थितौ बिंबाविव प्रतिबिंबाविव तथा
रामदेहात् उत्थितौ परौ रामदेहौ विवेत्यर्थः ११ तावितिधर्म्यं धर्मादनपेतं वाचोविधेयं विनापि पुस्तकेन
हृदयस्थं १२ ऋषीणां द्विजातीनामिति गोबलीवर्दन्यायेन साधूनां द्विजेतराणामपि यथोपदेशं जगतुः

तत्त्वज्ञौ काव्यस्य मातादेशकृतौ समाहितौ सुसमाहितौ स्थिरचित्तौ ।३।

लक्ष्यलक्षणोपेतिपादेसामुद्रिकाविष्टिलेसंपदीस्वंलक्षणंसलक्षणंतेनलक्षितौयुक्तौअतएवमहात्मानौमहा।
भागौचमार्गेभाग्यश्रवणगायतामिदमाख्यानं भवद्भ्यामृषिसंसदि राजर्षीणांगुणपह्रुतांसाधूनांचसमाग
मे गुणाजैवमनुक्ताानौप्रक्रम्यामधुरस्वराविति कवित्वख्याते नदनन्वपीतिस्पष्टमेव भाविताात्मनांश्च द्विवि

महात्मानौमहाभागौसर्वलक्षणलक्षितौ तौकदाचित्समेतानामृषीणांभाविताात्मनां १४ मध्येस
भंसमीपस्थाविदंकाव्यमगायतां तच्छ्रुत्वामुनयःसर्वेवाष्पपर्याकुलेक्षणाः १५ साधुसाध्विति।
ताहूचुःपरंविस्मयमागताः तेप्रीतमनसःसर्वेमुनयोधर्मवत्सलाः १६ प्रशशंसुःप्रशस्तव्यौ
गायमानौकुशीलवौ अहोगीतस्यमाधुर्यंश्लोकानांचविशेषतः १७॥ चिरंनिर्वृत्तमप्येतत्प्र
त्यक्षमिवदर्शितं प्रविश्यताावुभौसुष्ठु तथाभावमगायतां १८॥

तानां १४ मध्येसभमित्य।
व्ययीभावः समीपस्थौसहिताविस्पष्टः तच्छ्रुत्वेतं १५ प्रशस्तव्याविती उभावनलोगौलक्ष्यांदसौअहोश्राव्य।
वै १७ चिरेति एतच्चावणाचयतवस्तितं एवंज्ञस्विप्रशंसोऽनन्तरंपुनस्तयोर्गानमाहसमावेकाख्याभिप्राय ते।
नद्रस्वरूपप्रविश्यतन्मयीभस्यसम्यक्त्वयथाश्रोतॄणांवसाविभावोभवतितथागायतामित्यर्थः १८ ॥ ।

रा०
बा० टी०
३०

सहिताविति मधुरं पाठतो गानतश्च रक्तं उच्चैः स्वरसंपदा षड्जादिस्वरसंपदा रसंपन्नं यथा भवति तथा गा
यतामिति द्वे वर्णासंबंधः एवं प्रहृतो गीतस्यैत्याद्युक्तरीत्या १९ संरक्ततरमत्यर्थं तंत्रीतथाप्यत्यर्थं मधुरं न

सहितौ मधुरं रक्तं संपन्नं स्वरसंपदा एवं प्रशस्यमानौ तौ तपःश्लाघ्यैर्महर्षिभिः १९ संरक्ततर-
मत्यर्थं मधुरं तावगायतां प्रीतः कश्चिन्मुनिस्ताभ्यां संस्थितः कलशं ददौ २० प्रसन्नो वल्कलं क-
श्चिद्ददौ ताभ्यां महायशाः अन्यः कृष्णाजिनमदाद्यज्ञसूत्रं तथापरः २१ कश्चित्कमंडलुं प्रादान्मौंजी-
मन्यो महामुनिः बृसीमन्यस्तदा प्रादात्कौपीनमपरो मुनिः ताभ्यां ददौ तदा हृष्टः कुठारमपरो मुनिः
काषायमपरो वस्त्रं चीरमन्यो ददौ मुनिः २३ जटाबंधनमन्यस्तु काष्ठरज्जुं मुदान्वितः यज्ञभांडमृषिः
कश्चित्काष्ठभारं तथापरः २४ औदुंबरीं बृसीमन्यः स्वस्ति केचित्तदावदन् आयुष्यमपरे प्राहुर्मुदा तत्र
महर्षयः २५ ददुश्चैवं वरान्सर्वे मुनयः सत्यवादिनः आश्चर्यमिदमाख्यानं मुनिना संप्रकीर्तितं २६

तो रामायणगानश्रवणानंदपरवशानां मुनीनां चेष्टामाह प्रीत इति संस्थितः सभायामिति शेषः २०।२१। बृ
सी मुनीनामासनं २२ २३ स्वस्तीत्याद्याशीः २५ आश्चर्यमित्यादि मनोहरमित्यंतमेकं वाक्यं २६ ।।।

परमिति कवीनामाधारं वर्णनीयार्थस्य प्रकारभेदलाभद्वारा सर्वगीतिषु कोविदौ कुशीलवौ।
इदं गीतं गानयोग्यं वस्तु अभिगीतं सम्यग्गीतं यथाक्रमं समाप्तं समापितं च वगीतमिति पाठे ऽनवद्यं
यथा तथा गीतमित्यर्थः २७ आयुष्यं आयुर्जनकं पुष्टिरभ्युदयः सर्वश्रुतिमनोहरं सर्वश्रुतीनां मनां
सि उपनिषदस्तदर्थहरमित्यनेन मोक्षदं गीतमित्येवं सर्वत्र प्रशस्यमानौ तत्रायोध्यायां रथ्यासु॥

परं कवीनामाधारं समाप्तं च यथाक्रमं अभिगीतमिदं गीतं सर्वगीतिषु कोविदौ २७ आ।
युष्यं पुष्टिजननं सर्वश्रुतिमनोहरं प्रशस्यमानौ सर्वत्र कदाचित्तत्र गायकौ २८ रथ्यासु
राजमार्गेषु ददर्श भरताग्रजः स्ववेश्म चानीय ततो भ्रातरौ स कुशीलवौ २९ पूजयामास
पूजार्हौ रामः शत्रुनिबर्हणः आसीनः कांचने दिव्ये स च सिंहासने प्रभुः ३०।

रथ्यासु वीथिषु राज।
मार्गेषु च गायमानौ तौ कदाचिद्भरताग्रजो ददर्शेत्यन्वयः २८ २९ ३। उपोपविष्टः सचिवैरिति पाठे।
उपसमीपे उपविष्टाः सचिवा यस्येत्यर्थः। उपोपविष्टैः सचिवैरिति पाठे समीपस्थैर्मंत्रिभिर्भ्रातृभिश्च।
समन्वित इत्यर्थः। भ्रातृरूपसंपन्नाविति पाठे भ्रातृसदृशावित्यर्थः। दृष्ट्वा तद्रूपसंपन्नाविति प्रचुरः॥

रा.
बा. टी.
३८

भ्रातृयोः सकाशादेतदाख्यानं श्रूयतामिति लक्ष्मणादीनुवाच ३२ विचित्रार्थपदमिति पूर्वान्वयितौ
गायकौ गातुं प्रेरयत् स चित्तायतनिस्वनं स्वस्य श्रोतृचित्तस्य च ग्रनुरूपं प्रगायतः तारः निस्वनो नादो यत्र
तथा सबलानुरूपं श्रोतृचित्ताह्लादकं च यथा भवति तथा वक्तृत्वसंपन्नमिति फलितं ३३ तंत्रीलयवत् तंत्री
लयसदृशं विस्फुतार्थविशेषतः श्रुतमात्रेणार्थबोधजनकं यथा भवति तथा श्रोतृशोभेनागायतां

स

उपोपविष्टः सचिवैर्भ्रातृभिश्च समन्वितः दृष्ट्वा तद्रूपसंपन्नौ विनीतौ भ्रातरावुभौ उवाच लक्ष्म
णं रामः शत्रुघ्नं भरतं तथा श्रूयतामेतदाख्यानमनयोर्देववर्चसोः ३२ विचित्रार्थपदं सम्य
ग्गायकौ समचोदयत् तौ चापि मधुरं रक्तं स्वचित्तायतनिःस्वनं ३३ तंत्रीलयवदत्यर्थं विश्रु
तार्थमगायतां ह्लादयत्सर्वगात्राणि मनांसि हृदयानि च ३४ श्रोत्राश्रयं हृद्यं गेयं तद्बभौ ज
नसंसदि इमौ मुनी पार्थिवलक्षणान्वितौ कुशीलवौ चैव महातपस्विनौ ३५ मितपत्रयः सर्व

गात्राणि श्रोतॄणां सर्वगात्राणि ह्लादयत् रोमांचादिप्रादुर्भावेनानंदानुभावनसमर्थानि अकरोत्
न मनस्सु ह्लादो नाम निद्रायामिव विस्मृतान्यव्यापारता हृदयानि हृदयमिति हृदयमित्यस्य यत्नि
निर्वचनात् हृदये प्रत्यगात्मा उपाधिभेदाद्धेतुवचनेन तस्य ह्लादो नाम मनस्सुखानुभोगः ३४ ॥ ३

श्रोत्रं कर्णशष्कुलीनद्वाश्रयं श्रोत्रेंद्रियं तत्स्वभावं श्रुयाख्यानस्य श्रवणे प्रयोजनमुपदिशन्नुत्तरपि ।
लक्षणादीनप्यादरेण श्रवणार्थं प्रेरयति इमाविति यद्यस्मात् महात्तपस्विनो श्राश्रमवासान्नपोषु ।
कौ सत्त्वरूपतल्लक्षणाजानुबाहुत्वादिपार्थिवलक्षणान्वितौ मुनिशिष्यवाच्चमतीदृमौ प्रबंधस्य गायकौ
वर्णितं गेयं काव्यं वमहानुभावं वशाह्लाद्यर्थालंकारललितसंदर्भवादिवैभवेन सार्वभौमविषयमनेन च महा
वैभवं अतः निबोधत श्रादरेण श्रृणुत किंच यतः तत्काव्यं तच्छ्रवणं च समस्तानामपि भूतिकरं इहामुत्राभ्युदय ।
करं प्रवर्तते अनेककल्याणजीवनो हेडाः पूर्वं पूर्वं वामायणस्यैतत्फलत्वाङ्गात्रश्रस्यापि तत्फलकत्वमि

समर्पितत्रूतिकरं प्रवर्ततेमहानुभावं चरितं निबोधत २५ ततस्तैतौ रामवचःप्रचोदितावगा

त्रिभावइतिशेषः वस्ततो मम यतां मार्गविधानसंपदा २५॥ चरितं मत्कं वंधिनश्चरितं मच्चवितार्थ
प्रतिपादकं मत लोकोत्तरं काव्यं निबोधत यतस्तत् श्रोतृणां भूतिकरमपि भुक्तिमुक्तिदमपि प्रवर्त
ते पूर्ववत् श्रवणमात्रेण सर्वगात्राह्लादायिपापहृत्राख्ये अतएव महानुभावं महाप्रभावं श्रूयस्श्लोक
स्यलक्षणादीनामतच्छ्रवणप्रवर्तकार्थकनैवमेवास्यव्याख्यातंतिद्रष्टव्यं २५ ततइतिप्रगाय ।
तामिति प्रगायेतामित्यर्थः रामवचःप्रेरितौ तौ मार्गविधानसंपदा गानं द्विविधं मार्गो देशी चेति ॥

रा.
वा.टी.
३९

तत्र प्राकृतानावलंबिमानदेशीसंस्कृतावलंबीतमार्गौ॥ तयोर्मध्ये मार्गो व्यगानमार्गावलंबनसामग्र्या।
प्रगाम्यतां परिवृत्तः समागतः स रामोपि विभष्याम चरितस्य चिरकालेस्थिती व्ययाप्रवंधस्यगी
तस्य श्रवणेप्या सत्क्रममनावभूवा शनैः पदेन उत्तम प्रहृष्टवान्स्वप्रशंसार्थमेकप्रत्रकाव्य शनैः प्रवृत्तिरि।
ति धन्यतेस्यं श्रवणे चानरोनरं लोकानामुपादेयतं उआश्रवणे प्रवृत्तौ तस्यास्थिरं संभवतीति तदाश

सचापि रामः परिवृत्तः शनैर्वुभूषया सत्क्रमनावभूवह ३९ इत्यार्षे रामायणे बालकांडे च
तुर्थः ४। सर्वापूर्वमियंयेषामासीत्कृत्स्नावसुंधरा प्रजापतिमुपादायनृपाणांजय।
शालिनां १ ॥१॥ यः सप्रवृत्तिनिकविकृतनासैव मिच्छाभगवनइति वोधं इहामत्रसाभ्युदये॥
व्ययेनिव्याख्यानेन युक्तं भगवतः साभ्युदये च्छयावाधात पतेनराज्ञोकविकृतस्य काव्यश्रवणमावश्य
कमितिसूचितं ३९ इतिश्रीरामायणटीकावालकांडेचतुर्थः सर्गः ४ एवंसर्गचतुष्टयेन उपोद्घाते
ना वक्ष्यमितिदिशाति सर्वेति कृत्स्नाइयंवसुंधरा प्रजापतिं चैवसतं मनुं उपादाय उपक्रम्य जयशालिनांज
येन शोभावतायेषांनृपाणां सर्वापूर्वेषं ऐहिकामुष्मिकसर्वाभ्युदयसाधनेयथाभवतितथाश्री॥
सीत पूर्वापूर्ववंशाद्वोद्युपादेयपरंपरानियतन प्रसकालिंगइतिकेचित ॥१॥

किंचयेषांवंशेससगरोनामअभवत् सागरइत्यादिवासखद्रेसागरशाह्वेतिखदथीनेतिसूचितं षष्टि।
पुत्राणांनिषुत्रसहस्राणिषष्टिसहस्राणिकाविनषष्टिरितिष्टयक्त्यदपादः अनेनतद्भाराथेनद्वंशेन
जगत्पवित्रीकरणसमर्थागंगायद्वंशावतारितेतिविज्ञप्यतेतेनचातिशायिनेतद्वंशमाहात्म्यंसूचितंत।
द्वंशस्यगंगापरनामकभगवदवतारयोग्यताचतेनसूचिता २ तेषांइक्ष्वाकूणांवंशोवंशविषयेरामा।
यणमितिनाम्नाप्रसिद्धंमहदाख्यानमुत्पन्नमितियोजना इक्ष्वाकुपत्येषुइक्ष्वाकुलाबोपादिक्ष्वाकूणामि

येषांससगरोनामसागरोयेनखानितः षष्टिपुत्रसहस्राणियंयांतंपर्यवारयन् २ इक्ष्वाकू॥
णामिदंतेषांराज्ञांवंशेमहात्मनां महदुत्पन्नमाख्यानंरामायणमितिश्रुतं ३ तदिदंवर्तयि।
सुक्तिः ३ तदि ष्यावःसर्वंनिखिलमादितः धर्मकामार्थसहितंश्रोतव्यमनसूयता ४। तितदिदंव
र्तयिष्यावःइत्यादितः प्रारिमारभ्य निखिलंउत्तरकांडांतंसर्वंसर्वशाखोऽवयवकात्स्न्येनसर्वावयवकंवर्णय
द्वःश्रतिशेषेनेषभतियावत् धर्मकामार्थाः सहितायस्मात्तत् सहिताइत्यनेकेनन्याकांतायामोक्षेण
तिगम्यतेतेनपुरुषार्थचतुष्टयसाधनमितिफलितं वर्तयिष्याव।गास्यावः ततअनसूयताअसूयाम
कुर्वताश्रोतव्यंअनेनअसूयाराहित्यमेवपतद्भवणाधिकारिविशेषणमित्युक्तंसर्वपुरुषार्थसाधन

रा॰
बा॰टी॰
५॰

कोशल इति मुदितः राजभिर्धर्मेण परिपालनात् स्फीतः उत्तरो[illegible] नरवृद्धिं प्राप्तः सरयूतीरे नतु पलत्ति॰
नदेशो निविष्टः स्थितः जनपदो अस्तीति शेषः ५ अयोध्येति तत्र कोशले जनपदे अयोध्या नाम लोकविश्रु॰
ता नगरी प्रसिद्धा या मानवेंद्रेण मनुना स्वयं निर्मिता आसीत् पुरीमध्ये नगरी ता ६ आयतेति सरयूतीरेण
प्रदेशेण द्वादश योजनदीर्घा त्रीणि योजनानीति शेषः विस्तीर्णा तिर्यग्विस्तारवती महापथा वहिर्मा

कोशलो नाम मुदितः स्फीतो जनपदो महान् निविष्टः सरयूतीरे प्रभूतधनधान्यवान् अयोध्या
नाम नगरी तत्रासील्लोकविश्रुता मनुना मानवेंद्रेण या पुरी निर्मिता स्वयं ६ आयता दश च द्वे च
योजनानि महापुरी श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा राजमार्गेण महता सुविभक्तेन॰
शोभिता मुक्तपुष्पा पुरीमावासयामास दिवि देवपतिर्यथा ९ ॥ वकीर्णेन जलसिक्तेन नित्य॰
| शः ८ तां तु राजा दशरथो महा[illegible]ष्ट्रविवर्धनः ॥ ।
र्गः ७ राजेति राजमार्गः ॥ सर्वपापप्रशोभिता राजद्वा
रात्पुरः प्रवृत्तः मुक्तपुष्पाणि विकसितपुष्पाणि ८ तां विति दिवि देवपतिरिन्द्रः पुरीं अमरावतीं ।
यथा आवासयामास एवं राजा दशरथस्तां पुरीं आवासयामास पूर्वाधिकलोकवसतिमतीं चकार ध॰
र्मन्यायबलेन पोषणात् महतो राष्ट्रस्य विशेषेण वर्द्धनकर्ता ९ ॥

कपाटेति तोरणं बहिर्द्वारालंकारदारुबंधः सुविभक्तमंतरं येषां तादृशा आपणा यस्यां सा सर्वयंत्रायु
धवती प्राकारोपरीति शेषः उषितां कृतवासाम् ॥१०॥ सूतेति सूताः स्तुतिपाठकाः मागधाः वंशावली
वाचकाः अट्टालाः उपरिगृहाः शतघ्न्यो नाम प्राकारसंरक्षणार्थमयोभारनिर्मिताः प्राकारोपरिस्थापि
ताः आयुधविशेषाः ॥११॥ वधूनिति वधूनाटकशालासमुदायैः सर्वतो युक्तां उद्यानानि क्रीडार्थमुपवना

कपाटतोरणवतीं सुविभक्तांतरापणाम् । सर्वयंत्रायुधवतीमुषितां सर्वशिल्पिभिः ॥१०॥ सूतमाग
धसंबाधां श्रीमतीमतुलप्रभाम् । उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलाम् ॥११॥ वधूनाटकसंघैश्च
संयुक्तां सर्वतः पुरीम् । उद्यानाम्रवणोपेतां महतीं सालमेखलाम् ॥१२॥ दुर्गगंभीरपरिखां दुर्गामन्यै
र्दुरासदाम् । वाजिवारणसंपूर्णां गोभिरुष्ट्रैः खरैस्तथा ॥१३॥ सामंतराजसंघैश्च बलिकर्मभिरावृ
ताम् । नानादेशनिवासैश्च वणिग्भिरुपशोभिताम् ॥१४॥

टिकाः सालः प्राकारः सालवनं वा ॥१२॥ दुर्गेति जलदुर्गेण गंभीरा अगाधा परिखा यस्यां तां अतएव
दुर्गाम् अन्यैरपि दुःखगम्यां अन्यैः शत्रुभिः दुरासदां अशक्यसमीपगमनाम् अपि वारणा गजाः ॥१३॥
सामंतेति समंताद्भवाः राजसमूहैः बलिः करः तद्दानरूपकर्म येषां तादृशैः ॥१४॥ ॥

रा॰
बा॰टी॰
५।

रत्नविकृतैः रत्ननिर्मितैः पर्वतसदृशैः प्रासादैः शोभितां कूटागारैः अगारैः गृहैः स्त्रीणां क्रीडागृहैः वि
नियमवत् कूटाः शालाः अगारं गृहं इत्यमरे १५ चित्रामिति अष्टापदे सद्वर्णीतज्ञलेन कृतः आकारः अलं
कारो यस्याः इत्येके सूतफलकाकारामित्यन्ये विमानगृहं सप्तभूमिगृहं विमानो स्त्री देवयाने सप्तभू
मौ च सद्मनीति निर्घंटः १६ गृहेति गृहैः घोरकूटैः विगृहैः गाढोति विच्छिन्नगृहवप्रविच्छिद्रां इत्तको

शा॰ प्रासादैः रत्नविकृतैः पर्वतैरिव शोभितां कूटागारैश्च संपूर्णामिंद्रस्येवामरावतीं १५ चित्रामष्टा
पदाकारां वरनारीगणायुतां सर्वरत्नसमाकीर्णां विमानगृहशोभितां १६ गृहगाढामवि
च्छिद्रां समभूमौ निवेशितां शालितंडुलसंपूर्णामिक्षुकांडरसोदकां दुंदुभीभिर्मृदंगैश्च ॥
वीणाभिः पणवैस्तथा नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमां १७ विमानमिव सिद्धानां तप
साधिगतं दिवि सुनिवेशितवेश्मांतां नरोत्तमसमावृतां ये च बाणैर्न विध्यंति विविक्तमपरापरं

इक्षुसमानस्वादूदकवतीं १७ भृशं नादितां पृथिव्यां अत्यर्थं अत्यंतं अनुत्तमामिति च कुव्रीहिः तपसा
प्राप्तं दिवि सिद्धानां विमानमिव पृथिव्यामनुत्तमामिति संबंधः सुष्टु निवेशिताः वेश्मनो
अंताः वाह्यप्रदेशा यस्यां तां १९॥ १९॥

नं अपरे तु ग्रामरथो पस्यते

येवेति विविक्तं सममसहायमदृष्टं सहायरहितं अप रायवं परे पि ज्ञातयः तेहीनं त्वं शब्दैकतंत्रमित्येके परकी-
यमलकीयमिमं केवलं प्रेत्तकमित्यन्ये तथा शब्दमात्रश्रवितमनया वेधयोग्यं प्रच्छन्नमिति यावत् तथा वि-
ततं विरुध्यग्रपुङ्खं कृत्वा पश्चान्नतं पलायितं ईदृशान् शब्दवेधान् पियेवाणेन विध्यंति येचलघुहस्ताः ।
शीघ्रवेधिनः विशारदाः ग्रसमर्था स्वप्रयोगसमर्थाः तेषां तेषां सहस्रैः पूर्णामित्युत्तरेणासंबंधः २१ सिं-

शब्दवेध्यं च विततं लघुहस्ता विशारदाः ॥ २१ सिंहव्याघ्रवराहाणां मत्तानां नदतां वने हंतारो निशितैः
शस्त्रैर्बलाद्बाहुबलैरपि २१ तादृशानां सहस्रैस्तामभिपूर्णां महारथैः पुरीमावासयामास राजा द-
शरथस्तदा २२ तामग्निमद्भिर्गुणवद्भिरावृतां द्विजोत्तमैर्वेदषडंगपारगैः सहस्रदैः सत्यरतैर्महात्म-
भिर्महर्षिकल्पैर्ऋषिभिश्च केवलैः २३ इत्यार्षे रामायणे पंचमः ५ ॥

इति बाहुबलैरपि मल्लयुद्धैरपि २१ महारथैः आत्मानं सारथिं चाश्वान् रक्षन् युद्धेन यो नरः स महारथसं-
ज्ञः स्यात् एकादशसहस्रैर्योद्धा वत्रावासयामास तेषामावासेन ततः पूर्णां चकारेत्यर्थः २२ तामिति अग्नि-
मद्भिः आहिताग्निभिः गुणाः शमदमादयः वेदानां षडंगानां च पारगैः महर्षिकल्पैः महर्षिसदृशैः केवलैः
शुद्धैः ऋषिभिमं वद्दष्टुभिश्चावृतां वासमो २२ २३ ॥ इत्यार्षे पंचमः सर्गः ५ ॥ । ५ ॥ ॥

43

रा॰
बा॰ टी॰
५२

तस्यामिति वेदवित् त्रैवर्णिकमात्रस्यध्यायो यं ग्रन्थः सर्वसंग्रहः सर्वेषामपरिमितचतुरंगबलराष्ट्रदुर्गादीनां साधनानामापत्तिनानां संग्राहकः एवं सामादिप्रयोगे एवं फलं भविष्यतीत्यादि लक्षणदीर्घदर्शनशीलः ते। जःप्रतापः १ अतिरथः दशसहस्रमहारथयोद्धा वशी स्वाधीनः २ धनैर्हिरण्यादि भिः अन्यैः संचयैः धान्यादिसं

तस्यां पुर्यामयोध्यायां वेदवित्सर्वसंग्रहः दीर्घदर्शी महातेजाः पौरजानपदप्रियः १ इक्ष्वाकूणामतिरथो यज्वा धर्मपरो वशी महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः २ बलवान्निहतामित्रो मित्रवान्विजितेन्द्रियः धनैश्च संचयैश्चान्यैः शक्रवैश्रवणोपमः ३ यथा मनुर्महातेजा लोकस्य परिरक्षिता तथा दशरथो राजा लोकस्य परिरक्षिता ४ तेन सत्याभिसंधेन त्रिवर्गमनुतिष्ठता पालिता सा पुरी श्रेष्ठा इंद्रेणेवामरावती ५ तस्मिन्पुरवरे हृष्टा धर्मात्मानो बहुश्रुताः नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः ६ नाल्पसंनिचयः कश्चिदासीत्तस्मिन्पुरोत्तमे ॥

वरे

चयैः धान्यादिसं

चयैः ४ तेनेति सत्याभिसंधः सत्यप्रतिज्ञः धर्मकामार्थास्त्रिवर्गः सम्यक्संपादककर्मानुष्ठानप्राधान्येन पालिता पुरभवदिति योजना ५ धर्मात्मनः धर्मवासनावासिताः बहुश्रुताः शास्त्रविशेषिताः त्वविसंतोऽलुब्धाः स्व

ग्रत्यःसान्निवयोयस्यसनास्ति अभावस्त्वेनसर्वेषांबकृश्यनवत्तामुच्यते योपिअगदादिमान् अर्थाभावेन्य
यीभावेनजनतस्तुस्मेवाततोमनव अतएवासिद्धार्थाः असिद्धेहिकामुष्मिकप्रयोजनईदृशाः कुंडवीनकश्चि
दासीदितियोजनाएवमग्रेपि ७ कामीकामैकतत्परः कदर्यः आत्मानंधर्मकृत्यंचपुत्रदारांश्चपीडयेत् ।
लोभाद्यःपितरौभ्रातृन्सकदर्यइतिस्मृतः अनृशंसोघातकः क्रूरः प्राकमितिसामान्यनपुंसकंअत्रतन्नआ

कुंडवीयोअसिद्धार्थोगवाश्वधनधान्यवान् ७ कामीवानकदर्योवानृशंसःपुरुषःक्वचित् द्रष्टुं
शक्यमयोध्यायांनाविद्वान्नचनास्तिकः सर्वेनराश्चनार्यश्चधर्मशीलाःसुसंयताः मुदिताःशील
वृत्ताभ्यांमहर्षयइवामलाः ९ नाकुंडलीनामुकुटीनास्रग्वीनाल्पभोगवान् नामृष्टोननलिप्तां
गोनासुगंधश्चविद्यते नामृष्टभोजीनादातानाप्यनंगदनिष्कधृक् नाहस्ताभरणोवापिदृश्यतेना

त्मवान् कामादिषुसंबध्यतेतेनैकगुणवत्तांसमुदितगुणवत्तांचनत्रसत्वातिषिध्यते ८ सर्वेइतिसुसंयताःसु
संयताःसुष्ठुनिगृहीतेंद्रियाः ९ भोगोधर्माविरुद्धःकामभोगः अमृष्टः निर्मलः ननलिप्तांगइतिपाठःन
लिप्तांगइतिसमस्यचेतिसमासः लेपश्चंदनादिनातदाहनासुगंधइति १० निष्कःउरोभूषणंअनात्मवान्अ

प्ययज्वासोमयागरहितः तद्रः प्रत्यवियेष्वर्याद्विमान् प्रवृत्तः सदाचाररहितः नसंकरः क्रेडगोल-
कादिः नचान्तिर्हतं नसंकरइतिपाठस्तिर्हतंप्रवृत्तिसांकर्यमभर्तत्रैवीजावापादिरूपंयेनसइत्यर्थः संकरण
होमाभावप्रधानतः १२ स्वेतिदानंनित्यप्राप्तंयथाशक्तिविधिनापरद्रव्यस्यस्वीकारः प्रतिग्रहः तत्रसंयताः सं
कुचिताः निषिद्धप्रतिग्रहरहिताइत्यर्थः १३ नास्तिकः नास्तिपरलोकइतिबुद्धिमान् अनृतीअसत्यव-

नानाहिताग्निर्नायज्वानक्षुद्रोवानतस्करः काश्चिदासीदयोध्यायांनचावृत्तोनसंकरः स्वकर्मनिर-
तानित्यंब्राह्मणाविजितेंद्रियाः दानाध्ययनशीलाश्चसं[illegible]यताश्चप्रतिग्रहे नास्तिकोनानृती-
वापिनकश्चिदबहुश्रुतः नासूयकोनचाशक्तोनाविद्वान्विद्यतेक्वचित् नाषडंगविदत्रास्तिना-
व्रतोनासहस्रदः नदीनःक्षिप्तचित्तोवाव्यथितोवापिकश्चनः कश्चिन्नरोवानारीवानाश्रीमा-

वनः अबहुश्रुतइतिपाठेपि \ न्नाप्यरूपवान् द्रष्टुंशक्यमयोध्यायांनापिराजन्यभक्तिमान् ९ । घांश्राय-
चामयवार्थः अप्रसक्तः श्रीयोहिकामुष्मिकार्थसाधनासमर्थस्य वचनः अनृतइतिपाठेपिअर्थपुष्टिः १४ नेति
व्रतमेकादश्यादिव्रतं क्षिप्तचित्तइतिउन्मादादिनेतिशोकः व्यथितः आधिव्याधिपी[illegible]डितः कश्चिदिति ना-
तीनाश्रीमतीत्यस्यार्थः श्रीःशोभाकांतिः रूपंगौरत्वादि राजादशरथः तस्मिन्भक्तिःस्नेहः तदभाववान्नाभ-

प्रथमं राजानं स्वायंभुवं तस्मिन्पुरवरे इत्यादिभिर्ब्राह्मणप्रशंसा कृता इदानीं तत्क्रियादिसाधारण्येन वर्णाः प्रश-
स्यंते वर्णांश्चेति त्रिभिः पृथग्धर्मवतश्चैव पृथक्प्रोक्ता ब्राह्मणाः सत्वधर्मा येषां ते च सर्वे वर्णा इति शेषः वदान्या दान-
शौंडाः स्यादिति विश्वः सर्वत्रासन्निति शेषः ८ ब्रह्ममुखं ब्राह्मणप्रधानं तत्र वा सुवर्तीत मर्थाः शूद्राणां स्वकर्म
र ब्रतीति तदुपचाराः सेवा १९ २० योधानामिति योधयंतीति शायात् अग्निकल्पानामपेशलानां अकुटिलानां अ-

वर्णाश्चग्र्यवर्तश्चैव देवतातिथिपूजकाः कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ८ दीर्घायुषो नराः स-
र्वे धर्मं सत्यं च संश्रिताः सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ९ क्षत्रं ब्रह्ममुखं चासीद्वैश्याः क्ष-
त्रमनुव्रताः शूद्राः स्वकर्मनिरतास्त्रीन्वर्णानुपचारिणः सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता यथा
पुरस्तान्मनुना मानवेंद्रेण धीमता २० योधानामग्निकल्पानां पेशलानाममर्षिणां संपूर्णा कृत-
विद्यानां गुहा केसरिणामिव २१ कांबोजविषये जातैर्बाह्लीकैश्च हयोत्तमैः वनायुजैर्नदीजैश्च पूर्-
णा हरिहरिहयो॰

मर्षिणां कृताभिभवासहिष्णूनां कृतविद्यानां प्रयस्त्राग्रशस्त्रादिविद्यानां योधानां
संघैः संपूर्णेति योजना २१ कांबोजविषये कांबोजदेशे बाह्लीकैः तद्देशजैः बाह्लीजैरिति क्वचित्पाठः व-
नायुर्देशविशेषः हरिरिंद्रः तस्य हयः उच्चैःश्रवाः तदुपमैः नदीजैः सिंधुनदसमीपोद्भवैः २२ ॥ २२

रा॰

वा॰ टी॰

४४

हैमवते हिमवत्पर्वतजाते मातंगे गजे। २२ ऐरावतादयो दिग्गजाः। २४ भद्रे इति भद्रा मंद्रा मृगाश्चेति विज्ञेया
स्त्रिविधा गजाः। क्रमेण हिमवद्विंध्यसह्यजाः। भद्रमंद्रमृगाः त्रिविभावाः संकीर्णा गजाः। भद्रमंद्रादयो द्विस्व-
भावाः २५ नित्यं नित्ये योजने द्वयोर्योजनयोः प्रसृत संयोगे द्वितीयाम्‌ योप्रभ्याधिके सत्यनामा योध्रुमश

विंध्यपर्वतजैर्मंद्रैः पूर्णा हैमवतैरपि महान्वितैरतिबलैर्मातंगैः पर्वतोपमैः। २३ ऐरावतकुली-
नैश्च महापद्मकुलैस्तथा अंजनादपि निष्पन्नैर्वामनादपि च द्विपैः। २४ भद्रैर्मंद्रैर्मृगैश्चैव भद्र-
मृगैस्तथा भद्रमंद्रैर्भद्रमृगैर्मृगमंद्रैश्च सा पुरी २५ नित्यमत्तैः महाशृंगैर्नागैरचलसन्निभैः सा
योजने द्वे भूयः सत्यनामा प्रकाशते २६ तां पुरीं स महातेजा राजा दशरथो महान् शशास श-
मितामित्रो नक्षत्राणीव चंद्रमाः २७ तां सत्यनामां दृढतोरणार्गलां गृहैर्विचित्रैरुपशोभितां शि-
वां पुरीमयोध्यां नृसहस्रसंकुलां शशास वै शक्रसमो महीपतिः २८ इत्यार्षे रामायणे बाल॰ षष्ठः ६
तस्यामात्या गुणैरासन्निक्ष्वाकोः स महात्मनः मंत्रज्ञाश्चेंगितज्ञाश्च नित्यं प्रियहिते रताः १॥ केतसन्वथा।

नाम सा रजोमलयाम पतावत् २६ तामित्यादि [illegible] मिता [illegible] त्रिलोकान् २७ ता-
मिति [illegible] नामकपाटावष्टंभकतिर्यक्‌ स्थापित [illegible] विशेषः २८ इति श्री रामायणटीकायां षष्ठः ६ ॥ ।

अथ तस्य मंत्रिसंपदुच्यते तस्येति गुणैः अमात्यायोग्यैः गुणैर्युक्ताः इक्ष्वाकोः तद्वंशजस्य दशरथस्य गु-
णेनाहमेव रक्ताः मंत्रः कार्यविचारः इंगितमपराभिप्रायः प्रियस्य राज्ञः हिते नताः १ अष्टाविति श्लोकः अ-
मत्यस्वामिद्रोहादिरूपव्यसनतस्मात् शुचिव्यवहिताः नित्यशः आत्मप्रयोजनसमयेपि राजकार्येषु तदनुष्ठा-
नेष्वनुरक्ताः तत्पराः २ तान्नामतः आह धृष्टिरित्यादि ३ अभिमतौ ऋत्विजौ मुख्यौ ऋत्विजौ अपरे उक्ताः अथा-

अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः २ धृष्टिर्जयं
तो विजयः सुराष्ट्रो राष्ट्रवर्धनः अकोपो धर्मपालश्च सुमंत्रश्चाष्टमोर्थवित् ३ ऋत्विजौ द्वावभिम
तौ तस्यास्तामृषिसत्तमौ वसिष्ठो वामदेवश्च मंत्रिणश्च तथापरे ४ सुयज्ञोप्यथ जाबालिः का-
श्यपोप्यथ गौतमः मार्कंडेयस्तु दीर्घायुस्तथा कात्यायनो द्विजः ५ ॥

न मंत्रिव्यतिरिक्ता इत्येके
परे मंत्रिण इत्युक्तौ वसिष्ठवामदेवयोर्मंत्रित्वमपि सूच्यत इति नीर्थः तत्र मंत्रिणश्च तथेति पाठे परेषाम-
विकल्पाभेपि वसिष्ठवामदेवयोर्मंत्रित्वसद्भावमर्यादयावंगमर्यादयावालाभात् वक्तृत्वस्तथापरे इत्यस्य
ऋत्विजइत्यर्थः मंत्रिणश्चान्यवसिष्ठाद्याइतिशेषः अमात्याः देशादिकार्यनिर्वाहकाः मंत्रिणोव्यवहार-
द्रष्टार इति भेदः ४ पूर्वानेवाह सुयज्ञइत्यादिसुयज्ञऋषिविशेषः ५ एतैर्ब्रह्मर्षिभिर्नित्यं संहितास्तस्यक्र-

रा०
वा० टी०
५५

णयंदर्शिनः पौर्वकाः परंपरागता इत्यर्थः कममात्यविजो विशेषणं विद्यया सुविनीताः विद्याविनयाभ्यां संपन्ना इत्यर्थः यथायोगं वक्ष्यमाणानि विशेषणानि अग्रे तेषु मंत्रिषु च योजनीयानि ८ शास्त्रज्ञाः शास्त्रप्रतिपादकधनुर्वेदविदः प्रणिहिताः सर्वराजकार्येषु सावधानाः यथावचनकारिणः राज्ञ इति शेषः ९

मन्त्रैर्वृत्तार्थिभिर्नित्यमथर्त्विजस्तस्य पौर्वकाः विद्याविनीता ह्रीमंतः कुशला नियतेंद्रियाः श्रीमंतश्च महात्मानः शास्त्रज्ञा दृढविक्रमाः कीर्तिमंतः प्रणिहिता यथावचनकारिणः ७ तेजः क्षमा यशः प्राप्ताः स्मितपूर्वाभिभाषिणः कामात्क्रोधार्थहेतोर्वा न ब्रूयुरनृतं वचः ८ तेषामविदितं किंचित्स्वेषु नास्ति परेषु वा क्रियमाणं कृतं वापि चिकीर्षितं ९ कुशला व्यवहारेषु सौहृदेषु परीक्षिताः प्राप्तकालं यथा दंडं धारयेयुः सुतेष्वपि १० ॥

चारेणापि

कामात्क्रोधार्थहेतोरिति द्वंद्वगर्भः कर्मधारयः ८ स्वेषु मित्रेषु परेषु शत्रुषु चारेण करणेन कृतं क्रियमाणमपि वा अग्रे चिकीर्षितं च तेषां न किंचिदविदितमस्ति इति शेषः ९ सौहृदेषु विषयविषयेषु तत्तदोषगुणदोषज्ञाने नागरजन चित्तवृत्तिविशेषस्तत्र परीक्षिताः राज्ञेति शेषः प्राप्तः समयबाधकत्वं येषां कालोचितस्तं धारयेयुः कुर्युरित्यर्थः १० ॥ ११ ।

कोशसंग्रहणं च न रंगबलपरिग्रहे हेतुः अहितं स्वाहिताचरणरहितं शत्रुमपि अविद्विषकं अनपराधितं न
हिंस्युः ११ राजधान्यां नीतिशास्त्रे अनुष्ठिताः अनुसारिणः सुचीनामिति स्लेयान्तरहिताः सुचयः विषयोदे
शः १२ ब्रह्मेति अभिहूरयन्निति पादे अभावः आर्षः ततीत्सोति बलाबलं अपराधतारतम्यं शकृषस्येत्युपलक्ष

सं

कोशग्रहणे च न बलस्य च परिग्रहे अहितं वापि पुरुषं न हिंस्युरविद्विषकं ११ वीतास्नि नियतोत्साहा
राजधानीसमनुष्ठिताः सूचीनां रक्षितारश्च नित्यं विषयवासिनां १२ ब्रह्मतेजमहिंसन्त ते को
शं समभिदूरयन् ततीत्सादण्डं संप्रेक्ष्य पुरुषस्य बलाबले १३ सूचीनामेकबुद्धीनां स
र्वेषां संप्रजानतां नासीत्पुरे वा राष्ट्रे वा मृषावादी नरः क्वचित् १४ कश्चिन्न दुष्ट
स्तत्रासीत् परदाररतिर्नरः प्रशान्तं सर्वमेवासीद्राष्ट्रं पुरवरं च तत् १५ ॥

णं देशादीनां

बलाबलं संप्रेक्ष्ये
त्यर्थः देशकालवयः शक्तीः संचिन्त्यादण्डं कर्मणीतिवचनात् अयं कोशापूरणहेतुः १३ एकबुद्धीनां प
रस्परमेकबुद्धीनां संप्रजानतां पुरराष्ट्रे ज्ञातविचारयुतां तेषां विचारविषये पुरादौ मृषावादिनरगण वि
शिष्टः कोऽपि नासीत् १४ प्रतिमं जितेन्द्रियत्वात् सर्वं प्रशान्तं निर्बाधमासीदित्यर्थः १५ ॥ । ।

रा॰
बा॰ टी॰
५९

नेंद्रस्याहितार्थाः हितप्रयोजनाः सर्वज्ञमंत्रिविशेषः २९ गुरोः संबंधसामान्ये षष्ठी गुरुणो बृहस्पतेर्गुणा॰
नीचगुणैः प्राप्य जनेन गुणाश्चाहेन गुणवत्तया गृहीता इत्यर्थः तेन गुरुवत्गुरुग्रहप्रामसद्विद्यावंतो ऽनुग्रहप्रा
मसंबंधे षष्ठ्येवं च सूचितं गुणा गुणा गृहीता इति पाठे गुणादोषगृहीता इत्यर्थः बहुव्रीहौ वाहिताग्न्यादिनात्पर
निपातो निष्ठांतस्य विदेशेष्वपि सर्वतो विज्ञातवैहता बुद्धिनिश्चयाः बुद्धिसंपन्नाः प्रमितो गुणावंतः सर्वदे॰

सुवासमः स्वदेषाश्चतेच सर्वेष्वविश्रुताः हितार्थाश्च नरेंद्रस्य जाग्रतो नयचक्षुषा १६ गुरोर्गुणगृ
हीताश्च प्रख्याताश्च पराक्रमैः विदेशेष्वपि विज्ञाताः सर्वतो बुद्धिनिश्चिताः १७ प्रमितो गुणवंतश्च
नवासन् गुणवर्जिताः संधिविग्रहतत्त्वज्ञाः प्रकृत्या संपदान्विताः १८ मंत्रसंवरणे शक्ताः शक्ताः सू
क्ष्मासु बुद्धिषु नीतिशास्त्रविशेषज्ञाः सततं प्रियवादिनः १९ ईदृशैस्तैरमात्यैश्च राजा दशरथोऽनघः २० ॥

शोसर्वकालेषु गुणवंतः संधीति संध्यादिवि षयकशास्त्रतत्त्वज्ञाः प्रकृत्या त्रिगुणया संप॰
दान्विताः तत्र सात्विक्या संपदा शिष्टपालने तामस्या संपदा दुष्टनिग्रहकाले भोगकाले राजस्या संपदा॰
यत्तथा यदा सीदासर्वाविकाः षाड्गुण्यादिरूपया १८। संवरणं रक्षणं बुद्धिषु विचारेषु १९ ईदृशैः।
प्रागुक्तरूपैः अमात्यैश्च वा अक्लिष्टैस्त्रिभिः प्रतपञ्चर्णो यथा नैऋतपत्तनः इति योजना २० ॥ ॥ २० ॥

५९

वारेण स्वपरदेशावृत्तांतं प्रजाधर्मेणाप्रयुक्ता यथा भवंति तथा प्रकर्षेण रक्षयन् सर्वत्र हितैषिता २१ अतो हेतोर्वि-
क्रांताः सत्यसंगराः दृढसत्यप्रतिज्ञाः तेच प्रयोध्यायां २२ अधिगमः प्राप्तिः नताः सामंता यस्य अकंटकाः शत्रवश्चो-
राश्च २३ तैरिति मंत्रो विचारस्तत्साध्यं हितं उभयत्रा निविष्टैः कुशलैः स्वत्मार्थदर्शननिपुणैः समर्थैः तत्साध-

उपपन्नो गुणोपेतैरन्वशासद्वसुंधरां अवेक्षमाणश्चारेण प्रजाधर्मेण रंजयन् प्रजानां पालनं कु-
र्वन्नधर्मं परिवर्जयन् २१ विश्रुतस्त्रिषु लोकेषु वदान्यः सत्यसंगरः स तत्र पुरुषव्याघ्रः शशास पृ-
थिवीमिमां नाध्यगच्छद्विशिष्टं वा तुल्यं वा शत्रुमात्मनः मित्रवान्नतसामंतः प्रतापहतकंटकः स
शशास जगद्राजा दिवि देवपतिर्यथा २३ तैर्मंत्रिभिर्मंत्रहिते निविष्टैर्वृतोऽनुरक्तैः कुशलैः सम-
र्थैः स पार्थिवो दीप्तिमवाप युक्तस्तेजोमयैर्गोभिरिवोदितोऽर्कः २४ इत्यार्षे रामायणे सप्तमः ७

नयाक्तैः तेजोमयैः प्रचुरतेजोवद्भिः तेजः पराभिभवसामर्थ्यं गोभिः किरणैर्युक्त उदितोर्क इव गवामपि ते-
जोमयैर्विस्तंतसार्थिकमयुक्तं तेविशेषमाभिस्पेकेतदशृंर्क २४ इति श्रीरामायणे टीकायां सप्तमः सर्गः ७
एवं सप्तगुणस्याप्य पुत्रत्वेनाजितपितृलोकतानुत्त्रार्थं मध्यमे य प्रस्तावः तस्येत्यादि तप्यमानस्य तपः कुर्वतः

१

48

रा० बा० टी० ८

चिंतयानस्य मनगमावश्कांदसः तपमाप्यमाधातु त्रोत्पत्त्युपायं मार्गमाणस्य मवेवस्समाणा २ सनीतियष्टव्यमि तिमंत्रिभिः सहनिश्चितांमतिंकृत्वेत्यन्वयः सुमंत्रमाणायामामेतिशेषः ३ ४ ततश्त्वितिविक्रमोगमनेसर्वा न्तानयुक्त्वा समस्तान्वेदपारगान् प्रग्रंहस्य ५ सयज्ञादयोविद्यागुरवः वसिष्टस्यैवपुरोहितत्वेनोपने

तस्यत्वेवंप्रभावस्यधर्मज्ञस्यमहात्मनः सुतार्थंतप्यमानस्यनासीद्वंशकरः सुतः १ चिंतयानस्य तस्यैवंबुद्धिरासीन्महात्मनः सुतार्थंवाजिमेधेनकिमर्थंनयजाम्यहं २ सनिश्चितांमतिंकृत्वा यष्टव्यमितिबुद्धिमान् मंत्रिभिःसहधर्मात्मासर्वैरपिकृतात्मभिः ततोब्रवीन्महातेजाः सुमंत्रं मंत्रिसत्तमं शीघ्रमानयमेसर्वान्गुरूंस्तान्सपुरोहितान् ४ ततःसुमंत्रस्त्वरितंगत्वात्वरितविक्रमः समानयत्सतान्सर्वान्समस्तान्वेदपारगान् ५ सुयज्ञंवामदेवंचजाबालिमथकाश्यपं पुरोहितंव सिष्टंचयेचाप्यन्येद्विजोत्तमाः ८ तान्पूजयित्वाधर्मात्माराजादशरथस्तदा इदंधर्मार्थसहितंश्लक्ष्णं

त्वतयोपनेतृत्वेनवेदाध्यापकत्वयागुरुत्वेपिसुमंत्रादिषु व्याख्यातांसत्वतयोव्याख्यातेयमियातेनेवाध्यायनेननियोगाने षामपिविद्यागुरुत्वमस्तीति प्रश्नेप्रश्नमेवार्थविज्ञायुपपत्तः ८ धर्मेणार्थेनचसहितंश्लक्ष्णंमधुरं ०

ममेति सतार्थसतमुहिश्यलालप्यमानस्य पुनः पुनः भृशं च विलपतो राज्यादिनापि स्वावेन भवति तात
प्यमानस्येति पादे पुनः पुनर्भृशं वनयः ऊर्वेतइत्यर्थः अयमेव पाठो युक्तः ॥ एवं सतार्थे तप्यमानस्येत्युक्तेः अत
स्तदर्थं पुत्रार्थमतिरध्यवसायः ८ तदिति शास्त्रप्रोक्तेन कर्मणा विधिना केन प्रकारेणाचरणेन अहं कामं पुत्र

ममलालप्यमानस्य सतार्थेनास्ति वैस्वावं तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम ८ तदहं यष्टुमिच्छामि
शास्त्रदृष्टेन कर्मणा कथं प्राप्स्याम्यहं कामं बुद्धिरत्र विचिंत्यतां ९ ततः साध्विति तद्वाक्यं ब्राह्मणाः
प्रत्यपूजयन् वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखेरितं १० ऊचुश्च परमप्रीताः सर्वे दशरथं वचः सं
भाराः संभ्रियंतां ते तुरगश्च विमुच्यतां ११ सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयतां सर्वथा प्राप्स्यसे पु
त्रानभिप्रेतांश्च पार्थिव १२ यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता ततस्तुष्टोभवद्राजा श्रुत्वेतद्द्वि
जभाषितं १३ अमात्यानब्रवीद्राजा हर्षव्याकुललोचनः संभाराः संभ्रियंतां मे गुरूणां वचनादिह १४

इयं प्राप्स्यामीत्यत्र बुद्धिरुपायविषया विचार्यतां क्रियतां ९ तत इति प्रतिपूजास्तुतिः पार्थिवस्य मुखेरितं सामात्याद्
तास्य मेवोक्तं १० संभाराः अश्वमेधकरणोक्ताः एकविंशतिरपादिरूपाः संभ्रियंतां संपाद्यंतां ११ सर्वेति च त
थैवाभिप्रेतानमेनाभिप्रेतगुणयुक्तान् १२ धार्मिकी धर्मप्रयोजना सर्वथा प्राप्स्यसे इति प्रतिज्ञानान्स्तो १

49

॥४८॥ २

वा॰
वी॰ टी॰
५८

समर्थो नि च तः पातारसं नी ति श्रुतेः रक्षणसमर्थ श्रुतः शातराजपुत्रैर्वर्तितः सोपाध्यायः उपाध्यायप
देनप्रधानर्त्विजः प्रथममेपस्यपदे पदे जहोतीत्यकहोमनिवेदायतन्माहितेय १४ शांतयः विघ्ननिवारक।
कर्माणि वर्धिता कारमेणि [illegible] लोपः यथाकल्पं यथाक्रमं कमत्क्रकश्यते कल्पे इतिभाष्यंणि यथा।
विधिशास्त्रोक्तविध्यनाति क्रमेणाधाकाइति का क्रमसर्वेणसर्वेषामयज्ञकेनापिराज्ञाप्रयत्नः प्रादेशकोऽ।
पितेनेत्यर्थः १८ तदेवाह नेतियत्रयज्ञेकहोमतप्रायश्चित्तनाशापराधो विध्यपराधः क्रियालोपादिरूः

१५

सम्यग्याधिष्ठितश्रुत्वाः सोपाध्यायो विश्रुच्यते सरधान्मोभेरेकलेयज्ञस्भमिविधीयतां शांतयश्चापि
वर्धितो यथाकल्पं यथाविधि शक्तः प्राज्ञमयं यज्ञः सर्वेणापिमहीक्षिता १९ नापराधो भवेत्कष्टो य।
यस्मिन्क्रतुसत्तमे छिद्रं हि मृगयंते स्म विद्वांसो ब्रह्मराक्षसाः १० विधिहीनस्य यज्ञस्य सद्यः कर्ता।
विनश्यति तद्यथाविधि इत्वं मे क्रतुरेष समाप्यते १९ ॥

पोनस्मात स्यादपिसुन्य प्राप्यः मलबातियत्न
माप्नोतीन्नस वेहलभः हियतः पत्नादिषु मंत्रक्रियालोपादिना वातमवे प्राप्ने ब्राह्मणाब्राह्मणातमाविद्वांसो यत्न।
तरुताः छिद्रमपचारं मृगयंते ते चेषदपचारं दृष्ट्वा सद्य एनेषु प्रविश्यापचारयोरेसंपादयेन्तेश्वतोन्सर्वप्राप्यः २०।
किं च विधिहीनस्य यज्ञस्य कर्ता यजमानस्तत्क्षणात् संयुक्तमेघा विनश्यति तस्मात्तेनाहेतो यथाविधिय यत्नः विधिह

संशान्तिहोमकर्मणि तत्त्वेपवीणग्यमाप्यते यथाविधानं यत्नः क्रियतां १५

नन्वेवं वेदशास्त्रे संमत — द इयं तथाकरणेऽशक्तियानुष्ठानेऽप्रसमर्थाः शक्ताः इति इत्येवंप्रकारोत्साहनानिरा।
जावक्रऽसमर्थाः ते प्रतिपूजिताः मंत्रिणस्तथेत्यवदन्प्रत्यपूजयन्निति पादे वेति शेषः १९ पार्थिवेन्द्रस्यर्थे पूर्वान्व।
यि वधर्वर्धनऽस्य सपुत्राशीर्भिरिति शेषः २१ उपसंदिष्ट इति त्रियदं समित्यस्य प्राप्यतामित्यनेनान्वयः अवहे

तथाविधानं क्रियतां समर्थाः करणेऽधिति तथेति वाब्रुवन्सर्वे मंत्रिणः प्रतिपूजिताः १९ पार्थिवेन्द्रस्य
तद्वाक्यं यथापूर्वं निशम्य ते तथा द्विजास्तेथ मेजावर्धयंतो नृपोत्तमं २० अनुज्ञातास्ततः सर्वे पुनर्जग्मु
र्यथागतं विसर्जयित्वा तान्विप्रान्सचिवानिदमब्रवीत् २१ ऋत्विग्भिरुपसंदिष्टो यथावत्क्रतुराप्यतां इ
सुकानपराहेलः सचिवान्समुपस्थितान् २२ विसर्जयित्वा स्वं वेश्म प्रविवेश महामतिः ततः स गत्वा
ताः पत्नीर्नरेंद्रो हृदयंगमाः २३ उवाच दीक्षां विशत यक्ष्येऽहं सुतकारणात् तासां तेनातिकांतेन वचने
न सुवर्चसां २४ मुखपद्मान्यशोभंत पद्मानीव हिमात्यये २५ इति श्रीरामायणे बालकांडे ऽष्ट
मः सर्गः ८॥

तत्प्रयोगप्राप्तः २२ ताः पत्नीः यत्नाहीः २३ दीक्षां दीक्षा विषयदृढनिश्चयं विशत ऽकृतवर्चः कांतिः २४ मु।
खपद्मानीति रूपकं वसंतकालावच्छिन्नपद्मोपमा च २५ इति श्रीरामायणटीकायां बालकांडेऽष्टमः ८॥

50

रा॰
बा॰ टी॰
५९

एतदिति निश्चित्य मेधं सुतार्थं करिष्यामीति राजवाक्यं सुतः सुमंत्रः सहितात्तं भयधर्मो स्तोतो मंत्री च पुरावृत्तमितिहासः पुराणे च वचने स्वाधिकथ्यमानकथासंग्रहः स सूपतोस्मिन्निति ऋत्विग्भिरयमश्वमेधरूपः पुत्रोपायउपदिष्टः । मयापिमितिहासमविषयः किंचिद्विशेषविशिष्टः श्रुतइत्यर्थः तमाह सनत्कुमारादिनाकथांसर्वेस्तवाद्भविष्यद्विषयो ख्यानोभविष्यतीति ऋष्यशृंग इति ख्यातस्यमातः धाम्संवंधे इतिसाधु वनेनित्यसंवृद्धः पित्रावनेनित्यंवर्द्धितं नइत्य

२३

एतछ्रुत्वा रहः सूतो राजानमिदमब्रवीत् श्रूयतां यत्पुरावृत्तं पुराणे च मया श्रुतं १ ऋत्विग्भिरुपदिष्टो यं पुरावृत्तो मया श्रुतः सनत्कुमारो भगवान्पूर्वं कथितवान्कथां २ ऋषीणां सन्निधौ राजंस्तव पुत्रागमं प्रति काश्यपस्य च पुत्रोस्ति विभांडक इति श्रुतः ३ ऋष्यशृंग इति ख्यातस्तस्य पुत्रो भविष्यति स वनेनित्यसंवृद्धो मुनिर्वनचरः सदा ४ नान्यं जानाति विप्रेंद्रो नित्यं पित्रनुवर्तनात् द्वैविध्यं ब्रह्मचर्यस्य भविष्यति महात्मनः ५ ॥ ॥

तभिन्नवं नित्यपदेन सूचितं अत एवापि र्थः सर्वथापौनरादिक्यवतथा तर्न्हापि वयागंतव्यमित्याज्ञानुवर्तनाद्वनचरत्वं ४ नान्यमिति जानातीति भविष्यति वर्तमानसामीप्यात् पित्रनुवर्तनात् पितामहवामात् ब्रह्मचर्यस्य द्वैविध्यमेव ललाजिनादिधारणरूपं सर्वब्रह्मचर्यं यथा ऐश्वर्य तत्काममनस्त्रंयंपंरतोता तत्प्रकारद्वयमपि ग्रस्य भविष्यति द्विविधशास्त्रह्मचर्येहः स्वार्थेष्यज ५ ॥ ।

५९

लोकेस्थितमर्थं श्रुत्वान्वयिष एवं पित्रान्तादि सेवयाम मभिवर्त्तनेति भविष्यति लउ॥ उमावक्ष्यार्थः १० व्यतिक्रमात
राजो वितथर्मविलोपात् दारुणात्तवक्रकालव्यापिनात् ३ घोरत्वं सर्वराष्ट्रव्यापनात् दृष्टान्यायां जातायां ४ कृ
तेन वेदाध्ययनेन संदृष्टान् कृतकर्माणः अनावृष्टिकर कृतकर्माणः यतो भवंतो लोकव्यवहाररताः ५ ममे।
लोके प्रार्थितं राजन्नपि प्रेष्य कथितं मया तस्यैवं वर्त्तमानस्य कालः समभिवर्त्तेत ८ अग्निशुश्रूषमाणस्य
पितरं वयशालिनं एतस्मिन्नेव काले नरो नृपः प्रतापवान् २ अंगेषु प्रार्थितो राजा भविष्यति महाबलः।
तस्य व्यतिक्रमाद्राज्ञो भविष्यति सुदारुणा ३ अनावृष्टिः सुघोरा वै सर्वलोकभयावहा अनावृष्ट्यात।
मिदं दशरथं नृपं प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप १६ ततः परं तदा राजा प्रत्युवाच कृ
तांजलिः भगवन्स्वागतं तेऽस्तु किमहं करवाणि ते ७ भूयोऽपुनरिदं वाक्यं प्राजापत्यो नरोऽब्रवीत्।
राजन्नर्चयता देवानद्य प्राप्तमिदं त्वया १८।

पीमिव स्वयमावृत्य वाप्तेभ गवतो माययैवेत्यर्थः १५ दशरथं
समवेक्ष्येत्यन्वयः प्राजापत्यं प्रजापतिना प्रेषितः प्रजापालकादित्यो संभूतं नरं रूपमित्यर्थः १६ ततः प
रं प्राजापत्यं मां विद्धीति नरे उक्त्यनंतरं एवं कृत्वा नरस्व भीतः प्रतिवचनस्य वाणीं नरं निर्भय उवाचेत्यर्थः १७ दे

रा० बा
टी०
७

देवनिर्मितं देवेन प्रजापतिना निर्मितं धन्यं प्रशस्तं भार्याणां संबंधसामान्ये षष्ठी भार्याभ्य इत्यर्थः आ
नुरूप्यं माहिषी वयशःशीलगुणादिना २० हिरण्मयी हिरण्यविकारा २१ मदेतिअभिप्रदक्षिणेत्र।

इदं तु नृपशार्दूल पायसं देवनिर्मितं प्रजाकारं गृहाण त्वं धन्यमारोग्यवर्धनं १९ भार्याणा
मनुरूपाणामश्नीतेति प्रयच्छ वै तासु त्वं लप्स्यसे पुत्रान्यदर्थं यजसे नृप २० तथेति नृपतिः प्री
तः शिरसा प्रतिगृह्य तां पात्रीं देवान्नसंपूर्णां देवदत्तां हिरण्मयीं २१ अभिवाद्य च तद्भूतमद्भुतं प्रि
यदर्शनं मुदा परमया युक्तश्चकाराभिप्रदक्षिणं २२ ततो दशरथः प्राप्य पायसं देवनिर्मितं बभू
व परमप्रीतः प्राप्य वित्तमिवाधनः २३ ततस्तदद्भुतप्रख्यं भूतं परमभास्वरं संवर्तयित्वा तत्कर्म त
त्रैवान्तरधीयत २४ हर्षरश्मिभिरुद्योतं तस्यान्तःपुरमाबभौ शारदस्याभिरामस्य चन्द्रस्येव न
भोंऽशुभिः २५ सोऽन्तःपुरं प्रविश्यैव कौसल्यामिदमब्रवीत् पायसं प्रतिगृह्णीष्व पुत्रीयं त्विदमा

सर्गः २८॥

नः प्रदक्षिणं २२ वित्तं धनं २३ अद्भुतप्रख्यं अद्भुताकारं संवर्तयित्वा समाप्य कर्म पायसदानरूपं तत्रैवा
न्तरधीयत २४ हर्षरश्मिभिः हर्षोद्भूतमनःकान्तिभिः उद्योतं द्योतमानं अन्तःपुरं तदा तेहीनाते शारदं च

दृष्ट्वांशुभिर्महत्त्वात् २५|२५॥

७

कौसल्यायै इति अर्धशब्दोऽत्र समप्रविभागवाची अर्धादर्धं तुरीयांशमित्यर्थः २७ अवशिष्टार्धं अवशिष्टस्य तुरीयांशस्यार्धं अष्टमांशमित्यर्थः पुनरवशिष्टार्धमष्टमांशं २८ अनुचिन्त्येति केकय्यपेक्षया ज्येष्ठत्वं कौसल्यापेक्षया कनिष्ठत्वं च सुमित्रायां विचार्य पादोनांशार्धदानं तस्यैव कनिष्ठत्वाच्च कैकेय्या अष्टमांशदानं च तन्मात्रांशे भोगकर्मणि पक्षपातेन धर्मविभागकर्मणि एवं च भरतशत्रुघ्नौ पादस्यार्धमर्धमित्याहुः अपरे तु रामभरतौ प्रत्येकमर्धांशौ लक्ष्मणशत्रुघ्नौ अष्टमांशौ तथा हि कौसल्यायै दत्तार्धस्य अर्धादर्धं च तुर्यांश इत्यपि ।

कौसल्यायै नरपतिः पायसार्धं ददौ तदा अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः २७ कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् प्रददौ चावशिष्टार्धं पायसस्यामृतोपमं २८ अनुचिन्त्य सुमित्रायै पुनरेव महामतिः ॥

सुमित्रायै दत्तवान् कौसल्या दापित वानित्यर्थः एवं कैकेय्यै कौसल्यादत्तार्धावशिष्टमर्धं ददौ ततः कौसल्यादत्तावशिष्टस्य कैकेय्यै दत्तस्य च यदर्धं तदर्धं विचार्य पुनरपि सुमित्रायै ददौ तया दापयामासेत्यर्थः अत्रार्धपदाद्बहिर्विशेषान् द्रष्टव्यः कालिदासेन स तेजो वैष्णवं पत्न्यौ विभेजे चरुसंज्ञितं द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपं अर्चिता तस्य कौसल्या प्रिया केकयवंशजा अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः चरोरर्धार्धभागाभ्यां तामयोजयतामु

२

रा

रा॰
बा॰ टी॰
२२

सा हि प्राणयवत्सा सीता पत्नीकभयोरपीति अर्धार्धभागाभ्यामित्यस्य स्वस्वलब्धांशार्धं वा र्धार्थभागाभ्या।
मित्यर्थः इत्याशीतिविभज्येषुः कतकस्याप्येवंरीतिरेव संमतेत्याहुः कचिनश्शत्रुघ्नाप्रददोनस्य हविषोर्धेनरा
धिपः स्वयमेव सम्मकृत्वाभागंभागवतोवरः अर्धादर्धं ददौ चापि केकेय्येसनराधिपः चतुर्भागं हृत्वा हवाह।
मित्रायैददौतदेतिदृश्यपते पाठः सतसांप्रदायिकमेव तत्रहनभागजन्यस्यतत्तत्त्रैकवाक्यतोचित्येनश्र।
मेणव्याख्येवात्रज्यायसीप्रतिदानरेव्याख्यानरेवलक्ष्मणरामयोरेवभरतशत्रुघ्नयोरेवैकवाक्यतायांबीजाला।

एवंतासांददौराजाभार्याणांपायसंपृथक् २९ तास्त्वेवंपायसंप्राप्यनरेंद्रस्योत्तमाःस्त्रियः।
संमानंमेनिरेसर्वाःप्रहर्षोदितचेतसः ३० ततस्तताःप्राश्यतदुत्तमास्त्रियोमहीपते
रुत्तमपायसंपृथक् हुताशनादित्यसमानतेजसोचिरेणगर्भान्प्रतिपेदिरेतदा ३१।

म॰ उक्तं चयत्रैत्रेषुगंवभवतलत्रसत्वात्त्रिणयोरामलक्ष्मलक्ष्मणौ तथाभरतशत्रुघ्नौपायसांशावशात्स्वतइती।
तिदिक् २९ तास्त्वेतिप्राप्यप्रहर्षेणउदितंविकसितंचेतोयासांताःस्त्रियः नरेंद्रस्यसंमानं अपत्यपातेनयथोचि
तवपवहारवंमतिरेवृत्यन्वयः ३० ततइतिमहीपतेःस्त्रियइत्यन्वयः उत्तमपायसंउत्तमवंनस्यविस्फतेजःसंभृततया
तहुताशनाद्यादित्यसमानतेजसइतिगर्भाणांसीणांचतंत्रेणविशेषणं ३१ ॥ ३१ ॥ ३१ ॥

२२

ततइतिप्रतिलभ्यमानसः प्रतिलभ्यशाहुः प्रतिलभ्यस्वास्यापरः तादृशंमानसंयस्येत्यर्थः यद्वाहृणांमनोर
थाइत्यर्थः यथाभावइत्यर्थेविदिवेहरिरिंद्रइवहष्टइत्यर्थः हरेइत्यादिराजविशेषणांभगवदंशगर्भसंभवे
तैः पूजितोमनसास्तुतः ३२ इतिश्रीरामायणेषोडशः सर्गः १६ पुत्रत्वमितिगतेगंत्वमपक्रांते १ महाया
नमहायकरणसमर्थात् नत्रुकदाचिभगवान्प्रतिज्ञायापिनावतरेदतउक्तंसत्यसंधस्येतिसत्यप्र

ततस्तवराजाप्रतिवीसताखियः प्रहृष्टाभोःप्रतिलभ्यमानसः वभूवहृष्टसिदिवेयथाहरिः।
सर्वेंद्रसिद्धर्षिगणाभिपूजितः ३२ श्रीमार्षेरामायणेषोडशः सर्गः १६ पुत्रत्वंतुगतेविष्णोराज्ञस्त
स्यमहात्मनः उवाचदेवताः सर्वाः स्वयंभूभगवानिदं १ सत्यसंधस्यवीरस्यसर्वेषांनोहितैषि
णः विष्णोः सहायान्वलिनः सृजध्वंकामरूपिणः २ मायाविदश्चशूरांश्चवायुवेगसमानजवे न
यज्ञान्बुद्धिसंपन्नान्विष्णुतुल्यपराक्रमात् २ असंहार्यानुपायज्ञान्दिव्यसंहननान्वितान् सर्वास्त्रगुणा।
संपन्नानमृतप्राशनानिव प्रसवः स्त्रवस्वाच्छंगंयवर्णानतनव।

तिज्ञस्येत्यर्थः २ मायाविदः स्वसरा
हिमायासंहारसमर्थदेवमायाशक्तिमतः नवेवेगविषये २ असंहार्यानितिपवैरि तिशेषः संहननंश।
रीरंसर्वास्त्रगुणसंपन्नानसर्वाणिवाभणसामर्थ्यन्नूपगुणयुक्तान्यद्वा प्रयोगोपसंहारादयस्तद्गुणाः स्वस्म

वा.
वा. टी.
७१

वानरीणां तन्तूपवानुरीशारीरस्य हशरीरास्य प्रमुखः प्रभृति खित्यर्थः हरिरूपेणोति तस्मान्मृहूपसंपन्ना महीं
यं सत्व तेजसः उत्पत्स्यति वधार्थं तत्कृतस्य तव वानरा इति रावण विषये नन्दिकेश्वर शापादेव मुक्त तत्यपराक्र
मान्स्वस्व तत्यपराक्रमानित्यर्थः ९ तत्तु त्वयापि स्वांशाः सृष्टा इति चेत्तत्राह पूर्वमेवेति पूर्वं युगे इत्यर्थः तदुत्प
त्ति प्रकारमाह जृंभमाणस्येति सह मातत्तेण ७ एवं वक्ष्यमाण प्रकारेण ८९ वानरेंद्रमिति तनुरायव।

किं ऋक्षीणां च गात्रेषु वानरीणां तनूषु च सृजध्वं हरिरूपेण पुत्रांस्तुल्यपराक्रमान् ६ पूर्वमेव मया।
सृष्टो जांबवानृक्षपुंगवः जृंभमाणस्य सहसा मम वक्त्रादजायत ७ ते तथोक्ता भगवता तत्प्रति
श्रुत्य शासनं जनयामासुरेवं ते पुत्रान्वानररूपिणः ८ ऋषयश्च महात्मानः सिद्धविद्याधरोर
गाः चारणाश्च सुतान्वीरान्ससृजुर्वनचारिणः ९ वानरेंद्रं महेंद्राभमिंद्रो वालिनमात्मजं सुग्री
वं जनयामास तपनस्तपतां वरः १० बृहस्पतिस्त्वजनयत्तारं नाम महाकपिं सर्ववानरमुख्यानां बु
द्धिमंतमनुत्तमं ११ धनदस्य सुतः श्रीमान्वानरो गंधमादनः विश्वकर्मा त्वजनयन्नलं नाम महाकपिं म माद

महार्थं तत्राप्यवतारकरणप्रेरणात् वालिनो वतारस्य तदसद्भावात् किमर्थोयमवतार इति चेत् इंद्रभ्यादि वधा
र्थोयमवतार इति चेत् इंद्रभ्यादि वधार्थं तदा चवताराणामवश्यकत्वात् पुत्रद्वारा तस्यापि राघवसहायतार्थं इंद्रभ्या

७१

पावकस्य पुत्रः प्रख्यातिख्याततोऽधिको भवदित्यर्थः १३ रूपेति रूपलक्षणेन यस्मात्रूपसंमतो रूपवत्वेन
सर्वलोकसंमतावित्यर्थः १४ पर्जन्यः तदभिमानिनी देवता धर्मपुत्रोपदः सुषेण इति युद्धकांडे वक्ष्यति पुत्र
वरुणपुत्र उक्तः १५ वज्रसंहननं वज्रवदभेद्यं शरीरं तेनोपेतो पुत्रः १६ दशग्रीववधोद्यतास्तस्य पेभ

पावकस्य सुतः श्रीमान्नीलोऽग्निसदृशप्रभः। तेजसा यशसा वीर्यादत्यरिच्यत वीर्यवान् ॥ १३ रूपद्र-
विणसंपन्नावश्विनौ रूपसंमतौ मैंदं च द्विविदं चैव जनयामासतुः स्वयं १४ वरुणो जनयामा-
स सुषेणं नाम वानरं शरभं जनयामास पर्जन्यस्तु महाबलः १५ मारुतस्यौरसः श्रीमान्हनूमा-
न्नाम वानरः वज्रसंहननोपेतो वैनतेयसमो जवे सर्ववानरमुख्येषु बुद्धिमान्बलवानपि ते सृ-
ष्टा बहुसाहस्रा दशग्रीववधोद्यताः अप्रमेयबला वीरा विक्रान्ताः कामरूपिणः ते गजाचलसंका-
शा वपुष्मन्तो महाबलाः १८ ऋक्षवानरगोपुच्छाः क्षिप्रमेवाभिजज्ञिरे यस्य देवस्य यद्रूपं वेषो यश्च

विघ्नंतीति शेषः १७ गजाचलसंकाशाः गजसदृशाः पर्वतसदृशाश्चेत्यर्थः १८ गोपुच्छा वानरविशेषाः क्षि-
प्रमेव तत्क्षणे वै देवानां रत्यद्भुतं व्यवहितोऽन्तरकालमेव रूपं वर्णः वेषः संस्थानविशेषः १९ तस्य तत्पुत्रस्य तेन तदी-
यरूपवेषादिना समं रूपवेषादिकं पृथक्पृथगंशो कार्येणाजायत किंचिदुन्नतविक्रमाः देवावस्थातोऽपि कैं

ऋक्षीषु ऋक्षाः शर्वरीतास्वेव ऋर्थे किन्नरी किन्नरीष्वित्यर्थः एवमग्रेपि नागाः सर्पाः वंशजाः २१ नागाः सर्पाः २२ चा-
रणा देववंदिनः वनचारिणः वनवासिन इत्येकत्रपरत्र वनस्य फलभक्षकानित्यर्थः २३ २५ सर्वास्त्र-
कोविदा इति स्वयं प्रतिभात सर्वास्त्र परिहारोपाया इत्यर्थः शिलाप्रहरणा इत्युक्तेः तेषामस्त्रप्रयोक्तृत्वा।

रा. बा. टी. ७४

गोलांगूलेषु चोत्पन्नाः किंचिदुन्नतविक्रमाः ऋक्षीषु च तथा जाता वानराः किन्नरीषु च देवा महर्षि-
गंधर्वास्तार्क्ष्ययक्षा यशस्विनः २१ नागाः किंपुरुषाश्चैव सिद्धविद्याधरोरगाः बहवो जनयामासुर्हृ-
ष्टास्तत्र सहस्रशः चारणाश्च सुतान्वीरान्ससृजुर्वनचारिणः वानरान्सुमहाकायान्सर्वान्वै वनचारि-
णः अप्सरःसु च मुख्यासु तथा विद्याधरीषु च नागकन्यासु च तदा गंधर्वीणां तनूषु च कामरूपब-
लोपेता यथाकामविचारिणः २४ सिंहशार्दूलसदृशा दर्पेण च बलेन च शिलाप्रहरणाः सर्वे सर्वे प-
र्वतयोधिनः नखदंष्ट्रायुधाः सर्वे सर्वे सर्वास्त्रकोविदाः विचालयेयुः शैलेंद्रान्भेदयेयुः स्थिरान्द्रुमान्
क्षोभयेयुश्च वेगेन समुद्रं सरितां पतिं दारयेयुः क्षितिं पद्भ्यामाप्लवेयुर्महार्णवान् २८ नभस्तलं वि-
शेयुश्च गृह्णीयुरपि तोयदान् गृह्णीयुरपि मातंगान्मत्तान्प्रव्रजतो वने नर्दमानाश्च नादेन पातयेयुः

भावत विचालयेयुरित्यादौ शाकपार्थिवादित्वात् विचालनसमर्था इत्यर्थः आप्लवेयुः संतरेयुः २८ प्रव्रजतः स्वच्छंदग

शतं शतसहस्राणि कोटिरित्यर्थः २ ते प्राग्रजाः हरीणां प्रधानेषु सुख्येषु मध्ये हरियूथपा बभूवुः यूथप-
श्रेष्ठान् वीरांश्च हरीन् प्रजनयामासुरित्यर्थः ऋक्षवतः पर्वतविशेषस्य प्रस्थान सानून् उपतस्थुः प्रागेव ते स-
भ्रातरौ सुग्रीववालिनौ सर्वे च सर्वे पि उपतस्थुः केचित् सानूनां केचिन्नलादिद्वारेत्याह नलमित्यादि २२ ग्रदे

शतं शतसहस्राणि यूथपानां महात्मनां ते प्रधानेषु सुख्येषु हरीणां हरियूथपाः २० बभूवुर्यूथप-
श्रेष्ठा वीरांश्चाजनयन् हरीन् अन्ये ऋक्षवतः प्रस्थानुपतस्थुः सहस्रशः अन्ये नानाविधांश्चैलान्का-
ननानि च सूर्यपुत्रं च सुग्रीवं शक्रपुत्रं च वालिनं भ्रातरावुपतस्थुस्ते सर्वे च हरियूथपाः नलं नी-
लं हनूमंतमन्यांश्च हरियूथपान् २३ ते तार्क्ष्यबलसंपन्नाः सर्वे युद्धविशारदाः विचरंतोर्दयन्सर्वा-
न्सिंहव्याघ्रमहोरगान् महाबलो महाबाहुर्वाली विक्रमः जुगोप भुजवीर्येण ऋक्षगोपुच्छवानरा-
न् २५ तैरियं पृथिवी शूरैः सपर्वतवनार्णवा कीर्णा विविधसंस्थानैर्नानाव्यंजनलक्षणैः तैर्मेघवृंदाच-
लकूटसन्निभैर्महाबलैर्वानरयूथपाधिपैः बभूव भूर्भीमशरीररूपैः समावृता रामसहायहेतोः २७

यनशाद्दयामित्यर्थः युद्धभावशाद्धैः २४ वाली जुगोपेत्यन्वयः देवराजावतारत्वादिति भावः २५ विविधसंस्थानैः
नानाप्रकारसन्निवेशैः नानाव्यंजनलक्षणैः परस्परभेदव्यंजकतत्तल्लक्षणयुतैः २६ अचलकूटः पर्वतशृंगं यूथ-
पाधिपैः यूथपानामधिपैरित्यर्थः भीमशरीररूपैः भयजनकशरीराकृतिभिः २७ ॥ २७ ॥ ॥

२१
७६
३१
३२
व । नैरे
२५ । विपुल
ल । २६

वा॰

वा॰टी॰

७५

इति श्रीरामायणे तिलकटीकायां बालकांडे षोडशः सर्गः १६ प्रासंगिकं देवतावतारमुक्त्वा प्रकृतं प्रधानावतारमुच्यते निर्वृत्ते इत्यादि निर्वृत्ते समाप्ते पुत्रोत्पत्तिं विचिंतयन्नित्यनेन हयमेधानुवादः हयमेधे इत्यस्य पुत्रेष्टिसहिते इति शेषः १ प्रविवेश प्रवेशाभिमुखो बभूव २ मुनिपुंगवं वसिष्ठमृष्यशृंगं च ३ शुभ्राणि दशरथदत्त॰

इत्यार्षे रामायणे बालकांडे सप्तदशः सर्गः १७ निर्वृत्ते तु क्रतौ तस्मिन् हयमेधे महात्मनः प्रतिगृह्यामरा भागान् प्रतिजग्मुर्यथागतं १ समाप्तदीक्षानियमः पत्नीगणसमन्वितः प्रविवेश पुरीं राजा सभृत्यबलवाहनः २ यथार्हं पूजितास्तेन राज्ञा वै पृथिवीश्वराः मुदिताः प्रययुर्देशान् प्रणम्य मुनिपुंगवं ३ श्रीमतां गच्छतां तेषां स्वगृहाणि पुरात्ततः बलानि राज्ञां शुभ्राणि प्रहृष्टानि चकाशिरे ४ गतेषु पृथिवीशेषु राजा दशरथः पुनः प्रविवेश पुरीं श्रीमान् पुरस्कृत्य द्विजोत्तमान् ५ शांतया प्रययौ सार्धमृष्यशृंगः सुपूजितः अनुगम्यमानो राज्ञा च सानुयात्रेण धीमता ६ एवं विसृज्य तान् सर्वान् राजा संपूर्णमानसः उवास सुखितस्तत्र पुत्रोत्पत्तिं विचिंतयन् ७ ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः ८ ॥ १७॥

वस्त्राभरणादिना॰ तत्र बलानि सैन्यानि प्रहृष्टानि ४ द्विजोत्तमान् वसिष्ठादीन् ५ सानुयात्रेण समस्तसेन॰ गणसहितेन राज्ञानुगम्यमान ऋष्यशृंगः प्रययौ स्वाश्रममिति शेषः ६ सर्वान् वसिष्ठादीनपि तत्र पुरे॰

ऋतूनामिति प्रथमार्थे षष्ठी समत्ययुः समतीताः नावमिके नवम्यां तिथौ स्वार्थे ठक् ८ अदितिदैवत्ये पुन-
र्वसौ पंचसु रविभौमशनिगुरुशुक्रेषु उच्चसंस्थेषु मेषमकरतुलाकर्कमीनस्थेषु सचंद्रे गुरौ कर्कटे लग्ने
स्थिते सति ९ प्रोद्यमाने तत्र लग्ने उदयं गच्छति सतीत्यर्थः सर्वलोकनमस्कृते अस्य सर्वलोकरूपत्वा
न्मैने [illegible] नामित्यर्थः तेनादौ प्राडुर्भावसमये मात्र विराड्रूपस्य दर्शनं ततस्ताद्रूपदर्शनवि

ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ ८ नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पंचसु ग्रहेषु कर्कटे
लग्ने वाक्पताविंदुना सह ९ प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतं कौसल्याजनयद्रामं दिव्यल
क्षणसंयुतं १० विष्णोरर्धं महाभागं पुत्रमैक्ष्वाकुनंदनं लोहिताक्षं महाबाहुं रक्तोष्ठं दुंदुभिस्वनं ॥
कौसल्या शुशुभे तेन पुत्रेणामिततेजसा यथा वरेण देवानामदितिर्वज्रपाणिना १२ भरतो ना
म कैकेय्यां जज्ञे सत्यपराक्र

स्यापत्ययानमस्कृतः सन्मायया बालभावं दधाविति सूचितं १० वि
ष्णोः शंखचक्रांतेन विशिष्टस्य विष्णोरित्यर्थः अर्धं किंचिन्न्यूनमर्धमित्यर्थः शंखचक्रादेरभावादिति
भावः इत्याह्निकनिपाठः पत्नाकेति वा ॥ देवानां वरेण देवश्रेष्ठेन १२ चतुर्भागः चतुर्थो भागश्चतुर्भा
गः पायसार्धस्य चतुर्थो भागस्तद्भागाः श्रुतयेवमाताहि सोः सर्वैः गुणैः समुदितः युक्तः अस्य पाजयन्मा

बा.
बो. टी.
७९

अनेनयोवज्जन्मस्यापिविलंबमेवेतिसूचितं तदीयसर्वगुणावज्ञासूचनेनास्यापिवामपायसंशसमया
यसोशजन्मैवेवसूचितं १३ विलोरर्धेतिविलोवामस्यअर्धशद्बोभागवाचीनसमोशवाचीनेनपायसाष्ट
मांशोलग्नगणाष्टाउन्नाविनिवाध्यं १४ सार्पश्लेषाकुलीरःकर्कटःअभ्युदितेउदयस्यउच्चस्थेरसर्यःसो
मित्रौइतिद्विवचनेनतयोर्यमजत्वंसूच्यते १५ रात्रइतिपृथकगुणावंतःप्रत्येकंअनन्यसाधारणगुणावं

सातादिसोऽस्यत्रभागःसर्वैःसमुदितोगुणैः १३ अथलग्नगणाश्रुत्यौसौमित्राजनयत्सुतौ वीरौस
वीहकाशालौविलोरर्धसमान्वितौ १४ पुष्येजातस्तुभरतोमीनलग्नेप्रसन्नधीः सार्पेजातौतुसौ
मित्रौकुलीरेभ्युदितेरवौ राज्ञःपुत्रामहात्मानश्चत्वारोजज्ञिरेपृथक गुणवंतःसदृपाश्चरुच्या
प्रोष्ठपदोपमाः जगुःकलंचगंधर्वाननृतुश्चाप्सरोगणाः देवदुंदुभयोनेदुःपुष्पवृष्टिश्चखात
पतत् १७ उत्सवश्चमहानासीदयोध्यायांजनाकुलः रथ्याश्चजनसंबाधानटनर्तकसंकुलाः १८
गायनैश्चविराविण्योवादनैश्च

नः अनुरूपान्सेष्टकांतिइत्यादियोगपव्यवहारवंतः रुच्याकांत्याप्रोष्ठ
पदाइतिपूर्वाभाद्रपदोत्तरपदयोर्नामतयोश्चप्रत्येकंद्वेद्वेतारेइतिज्योतिःशास्त्रप्रसिद्धं तैत्तिरीयश्रुतिर
पिचत्वारएकसमभिकर्षदेवाःप्रोष्ठपदासइतियान्वदंतीतितदुपमाःरूपसंपन्नाः १९ जगुरितिवाचाउत्पत्तिका

गायनैः गायकैः वादकैः विराविणपः सशाह्वाः रथ्याः इति विशेषणं सर्वैरलं समन्विताः नटाद्युदेशेन तिनैः
रलैर्युक्ताः १९ प्रदेयान्या रितोषिकान् स्तुताः पौराणिकाः मागधवंशकीर्तकाः वंदिनः स्तुतिपाठकाः सं
वंधमामात्येषष्टीसूतादि संवंधियद्देयं पारितोषिकं तत्रेभ्यो ददौ वितस्त्वयः २० सूतीत्यिति यकादशाहरा
वूः सूतकांतोपलक्षणं सूत्रमथाह त्रियस्मद्वादशाहं सूतकमिति स्मृतिविरोधः स्यात् तथाचरामजन्मतस्योर

विरजोर्विपुलास्तत्र सर्वैरलं समन्विताः १९ प्रदेयांश्च ददौ राजा सूतमागधवंदिनां ब्राह्मणेभ्यो ददौ वि
त्तं गोधनानि सहस्रशः २० व्रतीत्येकादशाहं तु नामकर्म तथाकरोत् ज्येष्ठं रामं महात्मानं भरतं कैके
यीसुतं २१ सौमित्रिं लक्ष्मणमिति शत्रुघ्नमपरं तथा वसिष्ठः परमप्रीतो नामानि कृतवांस्तदा २२ ब्रा
ह्मणान्भोजयामास पौरजानपदानपि अददद्ब्राह्मणानां च रत्नौघममलं बहु २३ । सोदितेनामक

रणमकरोदित्यर्थः अस्यनिरुक्तिः पूर्वं दर्शिता श्रियः कमलवासिन्याः रमणो यं यतो हरिः तस्मात् श्रीरा
म इत्यस्य नाम सिद्धं पुरातनं सहस्रनाम सदृशं स्मरणान्मुक्तिदं [illegible] णामिति पाद्मेउक्तं २१ ना
मानि कृतवान् नामकरणमकारयदित्यर्थः वर्तमानसामीप्ये लट् अतं भावितार्थं ताचयत्न कृतकेन शौनो
नामकरणादावनधिकार इत्युक्तं अकरोदित्यत्र च पुरोहितद्वारेति शेषः षष्ठेरणं कृततत्र मानांचित्य २२ ब्रा।

स्नानान् भोजयामासेति नानायेतिशो यांः वर्णकृत्मा तदृष्टैकतिभिः
प्र. २३ ॥

78

रा०
बा० टी०
११

जन्मक्रियादीनि तदादुपनयनांतानीत्यर्थः अकारयत वसिष्ठेनेति शेषः केतुः स्वकुलध्वजः सयथा।
अमतानादिकीर्तिं ख्यापयति एवं इक्ष्वाकुकुलवैभवप्रकाशकः रतिः प्रीतिः २४ स्वयंभूर्हिरण्यगर्भः स
पवस्य वेधा इव संमतः २५ ज्ञानोपसंपन्नाः तत्त्वज्ञानसंपन्ना इति केचित् गुणैः सत्यवादित्वादिभिः

तेषां जन्मक्रियादीनि सर्वकर्माण्यकारयत् तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः २४ बभूव।
भूयो भूतानां स्वयंभूरिव संमतः सर्वे वेदविदः शूराः सर्वे लोकहिते रताः २५ सर्वे ज्ञानोपसंप।
न्नाः सर्वे समुदिता गुणैः तेषामपि महातेजा रामः सत्यपराक्रमः २६ इष्टः सर्वस्य लोकस्य शशांक।
इव निर्मलः गजस्कंधेऽश्वपृष्ठे च रथचर्यासु संमतः २७ धनुर्वेदे च निरतः पितुः शुश्रूषणे रतः बा।
ल्यात्प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्धनः २८ रामस्य लोकरामस्य भ्रातुर्ज्येष्ठस्य नित्यशः सर्वप्रि
यकरस्तस्य रामस्यापि शरीरतः २९ लक्ष्मणो लक्ष्मिसंपन्नो बहिःप्राण इवापरः न च तेन विना।
निद्रां लभते पुरुषोत्त

तेषामिति निर्धारणे षष्ठी रामः सर्वस्य इष्ट इति शेषः २६ इष्टः सर्वस्येत्यादि ग्रन्था
कथने पौनरुक्त्यं दोषाय रथचर्यासु रथेन विचरणप्रकारेषु २७ लक्ष्मिवर्धन इति ह्रस्वत्वमार्षः २८ रामस्य स्वाप्ति
स्य इति प्राकृतेनान्वयः स्वभावादेव पितुस्तथा नमस्य रामस्य प्रियंकरः २९ रामस्य अपरः बहिः संचरन् प्राण

११

मगयांश्चाविटमुदिश्येत्यर्थः २१ परिपालयन्रामशरीरमितिशेषः अनेनलक्ष्मणस्यभक्त्यातिशयउ॰
क्तः हियतः शत्रुघ्नोलक्ष्मणावरजोतोरामावरजस्यभरतस्यप्रियइतिशेषः रामलक्ष्मणाविवभरतशत्रुघ्नो॰
परस्परप्रियावित्यर्थः २२ तस्यशत्रुघ्नस्यभरइतिशेषः तथातस्यशत्रुघ्नःप्रियआसीत् २३ दैवैःचतुर्भि

मृष्टमन्नमुपानीतमश्नातिनहितंविना यदाहिहयमारूढोमृगयांयातिराघवः २१ अथैनंपृ
ष्ठतोभ्येतिसधनुःपरिपालयन् भरतस्यापिशत्रुघ्नोलक्ष्मणावरजोहिसः २२ प्राणैःप्रियतरोनि
त्यंतस्यचासीत्तथाप्रियः सचतुर्भिर्महाभागैःपुत्रैर्दशरथःप्रियैः २३ बभूवपरमप्रीतोदेवैरिव
पितामहः तेयदाज्ञानसंपन्नाःसर्वेसमुदितागुणैः २४ ह्रीमंतःकीर्तिमंतश्चसर्वज्ञादीर्घदर्शि॰
नः तेषामेवंप्रभावाणांसर्वेषांदीप्ततेजसां २५ पितादशरथोहृष्टोब्रह्मालोकाधिपोयथा ते॰
चापिमनुजव्याघ्रावैदिकाध्ययनेरताः २६ पितृशुश्रूषणरताधनुर्वेदेचनिष्ठिताः अथराजाद॰

र्दिक्पालैः यद्वावसुरुद्रादित्यविश्वेदेवैः तेसर्वेरामादयः गुणैःसमुदितायुक्ताआसन्नितिशेषः २४ ए॰
वंप्रभावाणांप्राग्युक्तप्रभाववतांलाभेनेतिशेषः पितामहइवहृष्टस्तनयः २५ वैदिकाध्ययनेवेदसंबंध्यध्य॰

रामायणेबालकांडे

दारक्रियाविवाहः कुमारस्यविशालाक्षंपांडुतांमुखमाददे कपोलतलसंलीनपाणिः पद्मासनास्थितइत्या।
वा.
दियोगवासिष्ठोक्तरीत्यासंसारासारत्वदर्शनेनजातानांमुखपांडुतादीनांकामुकत्वसंभावनयाविवाहक्रिया
बा. टी.
चिंतनमितिबोध्य ३० सोपाध्यायःसपुरोहितः २८ ३१ कौशिकंकौशिकगोत्रं पर्युपविवेशापत्रामा।
७८

चिंतयामासधर्मात्मासोपाध्यायःसबांधवः तस्यचिंतयमानस्यमंत्रिमध्येमहात्मनः ३८ अभ्याग
च्छन्महातेजाविश्वामित्रोमहामुनिः सराज्ञोदर्शनाकांक्षीद्वाराध्यक्षानुवाचह ३९ शीघ्रमाख्या
तमांप्राप्तंकौशिकंगाधिनःसुतं तच्छ्रुत्वावचनंतस्यराज्ञोवेश्मप्रदुद्रुवुः संभ्रांतमनसःसर्वेतेनवा।
क्येनचोदिताः तेगत्वाराजभवनंविश्वामित्रमृषिंतदा प्राप्तमावेदयामासुर्नृपायेक्ष्वाकवेतदा तेषां।
तद्वचनंश्रुत्वासपुरोधाःसमाहितः ४२ प्रत्युज्जगामसंहृष्टोब्रह्माणमिववासवः सदृष्ट्वाज्वलितंदी
(प्त्यातापसंसंशितव्रतं ४३

तद्द्वाराध्यक्षाःराजवेश्मनत्वरयाप्रविविशुः तदागमननिवेदनायेतिशेषः ४०
संभ्रांतमनसःत्वरितचित्ताः तेननरीयेनविश्वामित्रसंबंधिना ४१ इक्ष्वाकवेतद्वंशजनामाख्यं समाहि
तःएकाग्रचित्तः ४२ ब्रह्माणंब्रह्मर्षिदेवानांब्रह्मेत्यिष्कृतेः संशितव्रतंतीक्ष्णनियमं ४३ ॥ ॥।

ऽपहारयदिति वसिष्ठेनेतिशेषः अत्र भावग्रार्थः राज्ञो ऽर्थे राजप्रेरणया वसिष्ठेनानीतं ५४ कुशलपदं अना
मयोपलक्षणं तत्र वंधुमनामयमिति स्मृतेः अव्ययं वृद्धिं ५५ अनर्विशिष्य पृच्छति कुशलमिति विशेषप्र
कारमाह अपि ते इति अपिः प्रश्ने एवमग्रेपि सामंताः सन्नताः नम्राः अपि ते रिपवो जिताः ५६ अपि दैवं कर्म
होमदेवतार्चनादिकं मानुषं कर्म साम भेदादिकं राजप्रेरिता अर्थे राज्ञस्तेन प्रयुक्तमतो राज्ञे ऽनामयादि पृष्ट्वा

प्रहृष्टवदनो राजा ततो ऽर्घ्यमुपहारयत् स राज्ञः प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा ५४।
कुशलं चाव्ययं चैव पर्यपृच्छन्नराधिपं पुरे कोशे जनपदे बांधवेषु सुहृत्सु च ५५ ॥
कुशलं कौशिको राज्ञः पर्यपृच्छत्सुधार्मिकः अपि ते सन्नताः सर्वे सामंता रिपवो जिताः
५६ दैवं च मानुषं चैव कर्म ते साध्वनुष्ठितं वसिष्ठं च समागम्य कुशलं मुनिपुंगवः ५७

ततो वसिष्ठेन समागम्यालिंगनादिकं वा कुशलमित्यस्य पप्रच्छेति शेषः अनेन राजपुरोहितत्वकृतः पूर्व।
स्पर्धयैव वर्धमानो वसिष्ठस्य विश्वामित्रकृतः सूचितः वसिष्ठश्च समागम्य प्रहसन्मुनिपुंगवः यथार्हं पूज
यित्वैनं पृच्छ कुशलं तदेति क्वचित्पाठः तत्र पूर्वे वैमनस्यं धमानोपि मद्राजसन्निधावागत इति हासः ५७ ॥

ऋषीन्वामदेवादीन् यथान्यायं संगम्य कुशलं चोवाच अत्र वामदेवादिभिः स्वस्थानस्थैरेव समागम्य स्वकार्यं॥
सिद्ध्येतान् गृहीत्वैव ते स्वयं वा राजसदनं विविशुरित्यन्वयः ४८ पूजितास्तेन राज्ञेति शेषः ४९ परमोदा
रः परमदाता हृष्टः पुलकितः अनूदके इत्यार्षं दीर्घत्वं ५० सदृशदारेषु जातिवयोरूपगुणतुल्येषु प्रणष्टस्य।

ऋषींश्च तान्यथान्यायं महाभागानुवाच ह ते सर्वे हृष्टमनसस्तस्य राज्ञो निवेशनं ४८।
विविशुः पूजितास्तेन निषेदुश्च यथार्हतः अथ हृष्टमना राजा विश्वामित्रं महामुनिम् ४९
उवाच परमोदारो हृष्टस्तमभिपूजयन् यथामृतस्य संप्राप्तिर्यथा वर्षमनूदके ५० यथा
सदृशदारेषु पुत्रजन्माप्रजस्य वै प्रणष्टस्य यथा लाभो यथा हर्षो महोदयः ५१ तथैवाग
मनं मन्ये स्वागतं ते महामुने कं च ते परमं कामं करोमि किमु हर्षितः ५२ पात्रभूतोसि मे ब्र
ह्मन् दिष्ट्या प्राप्तोसि मानद।

निधानादेरिति शेषः महापुत्रजन्माप्युत्सवः तस्मादुदयो यस्य स हर्षः ५१।
यथा तथा ते आगमनं मन्ये अत्र स्वकार्यहर्षसाहचर्यस्यागमनेऽनुक्तत्वात् वा आगमनजहर्षस्यातिशय्यत्वं व्यज्यते स्वागतं ते
इति भिन्नं वाक्यं च परं कं कामं किमु केन प्रकारेण करोमि करिष्यामीत्यर्थः वर्तमानसामीप्ये लट् ५२ पात्रभूतः सर्वसे.

पूर्वं मितिराजर्षिणा हृत्साधकेन तपसा पूर्वं प्रतिपादितकान्तिमान् ५४ अनुपश्चात् ब्रह्मर्षित्वसाधके न तपसा ब्रह्मर्षित्वं प्राप्नोति मया बहुधा प्रकारेण राजर्षिब्रह्मर्षिप्रकारेण पूज्योसीत्यन्वयः तदितिपरमेश्य। चित्रमिदं तवागमनं यन्मम पुरेः भूत् तदद्भुतमतपाख्यं येमित्यर्थः ५५ हे प्रभो तव संदर्शनात् शुभते जंमकल्याणाभावविशिष्टसकलशुभसाधनपुण्यपदे हे गतः प्राप्तवान् तेन सफलजन्मतावधृतिता

यस्माद्विप्रेन्द्र मद्दाहं सुप्रभातानिशा मम पूर्वं राजर्षिशब्देन तपसा द्योतितप्रभ! ५४ ब्रह्मर्षित्व मनुप्राप्त! पूज्योसि बहुधा मया तदद्भुतमभूद्विप्र पवित्रं पेवमं मम ५५ शुभस्ते वागतश्चाहं तव। संदर्शनात्प्रभो ब्रूहि यत्प्रार्थितं त्वं मत्कार्यं मामागमनं प्रति ५६ इच्छाम्यनुगृहीतोहं त्वदर्थं परिवृद्धये कार्यस्य न विमर्शो वा गंतमर्हसि सुव्रत ५७ कर्ता चाहमशेषेण दैवतं हि भवान्मम मम चाय मनुप्राप्तो महानभ्युदयो द्विज ५८ ॥

इदं पादीमं कौनेयहे त्वमित्यभिधी

पूते इति भगवद्गीतोक्तेः ब्रूहीति। तथ्यमिति विष्णुर्थे चतुर्थी ते यत्कार्यं प्रति यत्कार्यार्थं मामागमनं त्वया प्रार्थितं सत् ब्रूहि कथय ५६ स्वामिम न कार्ययोगेनमनुगृहीतो हं त्वत्प्रयोजनपरिवृद्धिनिष्पत्तिकर्त्ते मिव्यामिविमर्शो करिष्यामि संदेहं ५७ त अहेत्वमारदेवतं हीनितत्पुनः संदेहं इत्याह मम चेति तवागमनजः कृत्स्नोधर्म! मम महानभ्युदयः प्राप्तः हर्षा

स्यस

इतीति यतो हृदयसुखं श्रुतमेव कृतिसत्त्वं आत्मवता तात्सार्थीनेनाविनीतं विनयप्रयुक्तं प्रथिते गुणैः त्रिशंकु
स्वर्गारोहणादिभिः यशो यद्गुणैः शमदमादिभिः परमर्षिः अहत्यकरतिप्रकृति[illegible]भावः ५९ इति
बालकांडे अष्टादशः सर्गः १८ तदितिश्रुत्वाद्भुतविस्तरं दैवतं हि भवान्ममेत्याशुक्तिरूपमाश्चर्यप्रयेवं ।

तदागमनजः सत्तोयमेश्वान्तमोद्विज इति हृदयसुखं निशम्य वाक्यं कृतिसुखमात्मवता । १
विनीतमुक्तं प्रथितगुणयशा गुणैर्विशिष्टः परमऋषिः परमं जगाम हर्षं ५९ इत्यार्षे रामायणे
बालकांडे अष्टादशः सर्गः १८ तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरं हृष्टरोमा महातेजा
विश्वामित्रोऽभ्यभाषत सदृशं राजशार्दूल तवैव भुवि नान्यतः महावंशप्रसूतस्य वसिष्ठव्यपदे-
शिनः २ यत्तु मे हृद्गतं वाक्यं तस्य कार्यस्य निश्चयं कुरुष्व राजशार्दूल भव सत्यप्रतिश्रवः अहं नि-
यममातिष्ठे सिद्ध्यर्थं पुरुषर्षभ तस्य विघ्नकरौ द्वौ तु राक्षसौ कामरूपिणौ ४ व्रते तु बहुशश्चीर्णे
समाप्त्यां राक्षसाविमौ मारीचश्च सुबाहुश्च

पूतत्वं वैवसदृशं नान्यतः नान्यस्य तत्र हेतुगर्भविशेष
णं महावंशे त्यादि वसिष्ठव्यपदेशिनः वसिष्ठनियोगवर्तिनः २ यन्निवितस्य तस्यानि पापस्य कार्यस्य निश्चयं क
तेव्यनिश्चयं मद्वेद्याकार्ये विश्वामीत्यगीकारं कुरुष्व कांत्वा च सत्यप्रतिश्रवः सत्यप्रतिज्ञो भव २ अहमिति सिद्ध्यर्थं या

नियमनिश्चये व्रतसंकल्पे प्रवृत्ते तस्मिन्न तत्संकल्पविषये यज्ञे वत यथाभूते नापि नेष्यति ८ कृतश्रमः क्रे
न तथा प्रयासः प्रतपवनिकृत्साहः तस्मादेषा दयाक्रमे निर्गतोस्मि न तु भवद्भिः शापेनैव कृतस्तोनना।
पितमेतत्त्राह नवेति क्रोधमन्त्वहं प्रामे २ तत्रहेतुमाह तथाभूतेति पापादिप्रवृत्त्यनर्हत्वर्थः व्रतः सप्तु
त्रमित्यादि ८ बालानां कपोलसमीपशिखाकाकपक्षः नत्वप्रनेन बालेन किं करिष्यतीत्यत्राह शाक्रस्था
दि मयापि तस्यानीयेन निषेधः दिव्यं तेजो वैलवं तेन युक्त इति शेषः ५ विकर्तारः विघ्नकर्तारः तेषां वि
नोमांसरुधिरोद्रेणावेदितां मध्ववर्षतां प्रवृत्ते तथाभूते तस्मिन्नियमनिश्चये ६ कृतश्रमोनि।
कृत्साहस्तस्मादेषा दयाक्रमे नवमे क्रोधश्च तस्य वृद्धिर्भवति पार्थिव ७ तथाभूता हि सा चर्यानशा।
एतत्त्वविघ्ने सपुत्रं राजशार्दूल वा मे सत्यपराक्रमं काकपक्षधरं वीरं ज्येष्ठं मे दातुमर्हसि शाक्रो ३
हिषमयाग्रमोदिवीन स्वतेजसा रात्रसायविकर्तारस्तेषामपि विनाशने श्रेयश्चास्मै प्र। ६
नाशनेपिशक्तः किं पुनर्मेघतरत्नणामारीव सवाङ्गसेनाभिप्राधेण तेवामि दास्यामि बहुरूपेन संशा
निवद्धवचनेनात्तोदानप्रेरोचनायाह श्रेयश्चेति बहुरूपं प्रसदानविचारादिरूपं सत्त्वपांडुत्वादि विवतेकं बहु
रूपं विपुलतरं परमार्थरूपं च श्रेयश्चात्मस्वरूपं प्रदास्यामि वसिष्ठ द्वारा तापयिष्यामीत्यर्थः रामस्य शुद्धसत्त्वस्य।
भावने पिलोकानां बोधनमेव रामबोधनस्य फलं सनत्कुमारशापवशात्तिरोहितस्य ज्ञानस्य ११ ॥

वा.

वा. टी.

८।

प्रादुर्भूतं तस्य फलमिति वोध्यं तदुक्तं मादित्यपुराणे विज्ञानमेतदखिलं विश्वाकारमवृहद्भयः पश्यंति तत्त्वे

कमात्मस्वरूपमिदं जगत् इति वसिष्ठेन रामाय कथितं पुरेति स्कांदे प्रतिपादितोक्तेः योगवासिष्ठे च स्फु

टमेतद्दृश्यते त्रयाणामित्यादि श्रवेत्रेय यस्य विलपुराणे द्वितीयेंशे तन्मत्वं प्रणतायतं यच्छ्रेयः परमं द्वि।

ज तदशेषविज्ञानं जलवीज्युदाधि भर्वानिति राजप्रश्ने पुत्रस्वर्गादीनामापेक्षिकश्रेयस्त्वेपि परमार्थरूप।

श्रेयस्त्वमित्युक्त्वा एको व्यापी रामः शुद्धो निर्गुणः प्रकृतेः परः जन्मवृद्ध्यादिरहित आत्मा सर्वगतो व्ययः।

वंतानमयो मद्भिर्नामजात्यादिभिर्विभुः न योगवान्न युक्तोभूत्वेव पार्थिवयोस्यते तस्यात्मपरदेहेषु सतोपि

त्रयाणामपि लोकानां येन व्याप्तिं गमिष्यति नवनीरामममास्याधशक्तौ स्यात्कथंचन ॥ १ ॥

कपरिहितत्वविज्ञानं परमार्थो सा विविज्जदुभरतो ह्यात्मस्वरूपमेव परमार्थश्रेयस्त्वेन दर्शितं तथा तत्रैव।

आत्माध्येयः सदा भूप योगयुक्तैस्तथा परं श्रेयस्तस्यैव संयोगः श्रेयो यः परमात्मनेति उक्तं प्रचलदकोतरे तथा

जीवपरमात्मनोर्यः संयोग उपाधिविगमरूपः स परं श्रेय इति तदर्थः विभेदजनके ज्ञाने नाशमात्यंतिकं गते।

ते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यतीति प्रचलदकोंतरोक्तेः परमात्मनोर्योगः परमार्थ इतीयते मिथ्यैव

यदन्यद्व्यैनेति तद्व्याख्यातायत इत्युक्तेश्च सर्वथा भेदेपेकारूपो योगः केश्चिच्छक्यते नेष्यते तान्मिथ्यैवेति तदर्थः श्र

पेवं विध्रुवानिः श्रयमामानं इति तेनैवोक्तं वाच्येनलं ॥ त्रयाणामपि विधिवत्यैः येन मदत्रात्मा न्हि ज्ञातमायस्पर्द्धः

त

८।

नचेतितत्रेतेनमाह वीर्येत्यादिरामस्ततर्हिकथंतस्यादिमत्राह कालेति १२ रामस्यरामवीर्यस्यपुत्रगतंस्नेह।
विषयंरामेश्वतिशेषः नायंतवपुत्रः किंतर्हिदिव्यमेतत्तेजइतितात्पर्यं १३ नत्वहेतेनमाह अहमितिहतावितिभ
तप्रमयेनवयस्पस्तकरंतंयन्मतेरामंनिरतिशयदेभवविस्लतेजोंशावतारहूपं १४ सन्नानेसंवादमाह वसिष्ठो।

नचतौराघवादन्योहंतुमुत्सहतेप्रभो वीर्योत्सिक्तौहितौपापौकालपाशवशंगतौ ११ रामस्यराज
शार्दूलनपर्याप्तौमहात्मनः नचपुत्रगतंस्नेहंकर्तुमर्हसिपार्थिव १२ दशरात्रस्तयत्तस्यतासिन्नामे
णाराक्षसौ हंतव्यौविघ्नकर्तारौममयज्ञस्यवैरिणौ १४ अहंतेप्रतिजानामिहतौतौविद्धिराक्षसौ अ
हंवेद्मिमहात्मानंरामंसत्यपराक्रमं वसिष्ठोपिमहातेजायेचेमेतपसिस्थिताः यदितेधर्मला
भंतयशश्चपरमंभुवि १५ स्थिरमिच्छसिराजेंद्ररामंमेदातुमर्हसि यद्यभ्यनुज्ञांकाकुत्स्थददते। ॥२॥
तवमंत्रिणः १६ वसिष्ठप्रमुखाःसर्वेततोरामंविसर्जय अभिप्रेतमसंसक्तमात्मजंदातुमर्हसि

पीत्यादिरितेयेवंविद्धितिशेषः नेदनित्वमित्यर्थः धर्मलाभंपरमंयशश्चयदिस्थिरमिच्छसीत्यन्वयः तेनरा
मदानेनतवापिफलदमित्याशयः १५ मेममह्यंकिंचमंत्रिणांसंमतेपिदातुमर्हसीत्यादि अभ्यनुज्ञांवामदानवि
षयकानुमतिं १६ ततःतदाअभिप्रेतंममेष्टंतवचअसंसक्तंअप्रतीतवाल्यत्वात् मातापितृसक्तिरहितंईश्वरत्वा

नापि श्रान्तिचिरविप्रयोगस्ते पुत्रेणोत्पादद्दशेति यत्तसंबंधि दशसाहस्रात्मकः कालपर्व रामसमपेत्तत इति शेषः हे
राघव समग्रं यं यत्तस्य कालः यथोक्तकालेनात्येति नातिक्रामति तेनाधिको विलंबो न भवतीत्यर्थः १८ तथेति
श्रुत्वापि एवं श्लोकं त्वा यथं श्राहत्या संबध्यते एवं च हे राघव समायं यत्तस्य कालो नात्येति नातिपतेत् तथाकुरु
क्षेमन्वयः धर्मो ॥१९ २० चलनं कंपः ततोत्थायेति ब्रांदसं व्यषीदत ॥ यं सहितं प्रयोरामस्याह्लादिलाभहूप

दशरात्रं हि यत्तस्य रामं राजीवलोचनं नात्येति कालो यत्तस्य यथायं मम राघव १८ तथा कुरुष्व
भद्रं ते मा च शोके मनः कृथाः इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः १९ विरराम महातेजा ।
विश्वामित्रो महामतिः सतन्निशम्य राजेन्द्रो विश्वामित्रवचः शुभं २० शोकेन महताविष्टश्चचाल च
सुमोह च लब्धसंज्ञस्ततोत्थाय व्यषीदत भयान्वितः २१ इति हृदयमनोविदारणं मुनिवचनं
तदतीव शुश्रुवान् नरपतिरभवन्महान्महात्मा व्यथितमनाः प्रचचाल चासनात् २२ ॥

[margin: ॥ २२ ॥ (vertical marginal text, illegible)]

स्यैवंभयान्वितः इत्तोनिमित्तपुत्रवियोगभयान्वितः २१ इतीति अतीव श्रुत्य र्थे हृदयस्य हृदयं पुत्रश्री
कवन्मात्मनः मनसोंतःकरणस्य च विदारणं पीडाजनकं शुश्रुवान् श्रुतवान् महान्नरपतिः सार्वभौम इति या
[illegible] प्रचचाल

इतिश्रीरामायणटीकायामेकोनविंशः सर्गः ।१९ तदितिनिःसंज्ञइवरामेप्राकृतमनुष्यावात्तसेभ्योभ
यंभावनयादानप्रतिज्ञयावप्याकुलतामुपस्थितइत्यर्थः ततःसंज्ञावानागतमन्युरिदंवचमात्मानमब्रवीत् ।
ऊनेतिकिंविहनानिषोडशवर्षाणियस्यसः इदंवचमुद्दोगपत्रप्रतिपादकंषोडशवर्ष तत्रियकमावपव
कववप्रयोगुद्दाहंउतिशान्तादितिकतंकेतः अन्येतुऊनषोडशवर्षःशाहुसद्वादशवर्षइत्यर्थःमागतस्यराम
स्यवयोविशेषमुदिष्टपवालोद्वादशवर्षीयमकृतासम्पराप्यवरन्यारण्यकांडेरावणंप्रतिमारीचोक्तेरित्याहुः

इतिवालकांडेएकोनविंशःसर्गः ।१९ तच्छ्रुत्वाराजशार्दूलोविश्वामित्रस्यभाषितं मुहूर्तमिवनिःसंज्ञः
संज्ञावानिदमब्रवीत् ।ऊनषोडशवर्षोमेरामोराजीवलोचनः नयुद्धयोग्यतामस्यपश्यामिसहरा
क्षसैः २ इयमक्षौहिणीसेनायस्याहंपतिरीश्वरः अनयासहितोगत्वायोद्धाहंतैर्निशाचरैः २ ॥

ग्राप्ये वालोषोडशवर्षीयमित्येवपाठोरावणस्यभयातिशयार्थंवामारीचस्यानुक्तिः साइतिकतका।
शयः इयमितिप्रकारश्योगजस्थैकोनराः पंचपदातयः त्रयश्चतुरगास्तैः पत्तिरित्यभिधीयते पत्तिस्त्रि
गुणामेकेविदुः सेनामुखंबुधाः त्रीणिसेनामुखान्येकोगुल्मइत्यभिधीयते त्रयोगुल्मागणोनामवाहिनी
गणास्त्रयः स्मृतास्तिस्रस्तुवाहिन्यः पृतनेतिविचक्षणैः चमूस्तुपृतनास्तिस्रस्तिस्रस्त्वनीकिनी अ
नीकिनीदशगुणांप्राहुरक्षौहिणींबुधाइतियस्याहमितिसं— पिवार्थः पतिःपालकः ईश्वरःस्वामीयोद्धेत्य

षगोप्तायस्येतिशेषः प्राणान्परिष्यामिनोविष्यामीत्यर्थः ५८ रामगमनेउपपतिमाहवालइत्यादि।
कनघोरधार्चर्षतादेववालवद्यवहारः स्नेहातिशयेनचतेनेवश्रुतविषयव्यवहारः अन्यथासर्वेवेदवे
दाःभृताः सर्वेत्तानोपसंपन्नाइतिपूर्वोक्त्याविरोधःस्यात २ नचेतिरत्तसामित्यस्परत्तोइतिशेषःकूटकप।

इमेशूरात्मविक्रांतानभ्रत्यामेप्रविशारदाः योग्पारत्तोगतोयोंदुंनरामंनेतुमर्हसि ४ अहमेवध
नुष्पाणिगोप्तासमरमूर्धनि यावत्प्राणान्धरिष्यामितावत्योत्स्येनिशाचरैः ५ निर्विघ्नाव्रतचर्या
साभविष्यतिसुरक्षितातत्रअहंतत्रगमिष्यामिनरामंनेतुमर्हसि ६ वालोह्यकृतविद्यश्चनचवेत्तिब
लावलं नचास्त्रवलसंयुक्तोनचयुद्धविशारदः ७ नचासौरक्षसांयोग्यःकूटयुद्धाहितेरक्षसः विप्र
मक्तोहितामेरामंमुहूर्तमपिनोत्सहे ८ जीवितुंमुनिशार्दूलनराम्नेतुमर्हसि यदिवाराघवंब्रह्मनेतुमि
च्छसिसुव्रत ९ चतुरंगसमायुक्तंमयासहचतंनय षष्टिवर्षसहस्राणिजातस्यममकौशिक १० कृ
च्छेणोत्पादितश्चायनरामंनेतुमर्हसि चतुर्णामात्मजानांहिप्रीतिःपरमिकाममं ज्येष्ठेधर्मप्रधाने
चनरामंनेतुमर्हसि ॥

दंकूटयंदरामनयनेवाधकमप्याहविप्रेत्यादि ८ उक्तानुपपत्तिपरिहारायाहयदिवे
ति ९ इतोप्युक्तरामनयनमयुक्तमित्याह षष्टीति प्रतीतानीतिशेषः १० कृच्छ्रेणाकृःखेनकाचितडःखेनेत्येव
पाठः यत्नदीवालितलयेनतपरमिकाप्रतिपाधितातत्रिकः चतुर्णामितिनिर्धारणषष्ठीतेषांमध्येइअक्षि

श्रीन्यासि केयुकारणमाह ज्येष्ठ इति अनेन राज्यस्योपनाधनिनाधर्मप्रधाने विभुप्रहवार्थेश्वर्थमाथीनु।
ऽप्रहमिकेराक्षसेषुदेहिवालिकनाशासंभावनयाराज्यविच्छेदएवभवेत् धर्मेणप्रजापालनंचनान्यता
निर्वहेत् अनेनारामोनेनतमयोग्यः अग्रारामनयस्यसर्वथाअयोग्यत्वंप्रतिपादयितुंरक्षः स्वरूपंपृच्छतिकिं।

किंवीर्याराक्षसास्तेवकस्यपुत्राश्चकेचते १२ कथंप्रमाणाःकेचैतान्रक्षंतिमुनिपुंगव कथंचप्रतिक
र्तव्यंतेषांरामेणरक्षसां १३ मामकैर्वाबलैर्ब्रह्मन्मयावाकूटयोधिना सर्वमेशंसभगवन्कथंतेषां
मयारणे १४ स्थातव्यंदुष्टभावानांवीर्योत्सिक्ताहिराक्षसाः तस्यतद्वचनंश्रुत्वाविश्वामित्रोऽभ्यभा
षत १५ पौलस्त्यवंशप्रभवोरावणोनामराक्षसः सब्रह्मणादत्तवरस्त्रैलोक्यंबाधतेभृशं
१६ महाबलोमहावीर्योराक्षसैर्बहुभिर्वृतः श्रूयतेचमहाराजरावणोराक्षसाधिपः साक्षाद्वै
श्रवणभ्राताप्रपुत्रोविश्रवसोमुनेः १७ ॥ वीर्याइतिकेचतेकिंनामानः १२ कथंप्रमाणाःकी
दृक्शरीरप्रमाणाः रक्षंतिहिंसंतिवेनेतिशेषः प्रतिकर्तव्यंप्रतिविधेयंसंहारःकथंकर्तव्यइत्यर्थः १३
मयावेत्यत्रप्रतिकर्तव्यमित्यनुषंगः १४ स्थातव्यमितिदुष्टभावानांतेषांसंबंधिनिरणेकथंस्थात
व्यमितिनिःशंसेतिसंबंधः तत्रहेतुः वीर्येत्यादि १५ १६ प्रसिद्धश्चायंवृत्तांतइत्याह श्रूयतइत्यादि १७ ॥

-85

1212

रा० बा० टी० ८४

यतो महाबलः ततो यदा त्वनादरात्स्वयं यत्नं विघ्नकर्तानं बलवत्त्वमनादरात्स्वयं विघ्नायनागच्छति तदा १८॥
तेन रावणेन प्रेरितौ मारीचसुबाहू यज्ञविघ्नं करिष्यत इति संबंधः १९ अथ रावणनामश्रवणात्स्वयमेव निवृ
त्तीकारप्रत्याशो राजाप्याह इत्याह इति २० अल्पभागपस्यत्रियोगाकरणादिति शेषः प्रसादयितमाह देव

यदा न खलु यज्ञस्य विघ्नकर्ता महाबलः १८ तेन संचोदितौ तौ तु राक्षसौ च महाबलौ मारीचश्च सुबाहु-
श्च यज्ञविघ्नं करिष्यतः १९ इत्युक्तो मुनिना तेन राजोवाच मुनिं तदा न हि शक्तोऽस्मि संग्रामे
स्थातुं तस्य दुरात्मनः २० स त्वं प्रसादं धर्मज्ञ कुरुष्व मम पुत्रके मम चैवाल्पभाग्यस्य दैवतं हि भ
वान्गुरुः २१ देवदानवगन्धर्वा यक्षाः पतगपन्नगाः न शक्ता रावणं सोढुं किं पुनर्मानवा युधि २२
स तु वीर्यवतां वीर्यमादत्ते युधि रावणः तेन चाहं न शक्तोऽस्मि संयोद्धुं तस्य वा बलैः २३ सबलो वा मु
निश्रेष्ठ सहितो वा ममात्मजैः कथमप्यमरप्रख्यं संग्रामाणामकोविदं २४।

न शक्तोस्मीत्यादि २१ २२।

स तु इति वीर्यमादत्ते नाशयतीत्यर्थः अतस्तत्संग्रामाद्दैवमुख्यमपि न दोषायेति भावः तस्य बलैः मारीचादिभिः
हे मुनिश्रेष्ठ सबलः ससैन्यः मम पुत्रैः सहितो वा भवानपि तेन योद्धुं न शक्त इत्यनुषंगः अस्तु वा कथंचिद्भवतस्त॥
यामामर्थ्यं पुत्रे तु समवेयान दास्यामीत्याह कथमपीत्यादि अमरप्रख्यं अमरतुल्यं रूपमेव न तु समरामि तिताम

प्रतिज्ञः गविनोक्तिवान्न नयपुत्रकम्। भूयोः पौनरुक्त्यं न दोषः पुत्रकामित्यनुकंपायां कन् अदाने हेत्वंतरमप्या

ह अथेत्यादिपनः सुंदोपसुंदपुत्रौ कालोपमौ युद्धे तत्सौ मारीचसुबाहु दैत्यकुलजसुंदोपसुंदाभ्यां यक्षकन्यायां

जातौ वेनप्रगस्त्यशापेन च प्राप्तिरूपरतमौ रावणसमं प्राप्तौ यतस्तौ यज्ञविघ्नकरौ अतः सुतेनैव दास्यामी त्यन्वयः २

५२९

86

बालं मे तनयं ब्रह्मन्नैव दास्यामि पुत्रकं अथ कालोपमौ युद्धे सुतौ सुंदोपसुंदयोः २५ यज्ञवि

घ्नकरौ तौ ते नैव दास्यामि पुत्रकं तौ च वीर्यसमायातौ दैत्यकुलोद्भवौ २९ मारीचश्च सु

बाहुश्च वीर्यवंतौ सुशिक्षितौ तयोरन्यतरं योद्धुं यास्यामि ससुहृद्गणः अन्यथा त्वनुनेष्यामि

भवंतं सह बांधवः २८ इति नरपतिजल्पनाद्द्विजेंद्रं कुशिकसुतं सुमहान्विवेश मन्युः सु

हुत इव मखेऽग्निराज्यसिक्तः समभवदुज्ज्वलितो महर्षिवह्निः २८ इत्यार्षे रामायणे बालकां

डे विंशः २० तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलाक्षरं समन्युः कौशिको वाक्यं प्रत्युवाच महीं

अन्यथा भवतां मानयन्नेव अनुनेष्यामि वा मा गमनाय इति शेषः २१ इतीति सुहृत्तः प्रथमं सुहृत्समिद्भिः हुतः य

थाऽऽज्यसिक्तोऽग्निरिवेति योजना उज्ज्वलितः रोषजज्वालाव्याप्तिमत्त्वात्सुष्ठु हुतः २८ इति रामायणे विंशः २०

तादीतिस्नेहेन पुत्रस्नेहेन पर्याकुलानि गद्गदानि अक्षराणि यस्मिन् तत्तस्य वचनं श्रुत्वेत्यन्वयः ॥ ॥

रा॰
बा॰ टी॰
८५

अयंविपर्ययः प्रतिज्ञाहानिरूपः राघवाणामयुक्तः यतोऽयंअस्यकुलस्यविपर्ययः नाशः विपर्ययपदावृत्ति-
र्बोध्या २ यदिदंप्रतिज्ञाहानिरूपंत्वमयुक्तं इदंतत्फलंच यदित्वमेवंस्थितस्तदायथागतंगमिष्यामि मिथ्यावादी
त्वंसुहृद्वृतः सुखीभवेतिविपरीतलक्षणयोक्तिः ३ धीमतइत्यत्रवैराग्यंदृष्टिविशेषः जगदन्यथाकरणसमर्थो।

पूर्वमर्थंप्रतिश्रुत्यप्रतिज्ञांहातुमिच्छसिराघवाणामयुक्तोयंकुलस्यास्यविपर्ययः २ यदिदंतेक्ष-
मंराजन्गमिष्यामियथागतं मिथ्याप्रतिज्ञःकाकुत्स्थसुखीभवसुहृद्वृतः ३ तस्यरोषपरीतस्यविश्वा-
मित्रस्यधीमतः चचालवसुधाकृत्स्नादेवानांचभयंमहत् त्रस्तरूपंतुविज्ञायजगत्सर्वंमहानृषिः नृ-
पतिंसुव्रतोधीरोवसिष्ठोवाक्यमब्रवीत् इक्ष्वाकूणांकुलेजातःसाक्षाद्धर्मइवापरः धृतिमान्सुव्रतः।
श्रीमान्नधर्मंहातुमर्हसि त्रिषुलोकेषुविख्यातोधर्मात्माइतिराघवः स्वधर्मंप्रतिपद्यस्वनाधर्मंवोढुमर्-
हसि प्रतिश्रुत्यकरिष्येतिउक्तंवाक्यमकुर्वतः इष्टापूर्तवधोभूयात्तस्माद्रामंविसर्जय ८॥

यमयक्रुद्धःकिं-
करिष्यतीतिदेवानांभयं ४ त्रस्तरूपंप्रतिशायेनत्रस्तंजगत्त्रैलोक्यं ५ साक्षाद्धर्मइवइवशब्दएवार्थेउत्प्रेक्षावा
रूपकमिदं ६ स्वधर्मंसत्यप्रतिज्ञत्वं ७ इष्टंयज्ञमेधादयोयागाः पूर्तंवापीकूपादिनिर्माणंतद्वधः तत्फलनाशः
भूयात्भवेत्भविष्यतीतियावत्करिष्येतिप्रतिश्रुत्यप्रतिज्ञा[illegible]मधिराघेः उक्तवाक्यमकुर्वतस्तत्रनतिष्ठतः ८॥

८ प्रति

कृतार्थांधीविनासंग्राह्यंतिमहिम्यंतेप्रथयर्षयितामितिशेषः अग्निनाद्दतिनमन्दतामिवेत्युपमाश्रनेनपुत्रविप
त्रिभीत्यपनयः ९ नकेवलंविश्वामित्रकृतसंरक्षणेनैवरामस्यकृतार्थत्वंकिंतस्वतोपीत्याह रामविश्वामित्रयोः
स्निग्धवर्णनेन एषःरामःविश्वामित्रश्चरामपक्षेविद्याधिकःसहजस्तानघाक्तिःतपसःमननादेःपरायणः।

87

कृतास्त्रमकृतास्त्रंवानैनंशक्ष्यंतिराक्षसाः गुप्तंकौशिकपुत्रेणज्वलनेनामृतंयथा ९ एषविग्रहवान्धर्म
एषवीर्यवतांवरः एषविद्याधिकोलोकेतपसश्चपरायणः १० एषोस्त्रान्विविधान्वेत्तित्रैलोक्येसच
राचरे नैनमन्यःपुमान्वेत्तिनचवेत्स्यन्तिकेचन ११ नदेवानर्षयःकेचिन्नामरानचराक्षसाः गंधर्वय
क्षप्रवराःसकिन्नरमहोरगाः १२ सर्वास्त्राणिकृशाश्वस्यपुत्राःपरमधार्मिकाः कौ।
रा शिकायपुरादत्तायदाराज्यंप्रशासति १३ ॥

प्राप्यःविश्वामित्रपक्षेतपसश्चाश्रयः १० रामप
क्षेअन्यःपुमान् अविद्यावृतःपुमानित्यर्थः विश्वामित्रपक्षेपन्नेप्रसंगात् ११ ननुदेवादयनवेद्युः सर्वास्त्राणि
कृशाश्वःकथमिमानग्राहि सर्वास्त्राणीतिकृशाश्वःप्रजापतिरेकःपरमधार्मिकाइतिपाठेपरमधार्मिकप्रतिष्ठावे
तदर्थः एतेनापिदुर्लभत्वंमंत्रस्थानितदत्ताःपितेतिशेषःप्रशासतिप्रशास्तिस्मेत्यर्थःशेषार्थः १३ ॥ १४ ।

नो

अस्त्राणामात्मप्राधान्यमप्याहतेपीति प्रजापतिसुतेदक्षकन्येतयोःसुतानैकरूपाः अनेकरूपाः १४ तेसुते उशत
इत्यर्थः शस्त्राणिपरविशसनकर्तॄणि १५ वरान्श्रेष्ठान्अप्रमेयान्गुणेयत्तयाअपरिच्छेद्यान् अरूपिणः अदृ

तेपिपुत्राः भृशाश्वस्यप्रजापतिसुतासुताः नैकरूपामहावीर्यादीप्तिमंतोजयावहाः १४ जयाचसुप्र
भाचैवदक्षकन्येसुमध्यमे तेसुतेस्त्राणिशस्त्राणिशतंपरमभास्वरं १५ पंचाशतंसुतान्लभेजयाल
ब्धवरावरान् वधायासुरसैन्यानामप्रमेयानरूपिणः १६ सुप्रभाजनयच्चापिपुत्रान्पंचाशतंपुनः सं
हारान्नामदुर्धर्षान्दुराक्रामान्बलीयसः १७ तानिचास्त्राणिवेत्त्येषयथावत्कुशिकात्मजः अपूर्वा
णांचजननेशक्तोभूयश्चधर्मवित् १८ तेनास्यमुनिमुख्यस्यधर्मज्ञस्यमहात्मनः नकिंचिदस्त्यवि
दितंभूतंभव्यंचराघव १९ एवंवीर्योमहातेजाविश्वामित्रोमहायशाः नरामगमनेराजन्संशयंगं
तुमर्हसि २० तेषांनिग्रहणेशक्तः स्वयंचकुशिकात्मजः २१ ॥ २१ ॥ २१ ॥ ॥

श्यमानरूपात् १६ संहारानस्त्रवर्गसंहारनामकान्दुर्धर्षानपरैः सोढुमशक्यात् दुराक्रामान्दीर्घ॰
प्रांशः दुराक्रमान् प्रमोचान् १७ अपूर्वाणांअस्त्र[illegible]विशेषाणामितिशेषः १८ १९ २० २१ ॥

स्वतोरक्षतोनिग्रहेशक्तोपिविश्वामित्रः तस्मुत्रानुग्रहायैवतंयाचतइत्याहतेषामितिहितंप्रतिरहस्यानन्य
दुर्लभानेकविद्याप्रदानादिरूपं २१ मुमोदेतिपरस्मैपदमार्षंवस्त्वर्थः प्रसन्नचित्तइत्युत्तरंयोज्यः राघवस्य।
रामस्यकौशिकात्मजायरामंदातुंबुध्याप्रविनयादितिशेषः २२ इतिरामायणोपकाविंशः सर्गः २१।

तवपुत्रहितार्थायत्वामुपेत्याभियाचते २१ इतिमुनिवचनात्प्रसन्नचित्तोरघुवृषभश्चप्रमोदपा
र्थिवः राममनमभिरुरोचराघवस्यप्रथितयशाः कुशिकात्मजायबुध्या २२ इत्यार्षेरामायणे।
बालकांडेएकविंशः सर्गः २१ तथावसिष्ठेब्रुवतिराजादशरथःस्वयं प्रहृष्टवदनोराममा
जुहावसलक्ष्मणं १ कृतस्वस्त्ययनंमात्रापित्रादशरथेनच पुरोधसावसिष्ठेनमंगलैरभिमं
त्रितं २ सपुत्रंमूर्ध्न्युपाघ्रायराजादशरथस्तदा ददौकुशिकपुत्रायसुप्रीतेनान्तरात्मना ३

तथेतिसलक्ष्मणंरामंआजुहावतयोरविनाभाववत्तानादितिशेषः २ कृतस्वस्त्ययनंकृतमंगलाचरणंमंग
लैःमंगलसूचकैःमंत्रैः किंवततद्वत्तानप्रतिपादकवाक्यैरभिमंत्रितंबोधितमित्यर्थः तद्धायनंचयोगाद्या

टीकासहितं २॥

रा.
बा.टी.
८०

राजापितदाक्यश्रवणेनसुप्रीतमनाः रामंददौ ३ यात्रायांशकुनमाह ततइति ववौशुभ्रस्तत्रतिसुखं
विश्वामित्रगतंतंसैववहन्राजीवपमं ४ प्रयातेप्रयाणेक्कोवेसप्रयोजनतोपक्रमात्देवानांडंडुभिनामघुष्ट
ष्टिः शंखादिवोमसक्षसनगरजः ५ धन्वीधनुर्विद्याकृतश्रमः ८ कलापिनौमत्तूणीरौशोभयानौप्रका
शयंतौ पासतेजसामसगभावसंबौः त्रिशीर्षाविवपन्नगौ स्कंधस्थितधनुषाहवदनूणीरेणमत्त

ततोवायुःसुखस्पर्शोनीरजस्कोववौतदा विश्वामित्रगतंरामंदृष्ट्वाराजीवलोचनं ४ पुष्पवृ
ष्टिर्महत्यासीद्देवडुंडुभिनिस्वनैः शंखडुंडुभिनिर्घोषैःप्रयातेतुमहात्मनि ५ विश्वामित्रोय
यावग्रेततोरामोमहायशाः काकपक्षधरोधन्वीतंचसौमित्रिरन्वगात् ८ कलापिनौधनुष्पाणीशो
भयानौदिशोदश विश्वामित्रंमहात्मानंत्रिशीर्षाविवपन्नगौ ७ ॥

केनचत्रिशीर्ष

तंपक्षा प्रत्येकंतूणी
रद्वयधारणात् त्रिशीर्षत्वं धनुषःपाणावुक्तत्वात् अत्रेदंतूणीरादिवैसवंगरुडेनदत्तंरामायतांडकाम
वक्ष्वधायममारीचसमसमुद्दीपातनायचनहिप्राकृतधारासाध्यमेतत् तडक्तंपाद्मेपाठितास्सैःसमागम्य।
तौणिचास्त्राणिकार्मुकं संवमर्नेतरदमपःसनदस्वानाभ्यांपुनर्पयाविति अस्त्राणिशस्त्राणिवक्ष्चर्मतूणी

॥ १ ॥
[illegible]

प्रस्तदो अनल्पवीर्यादिमंतौ शोभयंतौ विश्वामित्रमिति शेषः ८ बद्धगोधाचर्मकृतं अंगुलित्राणं ययोस्तौ
गोधा हस्तत्राणमिति काश्चित् अंगुलित्राणस्य पौनरुक्त्यापत्तेरुक्तं ९ शोभयेतामित्यत्र भावकर्णादिसमः ९
स्थाणुं रुद्रं पावकी स्कंदाविव शोभाविव अध्यर्धयोजनं अर्धाधिकयोजनं षट्क्रोशमिति यावत् ११ तावतीरुद्र

अनुजग्मतुरस्तदौ पितामहर्षिमिवाश्विनौ अनुयातौ श्रियादीप्तौ शोभयंतावनिंदितौ ८ तदाकुमि
पुत्रं तथानुष्पाणी स्वलंकृतौ बद्धगोधांगुलित्राणौ खड्गवंतौ महाद्युती ९ कुमारौ चारुवपुषौ
भ्रातरौ रामलक्ष्मणौ अनुयातौ श्रियादीप्तौ शोभयेतामनिंदितौ ९ स्थाणुं देवमिवाचिंत्यं कुमारौ
राविव पावकी अध्यर्धयोजनं गत्वा सरय्वा दक्षिणे तटे ११ रामेति मधुरां वाणीं विश्वामित्रोऽभ्य
भाषत गृहाण वत्स सलिलं मा भूत्कालस्य पर्ययः १२ मंत्रग्रामं गृहाण त्वं बलामतिबलां त

द्गमनेन बालकयोः तत्तत्प्रदीपप्रादुर्भावस्यावश्यकत्वान्महर्षिर्विनाप्यनंतरमत्र श्रयेदिव्याविद्ये उपदेष्टु
माह वत्सराम इत्यादि सलिलं गृहाण आचमनं कुरु कालस्य अन्नभोजनकालस्य पर्यायोऽतिक्रमः १२ मंत्र
ग्रामं बलातिबलाविद्यामंत्रकं मंत्रसमूहं तथा प्रतिबलासंज्ञकं चशब्देन प्राग्ग्रहणादिव्यासमूहशात तूपमंत्रसमूहं तथा

शो

म

रा.
वा टी.
८८

प्रकृतोपयोगिन्यो बलाप्रातिबलाख्ये च विद्ये इत्यर्थः परंत [illegible] बलातिबलयोरेव दानं अन्येषां तदा मंत्र
ग्रे भविष्यतीत्याह: गृह्णाणेमित्युपलक्षणं लक्ष्मणस्यापि क्षुत्पिपासात्यांतिरूपफलस्य उभयोरपि दर्श
नात् अप्रमत्तस्यैव श्रमो वक्रहरगमनादौ न त्वहलको ज्वरोपि न विपर्ययः अन्यथाभावः तद्विद्याजपेन भ
विष्यतीति शेषः १२ प्रमत्तं अकृताचमनादिकं धर्षणं अभिभवः अस्तीति वर्तमानसामीप्ये भविष्यति लट्.

न श्रमो न ज्वरो वा ते न रूपस्य विपर्ययः १३ न च सुप्तं प्रमत्तं वा धर्षयिष्यंति नैर्ऋताः न बाह्वोः सदृशो।
वीर्ये पृथिव्यामस्ति कश्चन त्रिषु लोकेषु वा राम न भवेत्सदृशस्तव बलामतिबलां चैव पठतस्तात रा
घव १५ न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ एतद्विद्या
द्वये लब्धे न भवेत्सदृशस्तव बला चातिबला चैव सर्वज्ञानस्य मातरौ १६ क्षुत्पिपासे न ते राम भविष्येते.
नरोत्तम बलामतिबलां चैव पठतस्तात राघ

सर्वत्र तद्विद्यालाभो हेतुः १४ न केवलं पृथिव्यामेवेत्याह त्रि
ष्वित्यादि १५ ज्ञानं तत्त्वज्ञानं बुद्धिनिश्चयः ऐहिकविषयकः वादिनं प्रतिवक्तव्ये उत्तरे इत्यर्थः १७ न च सदृशो।
न केनापि गुणेनेति शेषः सर्वज्ञानस्य मातराविति अप्रतिमानलक्षणादिनिवृत्तिसामर्थ्यवत्त्वात् सर्वज्ञानजनके

विद्याद्वयमधीयानेत्वपीतिशेषः यशश्चाप्यतुलंभुवीतिपाठेभविष्यतीत्यपिशेषः तयोर्विद्ययोः तादृशसा
मर्थ्यकारणमाह पितामहेत्यादि तन्निर्मितत्वात्तेते १९ प्रदातुंममबुद्धिरितिशेषः सदृशः तदानयोग्य
इत्यर्थः एतद्विद्याप्रदानयोग्यः बहुतिलमविभक्तिकंबहवइत्यर्थः विप्रुलाइत्यावत् २० तपसामदी

विद्याद्वयमधीयानेयशश्चाप्यथभवेद्भुवि पितामहसुतेह्येतेविद्येतेजःसमन्विते १९ प्रदातुंतव
काकुत्स्थसदृशस्त्वंहिपार्थिव कामंबहुगुणाःसर्वेत्वय्येतेनात्रसंशयः २० तपसासंभृतेचैतेबहुरू
पेभविष्यतः ततोरामोजलंस्पृष्ट्वाप्रहृष्टवदनःशुचिः २१ प्रतिजग्राहतेविद्येमहर्षेर्भावितात्मनः वि
द्यासमुदितोरामःशुशुभेभीमविक्रमः २२ सहस्ररश्मिर्भगवान्शरदीवदिवाकरः २२ गुरुकार्या
णिसर्वाणिनियुज्यकुशिकात्मजः ॥

येनसंभृतेपूर्णेबहुरूपेशास्त्रोक्तफलादधिकफलप्रदेयद्वा तप
पे सःसर्वंतपःप्राप्तेनतपोरूपेणाभवतासंभृतेपुष्टेइत्यर्थः जलंस्पृष्ट्वाचम्य २१ विद्यासमुदितः विद्यासंबद्धः
सतोविक्रमवानपिविद्यासंबंधात् अधिकविक्रमइत्यर्थः २२ सहस्रेत्यादिपूर्वान्वयि कुशिकात्मजोविश्वामित्रः २२
गुरुकार्याणिगुरुविषयाणिकार्याणिपूर्वोक्तान्यायपत्रयसंन्यासत्रिवेण्यादीनिसर्वाणिनियुज्यउपदिश्येत्यर्थः ।

समभ्यंतपादेगुरुकार्याणि पादोपसंग्रहणादीनि कुशिकात्मजेनियुज्यमकृतेत्यर्थः सरय्वांततीरे २३ दशार
थेत्यादिष्पूर्ववचनर्थीः तृणशयनं वितथशयनोषितयोरपिराजसुखं विस्पष्टतेहेतुः कुशिकसुतवचोनुलालि
तत्वंविवभौसुष्ठेतियावत् २४ इतिद्वाविंशः सर्गः २२ प्रभातायामितिपर्णसंस्तरेसृण्डपर्णादिपरिक।

गुरुकार्याणिसर्वाणिनियुज्यकुशिकात्मजः ऊषुस्तांरजनींतत्रसरय्वांसुसुखंत्रयः २३ द
शरथनृपसूनुसत्तमाभ्यांतृणशयनेनुचितेतदोषिताभ्यां कुशिकसुतवचोनुलालिता।
भ्यांसुखमिवसापिवभौविभावरी २४ इतिश्रीरामायणेवालकांडेद्वाविंशः सर्गः २२
प्रभातायांतुशर्वर्यांविश्वामित्रोमहामुनिः अभ्यभाषतकाकुत्स्थौशयानौपर्णसंस्तरे १
कौसल्यासुप्रजारामपूर्वासंध्याप्रवर्तते उत्तिष्ठनरशार्दूलकर्तव्यंदैवमाह्निकं २ २।

स्मितेशयानौयेद्वैर्ज्ञोकुंतृणशयनरत्नुपलक्षणंबोध्यं १ कौसल्येतिहेरामत्वयापुत्रेणकौसल्यासुप्र
जासुपुत्राशोभनपुत्रवतीयतस्त्वादृशस्सुपुत्रस्सतवअस्मिन्समयेनिद्राअनुचितायतः पूर्वासंध्या
प्रातः संध्याप्रवर्ततेप्रतउत्तिष्ठेदेवंदेवताध्यानंमाह्निकंपौर्वादिक्रिया २॥ २॥ २।

स्नात्वाकृतोदकौकृत्वार्घ्यदानौइदंतावत्पर्यंतकर्तव्यक्रियामात्रोपलक्षणंपरमंजपंसावित्री ३ अभितस्तस्थतुः
संमुखौस्थितावित्यर्थः ४ प्रयातौगच्छंतौ ५ तत्रगंगासरयूसंगमप्रदेशेतप्यतांतपः छांदसः ऋषीणामाश्र

91

तस्यर्षेःपरमोदारंवचःश्रुत्वानरोत्तमौ स्नात्वाकृतोदकौवीरौजेपतुःपरमंजपं ३ कृताह्निकौमहावी
र्यौविश्वामित्रंतपोधनं अभिवाद्यातिसंहृष्टौगमनायाभितस्थतुः ४ तौप्रयातौमहावी।
र्यौदिव्यांत्रिपथगांनदीं ददृशातेततस्तत्रसरय्वाःसंगमेशुभे ५ तत्राश्रमपदंपुण्यमृ ।
षीणांभावितात्मनां बहुवर्षसहस्राणितप्यतांपरमंतपः ६ तंदृष्ट्वापरमप्रीतौराघवौपु
ण्यमाश्रमं ऊचतुस्तंमहात्मानंविश्वामित्रमिदंवचः ७ कस्यायमाश्रमःपुण्यःकोन्वस्मि
न्वसतेपुमान् भगवन्श्रोतुमिच्छावःपरंकौतूहलंहिनौ ८ तयोस्तद्वचनंश्रुत्वाप्रहस्य
मुनिपुंगवः अब्रवीच्छ्रूयतांरामयस्यायंपूर्वआश्रमः ९ ॥

मपदंददृशातेइत्यनुकर्षः ६ तंप
रमरमणीयं ७ वसतेवसतितङ्छांदसः ८ प्रहस्यबालकवचनश्रवणजसंतोषाद्धासः सर्वज्ञोप्येवंनाटय
तीतिवायस्यपूर्वः यस्यपूर्वकालाधिष्ठेयः अभूत्तमश्रूयतामित्यन्वयः ९ ॥ ९ ॥ ९ ॥

रा॰

बा॰ टी॰

१५॰

मूर्तिमानशरीरथवः समाहितं समाहितचित्तं स्थाणुं रुद्रं ११ कुतोद्वाहं समाधेः कृतव्युत्थानं देवैः सहव्यु।
त्थानं कालोचितविलासदेशं गच्छंतं देवशं उमेयाः कामः धर्षयामास चित्तविकारोत्पादनेन अभिभूतवान्।
ततो महात्मना रुद्रेण ज्ञाताप राधेन ऊं कृतः वक्ष्यमाणप्रवध्यातो दृष्टश्चेत्युत्तरेणान्वयः ११ विशीर्येत विशीर्णानि

कंदर्पो मूर्तिमानासीत्काम इत्युच्यते बुधैः तपस्यंतमिह स्थाणुं नियमेन समाहितं ११ कृतोद्वाहं तं दे
वेशं गच्छंतं ससमरुद्गणं धर्षयामास दुर्मेधा हुंकृतश्च महात्मना अवध्यातश्च रुद्रेण चक्षुषा रघुनंदन
व्यशीर्यंत शरीरात्स्वात्सर्वगात्राणि दुर्मतेः तत्र गात्रं हतं तस्य निर्दग्धस्य महात्मना अशरीरः कृतः का
मः क्रोधाद्देवेश्वरेण ह अनंग इति विख्यातस्तदाप्रभृति राघव सचांगविषयः श्रीमान्यत्रांगं स मुमो॰
च ह तस्यायमाश्रमः पुण्यस्तस्येमे मुनयः पुरा शिष्या धर्मपरा वीर तेषां पापं न विद्यते १५ ॥

व

सर्वगात्राणि सर्वैरवयवाः १२ तत्र प्रसिद्धतरेऽस्मिन्नाश्रमे हतं नष्टं ह शाकः प्रसिद्धो १३ ततो भयात्पलायमानोय
त्र देशे स कामः स्वं अंगं मुमोच स अंगविषयः अंगदेश इति विख्यात इति शेषः १४ तस्य स्थाणोः इमे मुनयः इदानीमि॰
हतपस्यंतः तस्य रुद्रस्य पुरा पूर्वकालं संतानपरंपरागताः शिष्याः अत एव धर्मपराः अत एव तेषां पापं न विद्यते १५

बा

१५१

सरितोर्गंगासरय्वोः १८ स्नानादिना शुचयो भूत्वा पुण्यमाश्रममभिगच्छामहे वत्स्यामहे इति पृथक्पद॰
द्वंद्वापरपक्षकृतरः १२ स्नाताः इत्यादीनि तदाश्रमवासिमुनिविशेषणानि तेषां संवदतां तेषु संवदत्सु तान् अरु
ष्टापितपोमहिम्ना ज्ञातदीर्घेण च चक्षुषा तपोबलविप्रकृष्टार्थग्राहिणा चक्षुषा रामायागमनं विज्ञाय तेन चक्षुषेत्यन्व॰

इहाद्य रजनीं राम वसेम शुभदर्शन पुण्ययोः सरितोर्मध्ये श्वस्तरिष्यामहे वयं १९ अभिगच्छामहे
सर्वे शुचयः पुण्यमाश्रमं इह वासः परोऽस्माकं सुखं वत्स्यामहे निशां १२ स्नाताश्च कृतजप्याश्च॰
हुतहव्या नरोत्तम तेषां संवदतां तत्र तपोदीर्घेण चक्षुषा १९ विज्ञाय परमप्रीता मुनयो हर्षमागमन्॰
न अर्घ्यं पाद्यं तथातिथ्यं निवेद्य कुशिकात्मजे १९ रामलक्ष्मणयोः पश्चादकुर्वन्नतिथिक्रियां स॰
त्कारं समनुप्राप्य कथाभिरभिरंजयन् २० ॥ २० ॥

यः १९ आतिथ्यमतिथ्यर्हं भोजनादि १९ पश्चाद्भगवतोऽपि मनुष्यरूपधारित्वेन विश्वामित्रेगुरुत्वसादनेन
वशिष्ठादौ विश्वामित्रे अर्घ्यादिदत्वा पश्चाद्रामेभ्यः अभिरंजयन् अभ्यरंजयन् अडभावआर्षः तदाश्रमस्यान
वासिनि तिशेषः यद्वा सत्कारं समनुप्राप्यतं प्राप्य विश्वामित्रादीन् तदाश्रमस्थामहर्षयोऽभ्यरंजयन्नित्यर्थः २०

यद्वा समाहिताः सन्तः एकाग्रचित्ताः परस्परं संमिलिताः अनयोर्विश्वामित्र रामयोः सत्कारं परस्परकृतसत्कृतिं समनुप्राप्य सम्यक् लब्ध्वा कथाभिः रामस्वभावादिवर्णनैः
अभिरंजयन् परस्परमनुरागमुद्पादयन् इति

रा.

बा.टी.

२१

अजयन्ननदीतीरे ते विश्वामित्राद्याः ऋषयस्तद्वासिभिर्मुनिभिः सहस्वसाहित्येनानीताः संवेशनाय।
स्वाश्रमं प्रापिताः २१ कामाश्रमपदे सर्वकामपरिहारके भर्गाश्रमे २१।२३ इति रामायणटीकायां त्रयोविं

यथार्हमजग्मन्सर्वे ऋषयस्ते समाहिताः तत्र वासिभिरानीता मुनिभिः सुव्रतैः सह २१ न्यवस
न्सुसुखं तत्र कामाश्रमपदे तदा कथाभिरभिरामाभिरभिरामौ नृपात्मजौ २२ रमया।
मास धर्मात्मा कौशिको मुनिपुंगवः २३ इत्यार्षे रामायणे त्रयोविंशः सर्गः २३ ततः।
प्रभाते विमले कृताह्निकमरिंदमौ विश्वामित्रं पुरस्कृत्य नद्यास्तीरमुपागतौ १ ते च
सर्वे महात्मानो मुनयः संशितव्रताः उपस्थाप्य शुभां नावं विश्वामित्रमथाब्रुवन् २ आ
५३ रोहतु भवान्नावं राजपुत्रपुरस्कृतः अरिष्टं गच्छ पन्थानं मा भूत्कालस्य पर्ययः ३ ॥

शः सर्गः २३ तत इति नद्याः गंगायाः १ उपस्थाप्य आनाय्य २ राजपुत्रपुरस्कृत इति तृतीयान्तस्वरू।
पः हेलिंङिति प्राप्यः अरिष्टं शुभं यथा भवति तथा शीघ्रं मार्गं मा ततः ३ ॥ ३ ॥ २ ॥ ३ः

२१

ततावतन्तंमुपक्रांतः सरितंगंगांसागरंगोच्छतिजलद्वारात्वरूपंप्रापयतितांश्रुतंभावितलापर्थः श्रुगास्य॰
शोषितस्यसमुद्रस्यगंगयाप्लावितांकृतमितिप्रसिद्धेः ४ तोयसंरंभेणापरस्परंतरंगसंघट्टजक्षोभेनवर्धितं॰
तेश्रुतिप्रहृष्टंनिश्चयंमहज्ञोपाधिकोवेत्येतदन्यतरंनिश्चयं ५ ज्ञातुकामइत्यस्यज्ञातइतिशेषः ६ भिद्य

विश्वामित्रमथेत्यत्रातानृषीन्प्रतिपूज्य च ततास्सहितस्ताभ्यांसरितंसागरंगमां ४ ।
तत्रशुश्राववैशब्दंतोयसंरंभवर्धितं मध्यमागम्यतोयस्यशब्दस्यनिश्चयं ५ ज्ञातु । तस्य
कामोमहातेजाः सहरामःकनीयसा अथरामःसरिन्मध्येपप्रच्छमुनिपुंगवं ६ ।
वारितोभिद्यमानस्यकिमयंतुमुलोध्वनिः राघवस्यवचःश्रुत्वाकौतूहलसमन्वितं ७
कथयामासधर्मात्मातस्यशब्दस्यनिश्चयं कैलासपर्वतेराममनसानिर्मितंसरः ८
ब्रह्मणानरशार्दूलतेनेदंमानसंसरः तस्मात्सुस्राववसरसः सायोध्यामुपगूहते ९

मानस्यपरस्परंसंघट्टमानस्य ७ निश्चयंनिश्चयजनकहेतुं ८ तेनमनोनिर्मितत्वेनतस्मात्सरसः याम

रा॰

बा॰ टी॰

९२

सरसोयोनिप्रवर्तत इति सरयूः सरः प्रवृत्तेति तु योगानिर्वचनं पुण्ये तेहेतवो ब्रह्मसरश्च्युतत्वं तस्या श्रयं सं
श्रितार्थः याजाह्नवीमभिवर्तते तया सह संगच्छते तस्याश्रयं शब्दस्त्यर्थः ९ ताभ्यां सरयूगंगाभ्यां ११
विक्रमः पादविक्षेपः घोरसंकाशं भयंकरदर्शनं १२ अविप्रहतं सार्थगमनाभावात् अप्रत्त साझिलि

सरः प्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता तस्यायमतुलः शब्दो जाह्नवीमभिवर्तते ९ वारि
संक्षोभजो राम प्रणामं नियतः कुरु ताभ्यां तु ताबुभौ कृत्वा प्रणाममतिधार्मिकौ १० ती
रं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ स वनं घोरसंकाशं दृष्ट्वा नरवरात्मजः ११ अ
विप्रहतमैक्ष्वाकः पप्रच्छ मुनिपुंगवं अहो वनमिदं दुर्गं झिल्लिकागणसंयुतं १२
भैरवैः श्वापदैः कीर्णं शकुन्तैर्दारुणारवैः नानाप्रकारैः शकुनैः वाश्यद्भिर्भैरवस्वनैः
सिंहव्याघ्रवराहैश्च वारणैश्चापि शोभितं धवाश्वकर्णककुभैर्बिल्वतिन्दुकपाटलैः १४ ।

काकोटविशेषः १३ भैरवैः भयंकरैः श्वापदानि दुष्टमृगाः दारुणारवैः दारुणशब्दैः शकुन्तैः भासैः शकु
नैः सर्वपक्षिभिः भैरवस्वनैर्वाश्यद्भिः प्रतिभयं वंशब्दं कुर्वद्भिः १४ शोभितं पूर्णं धवादयो वृक्षविशेषाः १५

म

ग

५८

किंतत्कृतोत्र १६ यस्य प्राणिनः मसूयतामिमनवयः स्फीतौ ममहौ १७ मलदाः करूषाश्चेतिवज्रववनं
पा तूष्णभावहतेदेवनिर्माणानदेवयत्नेननिर्मितौ मलेनग्रस्तच्यावोराण १८ तथाउभृत्रयाममभिहु

संकीर्णांवदरीभिश्चकिंचिदंदारुणांवनं तमुवाचमहातेजाविश्वामित्रोमहामतिः १८ श्रूयतां
वत्सकाकुत्स्थयस्यैतद्दारुणांवनं पतौजनपदस्फीतौपूर्वमास्तांनरोत्तम १७ मलदाश्चकरूषा
श्चदेवनिर्माणनिर्मितौ पुरावृत्रवधेरामभूलेनसमभिप्लुतं १८ क्षुधाचैवसहस्रा
तं [illegible] ब्रह्मत्यासमाविशत् तमिंद्रमलिनेदेवाऋषयश्चतपोधनाः १९
कलशैःस्नापयामासुर्मलंचास्यप्रमोचयन् इहभूम्यांमलंदत्वादेवाःकारूषमे
वच २० शरीरजंमहेंद्रस्यततोहर्षंप्रपेदिरे निर्मलोनिष्करूषश्चशुद्धइंद्रोयथाभव
त २१ ततोदेशस्यसुप्रीतोवरंप्रादादनुत्तमं इमौजनपदौस्फीतौख्यातिंलोकेग
मिष्यतः २२ ॥

तमित्यनुक्त ष्यतेब्रह्म
हत्यावृत्रस्यब्रह्मसंतानत्वात् देवाःवसा दयः १९ कलशैःगंगाजलपूर्णैश्चघटैः प्र
मोचयन्प्रामोचयनकारुषंतन्तदस्मात्मकेत्यर्थः २० शरीरजमितिपूर्वान्वयिप्रपेदिरेदेवाइतिशेषः

२१

रा.
बा टी.
२३

यस्मात् ममांगमलधारिणौ तस्मात् ख्यातिं गमिष्यत इति पूर्वेणान्वयः २३ शक्रेण कृतां देशस्य पूजां दृष्ट्वा पाकशासनं साध्विति प्रब्रुवन्निति पूर्वेणान्वयः कस्यचित्क्रियतः कालस्य अपगमे इति शेषः २५ भद्रे।

मलदाश्च करूषाश्च ममांगमलधारिणौ साधु साध्विति तं देवाः पाकशासनमब्रुवन् २२
देशस्य पूजां तां दृष्ट्वा कृतां शक्रेण धीमता प्रीतो जनपदः स्फीतो दीर्घकालमरिंदम २४
मलदाश्च करूषाश्च मुदितौ धनधान्यतः कस्यचित्त्वथ कालस्य यक्षिणी कामरूपिणी २५
बलं नागसहस्रस्य धारयन्ती तदा ह्यभूत् ताटका नाम भद्रं ते भार्या सुन्दस्य धीमतः २६
मारीचो राक्षसः पुत्रो यस्याः शक्रपराक्रमः वृत्तबाहुर्महाशीर्षो विपुलास्यतनुर्महान्
२७ राक्षसो भैरवाकारो नित्यं त्रासयते प्रजाः इमौ जनपदौ नित्यं विनाशयति राघव २८।

ते इति विश्वामित्रस्य आशीर्वचनं बालकत्वेन ताटकाशापहितां नामग्रामो माभूदिति यद्वा ताटका नाम ते भ-
द्रे प्रथमं मारीचस्यानन्तरं नेयो मैथिलीमिति कारणं बन्धनस्येति बोध्यं २६ २७ २८ ॥ ॥ ३८ २८

सेयंयाविनाशायतिसेत्यर्थः आहूत्यनिहत्यग्रर्थंग्रतिक्रांतमत्यर्थंताटकोयोजने २९ यतश्चेदंताटकावनं।
ग्रस्माभिर्गंतव्यंग्रतएववहेतोर्हे रामस्ववाहुबलमाश्रित्यइमांजहि ३१ नवस्त्रीवधं हेतव्यातचाहमंत्रियोगा

मलदांश्चकरूषांश्चताटकाडुष्टचारिणी सेयंपंथानमावृत्यवसत्यर्धयोजने २९ अतएववगंत
व्यंताटकायावनंयतः स्ववाहुबलमाश्रित्यजहीमांडुष्टचारिणी मन्नियोगादिमंदेशंकुरुनिष्कंटकं
पुनः नहिकश्चिदिमंदेशंशक्तोह्यागंतुमीदृशं यक्षिण्याघोरयारामउत्सादितमसह्यया प
तन्मेसर्वमाख्यातंयथैतद्दारुणंवनं यक्ष्याचोत्सादितंसर्वमद्यापिननिवर्तते ३१ इत्यार्षेरा
मायणेबालकांडेचतुर्विंशः २४ अथतस्याप्रमेयस्यमुनेर्वचनमुत्तमं श्रुत्वापुरुषशार्दूलः
प्रत्युवाचशुभांगिरं १ अल्पवीर्यायदायक्षीश्रूयतेमुनिपुंगव कथंनागसहस्रस्यधारयत्यव।
लावलं २ ॥ २॥ द्विनिमदान्तयास्त्रीवधशंकोत्यज ईदृशंनाटकाक्रांतं ३१ अद्यापिननि।
वर्ततेग्रत्रइदंवस्थितोजनइतिशेषः ३२ इतिचतुर्विंतिसर्गः २४। अथेतिग्रप्रमेयस्यग्रप्रमेयप्रभा
वस्यपार्दूलःश्रेष्ठः १ यदायतःयत्तीयत्तजातिःश्रूयतेपुराणादावितिविशेषःग्रवलेतिसाभिप्रायं २

वा॰
वा॰टी
२४

३ वीर्यंशौर्यादि बलमात्रप्रश्ने वीर्याभिधानं शौर्यादयोन्येपि गुणाः तस्यां संतीति ज्ञापनार्थं ४ वरप्राप्ति
मूलमाह पूर्वमिति निमेपुत्रार्थं पितामहस्मादिश्येपति शेषः ५ कन्यारत्नं दिव्यरूपवतीं कन्यां ८ तदभिसं।

इत्युक्तं वचनं श्रुत्वा राघवस्यामितौजसः हर्षयन् श्लक्ष्णया वाचा सलक्ष्मणमरिंदमं ३ विश्वामि
त्रोब्रवीद्वाक्यं श्रूयतां येन बलोत्कटा वरदानकृतं वीर्यं धारयत्यबला बलं ४ पूर्वमासीन्महायक्षः
सुकेतुर्नाम वीर्यवान् अनपत्यः शुभाचारः स च तेपे महत्तपः ५ पितामहस्तु सुप्रीतस्तस्य यक्ष
नाम पतेस्तदा कन्यारत्नं ददौ राम ताटकां नाम नामतः ६ ददौ नागसहस्रस्य बलं चास्याः पितामहः नत्वे
व पुत्रं यक्षाय ददौ चासौ महायशाः ७ तां तु बालां विवर्धंतीं रूपयौवनशालिनीं जंभपुत्राय सुंदा
य ददौ भार्यां यशस्विनीं ८ कस्यचित्त्वथ कालस्य यक्षी पुत्रं व्यजायत मारीचं नाम दुर्धर्षं यः शापा
द्राक्षसोभवत् ९।

हितगुणवता पुत्रेणात्यंतं जनपीडा भवेदिति विचार्य पुत्रं न ददौ ७ विवर्धंतीं वर्धमा
नां जंभपुत्रायेत्यत्र जंभपुत्रायेति पाठोऽसंगतः सुंदः जंभपुत्रः सुमारयक्षयोः देवयोनित्वेनोचितः संबंधः ८

॥ २५ रामायणवाल्मीकिबालकाण्ड

सा पंदर्शयति मंदेति तिनिहते अगस्त्येन शापं दत्वेति शेषः इच्छति इच्छतिस्म १० जातसंरंभा स्वभर्तृव-
धजकोपवती ११ भज त्वमृद्धदेवयोनिमहूपं महोति शेषः शमवानुवाक्तसमंभजत्वेति १२ तदेवावि-
स्तरेणाह पुरुषादीति भवेदिति शेषः तदेवोपपादयति इदमिति इदं रूपं यादृशी रूपं विहाय त्याजयिता

मुंदेतनिहते राम अगस्त्यमृषिसत्तमं ताटका सहपुत्रेण प्रधर्षयितुमिच्छति १० भक्षार्थं जातसं-
रंभा गर्जंती साभ्यधावत आपतंतीं तु तां दृष्ट्वा अगस्त्यो भगवानृषिः ११ राक्षसत्वं भजस्वेति मा-
रीचं व्याजहार सः अगस्त्यः परमामर्षस्ताटकामपि शप्तवान् १२ पुरुषादी महायक्षी विकृता।
विकृतानना इदं रूपं विहायाशु दारुणं रूपमस्तु ते १३ सैषा शापकृतामर्षा ताटका क्रोधमूर्छि-
ता देशमुत्सादयत्येनमगस्त्याचरितं शुभं १४ ॥ ५ ॥

दारुणं रूपं राक्षसी रूपं अस्तु भवतु एतदेवा-
भिप्रेत्यापाभेडक्रमेतो रामलक्ष्मणौ वीरावावां तां मपि राक्षसीं ताटकां नाम चोरां तां स्वंद भार्यासहकेतुजामिति १३
अमर्षात् असहनात् देशोत्सादने हेतुगर्भं विशेषणं अगस्त्याचरितमिति अगस्त्यतपः स्थान

गोब्राह्मणहितार्थायेति स्त्रीवधशंकानिरासाय तद्धिताय क्रियमाणं पापवदाभासमानमपि धर्मायेति
दा. भावः १५ शापसंसृष्टां शापग्रस्तां शापव्याप्तां १६ हे नरोत्तम स्त्रीवधनिमित्ता घृणा न कार्या प्रजानरोत्तमेत्यने
बा. मा. न पुरुषोत्तमे सुरद्रूपत्वात्तव पापसंबंधाभाव इति सूचितं चातुर्वर्ण्यहितार्थेन ड़िताय कर्तव्यं नित्यमनृशं
२५

पनां ताम वङ्कर्तां यक्षीं परमदारुणां गोब्राह्मणहितार्थाय जहि दुष्टप
राक्रमां १५ न ह्येनां शापसंसृष्टां कश्चिदुत्सहते पुमान् निहंतुं त्रिषु
लोकेषु त्वामृते रघुनंदन १६ न हि ते स्त्रीवधकृते घृणा कार्या नरोत्त
म चातुर्वर्ण्यहितार्थं हि कर्तव्यं राजसूनुना १७ नृशंसमनृशंसं वा
प्रजारक्षणकारणात् पातकं वा सदोषं वा कर्तव्यं रक्षता सदा १८

णान्वयः वा
समित्याशुक्ते
पापद्रुषार्थं नृशंसममिवनृशंसं क्रूरमपि कार्यमित्यर्थः १७ प्रजारक्षणकारणात् प्रजारक्षणहेतोः
एवधर्मसंनिबद्धत्वकल्याणमिति भावः रक्षता मेदेति रक्षता धर्मसिद्धिः शेषस्तेनेति शेषः १८ ॥ १८ ।
२५

पातकं वा मुख्यपातकं वा सदोषं वा यत्तादिवृत्तसदोषं ईषत्पापयुतं धर्मं वा सदोषवधरूपमिति या।
वत्त अतोप्यस्यावधोन्याय्य इत्याह अधर्म्यामिति धर्मादपेतानां तद्देवापपादयति धर्मोहेति १९ अथ-
र्म्ये स्त्रीवधोपि धर्म एवेत्यर्थं समतिभिरुपपादयति श्रूयते इति पृथिवीं तदधिष्ठात्रीं देवतां यद्वा तस्याः प्रजाः

राज्यभारनियुक्तानामेष धर्मः सनातनः अधर्म्यां जहि काकुत्स्थ धर्मो ह्यस्या न विद्यते १९ श्रूयते
हि पुरा शक्रो विरोचनसुतां नृप पृथिवीं हन्तुमिच्छन्तीं मन्थरामभ्यसूदयत् २० विष्णुना च पुरा राम
भृगुपत्नी पतिव्रता अनिन्द्रं लोकमिच्छन्ती काव्यमाता निषूदिता २१ एतैश्चान्यैश्च बहुभी राजपुत्रै
र्महात्मभिः अधर्मसहिता नार्यो हताः पुरुषसत्तमैः तस्मादेनां घृणां त्यक्त्वा जहि मच्छासनान्नृप।
२२ इत्यार्षे रामायणे बालकांडे पंचविंशः २५ ॥

त्वधीः २० अनिन्द्रं निरस्त इन्द्रविरहितं अनिन्द्रमि
तिपाठे इन्द्ररहितं काव्यः शुक्रः २१ एतैः पत्रादर्शैः यद्वा आर्षे बहुत्वं एताभ्यां शक्रविष्णुभ्यामित्यर्थः म-
च्छासनादिति घृणा परगुणामस्य जमदग्न्येर्विशाज्ञया मातृवधेपि न दोषस्तथा बलादिविधारात्त्वेन गु-
रोर्ममाज्ञया स्त्रीवधेन न दोष इति भावः २२ इति पंचविंशः २५ ॥

व

रा.
बा. टी.
२९

मनेरितिअक्लीवंधृष्टंपितरितिकौशिकस्यवचनंअविशंकयाकर्तव्यंनयेत्येवंरूपान्निर्देशात्तन्नियोगा।
त्पितुर्वचनगौरवात्परमान्नवाक्यत्वेनअतिप्रमाणत्वात्तत्वद्वचनंअवश्यंकर्तव्यतेननिश्चितमिति।
शेषः २ कदैवंनियोगःकृतस्तत्राह अन्वितिगुरवोवसिष्ठवामदेवाद्याः अनवज्ञानेहेतुरुक्तःयवत।

मुनेर्वचनमक्लीवंश्रुत्वानरवरात्मजः राघवःप्रांजलिर्भूत्वाप्रत्युवाचदृढव्रतः १ पितुर्वचननि
र्देशात्पितुर्वचनगौरवात् वचनंकौशिकस्येतिकर्तव्यमविशंकया २ अनुशिष्टोस्म्ययोध्यायांगु
रुमध्येमहात्मना पित्रादशरथेनाहंनावज्ञेयंहितद्वचः ३ सोहंपितुर्वचःश्रुत्वाशास
नाद्ब्रह्मवादिनः करिष्यामिनसंदेहस्ताटकावधमुत्तमम् ४ गोब्राह्मणहिता
र्थायदेशस्यचहितायच तवचैवाप्रमेयस्यवचनंकर्तुमुद्यतः ५ ॥५॥

द्वचोविश्वामित्रवचश्चानुशिष्टइत्यन्वयः ३ सोहमितिब्रह्मवादिनःतस्यर्षेर्नतत्संकल्पादन्यस्यापिपाप
मपापंपुण्यंचेत्याह उत्तममितिउत्कृष्टधर्ममित्यर्थः ४ प्राप्तमेवोपपादयतिगोब्राह्मणेति।
अप्रमेयस्यतवचहिताय अस्याहितंस्यात्तापरिपालनेनमत्तोषट्पंरहमावर्तते ॥ ॥ ।

२९

३

तद्वचनंकर्त्तव्यमतोविचिकित्सारहितोहंताटकावधंकरिष्यामीतिपूर्वेणान्वयः ५ तीव्रंपरुषश्रवणंच ६
वित्रस्ताः भीताः मोहिताव्याकुलचित्ताव्याकुलचित्ताजाता ७ तंशब्दंश्रुत्वाचक्रुद्धासमशब्दोयत्रयतोनिःसृ
तः तंतमभिनिध्यायवाहूनिः सरणावधिदेशंलक्षीकृत्याभ्यद्रवदितियोजना ८ प्रमाणेनशरीरप्रमाणे।

एवमुक्त्वाधनुर्मध्येवद्धामुष्टिमरिंदमः ज्याघोषमकरोत्तीव्रंदिशःशब्देननादयन् ६ तेन
शब्देनवित्रस्तास्ताटकावनवासिनः ताटकाचसुसंक्रुद्धातेनशब्देनमोहिता ७ तंशब्द
मभिनिध्यायराक्षसीक्रोधमूर्छिता श्रुत्वाचाभ्यद्रवत्क्रुद्धायत्रशब्दोविनिःसृतः ८ तां
दृष्ट्वाराघवःक्रुद्धोविकृतोविकृताननां प्रमाणेनातिवृद्धांचलक्ष्मणंसोभ्यभाषत ९ ।
पश्यलक्ष्मणयक्षिण्याभैरवंदारुणंवपुः भिद्येरन्दर्शनादस्याभीरूणांहृदयानिच १०
एतांपश्यदुराधर्षांमायाबलसमन्वितां विनिवृत्तांकरोम्यद्यहृतकर्णाग्रनासिकां ११ ।

न ९ भैरवंभयंकरंदारुणंघोरंअस्यवपुषः बोध्यर्थः अभीरूणामपीत्यर्थः १० एतामितिविनिवृत्तां अस्म
त्संमुखागमनात्पराङ्मुखींपलायितामितियावत् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रा॰ कर्णादिहरणमात्रे हेतुमाह नहीति वीर्यं परपराभवशक्तिं गतिं आकाशादिगतिं पाणिपादच्छेदेनेति। दोषः तावतैव देशहितस्य गुरुवचनानुष्ठानस्य च सिद्धाः स्त्रूरविगर्हितः स्त्रीवधोऽनुचित इति भावः रामैमेव
बा॰ टी॰ विश्वामित्रस्तु ब्रह्मर्षिर्हुंकारेण तं विसृज्य मानुष बुद्धा राममेवेत्यर्थः १२ नो राम सं ब्रुवमभिधावंती जयं च जयवि॰
५०

न ह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षितां वीर्यं चास्या गतिं चैव हन्यामिति हि मे मतिः १२ ए
वं ब्रुवाणे रामे तु ताटका क्रोधमूर्छिता उद्यम्य बाहू गर्जन्ती राममेवाभ्यधावत १३ वि
श्वामित्रस्तु ब्रह्मर्षिर्हुंकारेणाभिभर्त्स्य तां स्वस्ति राघवयोरस्तु जयं चैवाभ्यभाषत १४ उ
द्धुन्वाना रजो घोरं ताटका राघवावुभौ रजोमेघेन महता मुहूर्तं सा व्यमोहयत् १५ ततो।
मायां समास्थाय शिलावर्षेण राघवौ अवाकिरत् सुमहता ततश्चुक्रोध राघवः १६ शिला
वर्षं महत् तस्याः शरवर्षेण राघवः प्रतिवार्योपधावन्त्याः करौ चिच्छेद पत्रिभिः १७।

घयका शिषंच॰ ५४
घोरं रजः उद्धुन्वाना नेत्यन्वयः रजोमेघेन रजोंधकारेण १५ मायां समास्थाय शृंगं तर्पानं गतेति यावत् चुक्रो
धनीव मयप्रकाशानितांगविमृश्यतिबोधः १६ पत्रिभिरिति एकैकस्य बहुधा छेदनाभिप्रायेण १७ १७॥ ५०

हतेकर्णाग्रनासिकाचयस्याम्तां १८ अनेकशः रूपाणिकृत्वाअंतर्धानंगतासतीस्वमाययाराघवौमोहयंतीभैर॰
वंअश्मवर्षमित्यन्वयः २० घृणयाअलंस्त्रीइतिघृणामाक्लिन्नर्थः दुष्टचारिणीमायाशक्त्याअंतर्धानेनपाषाणा।

ततश्छिन्नभुजांश्रांतामभ्याशेपरिगर्जतीं सौमित्रिरकरोत्क्रोधाद्धृतकर्णाग्रनासिकां १८
कामरूपधरासद्यःकृत्वारूपाण्यनेकशः अंतर्धानंगतायक्षीमोहयंतीस्वमायया १९ ॥
अश्मवर्षंविमुंचंतीभैरवंविचचारसा ततस्तावश्मवर्षेणकीर्यमाणौसमंततः २० दृष्ट्वा।
गाधिसुतःश्रीमानिदंवचनमब्रवीत् अलंतेघृणयारामपापैषादुष्टचारिणी २१ यज्ञवि।
घ्नकरीयक्षीपुरावर्धेतमायया वध्यतांतावदेवैषापुरासंध्याप्रवर्तते २२ रक्षांसिसं॥
ध्याकालेतुदुर्धर्षाणिभवंतिहि इत्युक्तःसतुतांयक्षीमश्मवृष्ट्याभिवर्षिणीं २३।

दिदृष्टिकर्त्रीश्र

तोघृणाअनविता २१ घृणानोचितेत्यत्रहेतुंतत्रमाहयक्षविघ्नकरीतिमाययापुरायावद्वर्धेततावत्तत्कालात्पूर्वे॰
वपूर्वमेवएषावध्यतांसायंसंध्यापुराप्रवर्तते यावन्नप्रवर्तते इत्यर्थः किंततस्तत्राहरक्षांसीति अश्मवृष्ट्याभिकारिणीं॰

श्री०
रा० बा
९८

शब्दमात्रेणालक्ष्यमप्यकृं निश्चित्य वेधकर्तृत्वसामर्थ्यं दर्शयन्निमर्थः २४ अभिदुद्रावेति अंतर्धानं हित्वेति शेषः २५
भीमसंकाशां भीमरूपां २६ अभिपूजयन् अउभावप्यर्षिः सहस्राक्षः विश्वामित्रमुवाचेत्यन्वयः २७ किमुक्त

दर्शयन्नाह वेधिनं तां रोधुं समायकैः साऽरुद्धा बाणजालेन मायाबलसमन्विता २४।
अभिदुद्राव काकुत्स्थं लक्ष्मणं च विनेदुषी तामापतंतीं वेगेन विक्रांतामशनीमिव २५।
शरेणोरसि विव्याध पपात च ममार च तां हतां भीमसंकाशां दृष्ट्वा सुरपतिस्तदा २६ सा
धु साध्विति काकुत्स्थं सुराश्चाप्यभिपूजयन् उवाच परमप्रीतः सहस्राक्षः पुरंदरः २७ सु
राश्च सर्वे संहृष्टा विश्वामित्रमथाब्रुवन् मुने कौशिक भद्रं ते सेंद्राः सर्वे मरुद्गणाः २८।
तोषिताः कर्मणानेन स्नेहं दर्शय राघवे प्रजापतेः कृशाश्वस्य पुत्रान्सत्यपराक्रमान् २९।

वेतमस्त्राण्युनेरिति २८ तोषिता वयमिति शेषः अनेन कर्मणा वनप्रवर्तिततताटकावधरूपेण स्नेहं दर्शय म
हेशायमाः शिष्यहितेषु स्नेहं त्यापारप्रवर्तेयमतमेवव्यापारमाह प्रजापतेरिति २९ ॥ ॥ ॥

९८

तपसाज्ञानेनबलेनचभृतः पूर्णः तेनचदानस्यपात्रभूतस्तुराघवः अतस्तस्मैकृष्णायपुत्रान्निवेदयतयालब्धा
नामेवास्माणांकार्यंतमवमितिभावः अनुगमनेसुस्सूषणोटदनिश्चयः ३१ पूजयंतस्तवंतोजग्मुरित्यन्वयः प्र

तपोवलभृतोब्रह्मन्राघवायनिवेदय पात्रभूतश्चतेब्रह्मंस्तवानुगमनेरतः ३० कर्तव्यंच
महत्कर्मसुराणां राजनन्दना एवमुक्तासुराः सर्वेजग्मुर्हृष्टाविहायसं ३१ वि।
श्वामित्रंपूजयंतस्ततः संध्याप्रवर्तते ततोमुनिवरः प्रीतस्ताटकावधतोषितः ३२।
मूर्ध्निराममुपाघ्रायइदंवचनमब्रवीत् इहाद्यरजनींरामवसामशुभदर्शन ३३ श्वः
प्रभातेगमिष्यामस्तदाश्रमपदंमम विश्वामित्रवचःश्रुत्वाहृष्टोदशरथात्मजः ३४
उवासरजनींतत्रताटकायावनेसुखं मुक्तशापंवनंतच्चतस्मिन्नेवतदाहनि ३५। र
मणीयंविवभ्राजयथाचैत्ररथंवनं निहत्यतांयक्षसुतांसरामःप्रशस्यमानःसुरसि

वर्ततेइमस्यस्मेतिशेषः ३२ ३३ मुक्तशापंप्रपतातोयद्वंयदालब्धशापयाताटकयामुक्तं ॥ ३४ ३५ ॥

रा.
बा. टी.
५५

प्रभातवेलां प्रतिबोध्यमानम् इति विश्वामित्रेणोभ्भादिन जागारेति शेषः २८ इति रामायणे टीकायां षड्विंशः
सर्गः २८ अथेति उष्येति शेषः प्रहस्य विजयशालिरामदर्शनजसंतोषजो हासः १ सर्वशः सर्वाणि देवासुर

उवास तस्मिन्मुनिना सहैव प्रभातवेलां प्रतिबोध्यमानः २७ इत्यार्षे रामायणे सर्गः २८ अथ तां
रजनीमुष्य विश्वामित्रो महायशाः प्रहस्य राघवं वाक्यमुवाच मधुरस्वरं १ परितुष्टोस्मि भद्रं ते रा-
जपुत्र महायशाः प्रीत्या परमया युक्तो ददाम्यस्त्राणि सर्वशः २ देवासुरगणान्वापि सगंधर्वोर-
गानपि यैरमित्रान्प्रसह्याजौ वशीकृत्य जयिष्यसि ३ तानि दिव्यानि भद्रं ते ददाम्यस्त्राणि सर्वशः
दंडचक्रं महद्दिव्यं तव दास्यामि राघव ४ धर्मचक्रं ततो वीर कालचक्रं तथैव च विष्णुचक्रं तथा-
त्युग्रमैंद्रं चक्रं तथैव च ५ वज्रमस्त्रं नरश्रेष्ठ शैवं शूलवरं तथा अस्त्रं ब्रह्मशिरश्चैव ऐषीकमपि
राघव ६

गणान्वापि वाशब्दश्चार्थे गंधर्वोरगसहिता देवासुरगणा रूपशत्रून् अपि प्रसह्य बलेन जयिष्यसि जेष्यसि।
निर्विशेषेण यातनया वशीकृत्य संमोहनास्त्रादिना जेष्यसि अन्यैरप्यतकागणानेति भावः ३ दंडचक्रादि

गदे हे मोदकीप्रि।
मूलवतं मूलवतनामकं कं चित्समूलवरमिति पाठः ब्रह्मशिरो हं ब्रह्मास्त्रादन्यत् ८ गदे हे मोदकीप्रि। ९
त्वरे मंते हे गदे गदासं तत्केयूरे १८ प्रस्तं चवारुणास्त्रं चेत्यर्थः शुष्कार्द्रं संतकेहे प्रशानी अशनि संज्ञकेयूरे ९

ददामि ते महावाहो ब्रह्मास्त्रमनुत्तमं गदे द्वे चैव काकुत्स्थ मोदकी शिखरे शुभे ७ प्रदीप्ते नरव्याघ्र
हेलप्रयच्छामि नृपात्मज धर्मपाशमहं राम कालपाशं तथैव च ८ वारुणं पाशमस्त्रं च ददाम्यह
मनुत्तमं अशनी द्वे प्रयच्छामि शुष्कार्द्रे रघुनंदन ९ ददामि चास्त्रं पैनाकमस्त्रं नारायणं तथा आ
ग्नेयमस्त्रं दयितं शिखरं नाम नामतः १० वायव्यं प्रथमं राम ददामि तव चानघ क्रस्त्रं हयशिरो
नाम क्रौंचमस्त्रं तथैव च ११ शक्तिद्वयं च काकुत्स्थ ददामि तव राघव कंकालं मुसलं घोरं कापाल
कि मथ किंकिणी १२ वधार्थं रक्षसां यानि ददाम्येतानि सर्वशः वैद्याधरं महास्त्रं च नंदनं नाम नामतः १३

पिनाकिन इदं पैनाकं दयितं अग्रे विति शेषः शिखरं नाम शिखरमिति प्रसिद्धं १० प्रथमं मुख्यं ११ कंकालादीन्य
स्त्रधार्यास्त्राणि १२ यानि रक्षसां वधार्थं समर्थानि एतानि ददामीत्यन्वयः १३ ॥ १३ ॥ १३

101

रा॰

बा॰ टी॰

१०

विद्याधरं विद्याधरं संबंधिनंदनंनामअस्त्रमिरलमित्यन्वयः यतोऽस्मात्दर्सीनां प्रादुर्भाव इतिभावः १४ दर्शी
ताख्यं प्रशमनंरिपूणां क्रोधशामकमस्त्रंविलापनंपरिदेवनकारकं १५ मादनंशत्रूणां मदजनकं

अस्त्रमिरलंमहाबाहोददामिनृवरात्मज गांधर्वमस्त्रंदयितंमोहनंनाममनामतः १४ प्रस्वापनं
प्रशमनंदद्मिसौम्यंचराघव वर्षणंशोषणंचैवसंतापनविलापने १५ मादनंचैवदुर्धर्षं
कंदर्पदयितंतथा गांधर्वमस्त्रंदयितंमानवंनाममनामतः १६ पैशाचमस्त्रंदयितंमोहं
नंनाममनामतः प्रतीक्षनरशार्दूलराजपुत्रमहायशः १७ तामसंनरशार्दूलसौमनंचमहा
बलं संवर्तंचैवदुर्धर्षंमौसलंचनृपात्मज १८ सत्यमस्त्रंमहाबाहोतथामायामयंपरं सौरंतेजः
प्रभंनामपरतेजोपकर्षणं १९ सोमास्त्रंशिशिरंनामत्वाष्ट्रमस्त्रंसुदारुणं दारुणंचभगस्या
पिशीतेषुमथमानवं २० एतान्रामममहाबाहोकामरूपान्महाबलान् गृहाणपरमोदारान्क्षिप्र
मेवनृपात्मज २१

दुर्धर्षंमित्याचस्याविशेषणं १६ प्रतीक्षगृहाण १७ मौसलंप्राग्वत्स्त्रमलादस्मत १८ १९ २० २१

मंत्रग्राममस्त्राणांमंत्रसमूहंर्नितोत्‌ ननु बलातिबलादानप्रसंगेपिमंत्रग्रामंग्रहणोत्तमत्वमितिपुनरस्त्रदानंविफलमिति।
वेन्नग्रहणोत्पेवतत्रोक्तत्वात्‌ नवदसाविति तेन तत्कालोपयोगिबलयोरेवतत्रदानं इतरेषांतन्यत्रेतिविवेकइतिक
तकहुतः वस्तुतोबलातिबलेमंत्रसमूहात्मके इतितद्रूपंमंत्रग्राममितितत्रार्थइतिनदोषइतिपरे २२ सर्वैरितियेषांउक्तादि
व्यास्त्राणांसर्वसंग्रहणंसर्वधारणंसर्वथारणंकर्तृदैवतैरपिदुर्लभंदुष्करंदेवाअपियत्किंचिदस्त्रमेवजानंतीतिभावः ता

स्थितस्तत्रप्राङ्मुखोभूत्वाशुचिर्मुनिवरस्तदा ददौरामायसुप्रीतोमंत्रग्राममनुत्तमं २२ सर्वसंग्रहणंयेषांदैव
तैरपिदुर्लभं तान्यस्त्राणितदाविप्रोराघवायन्यवेदयत्‌ २३ जपतस्तुमुनेस्तस्यविश्वामित्रस्यधीमतः उप।
तस्थुर्महार्हाणिसर्वाण्यस्त्राणिराघवम्‌ २४ ॥

तिसर्वाण्यस्त्राणिराघवंरामं घविश्वामित्रःन्यवेदयत्‌ दत्तवान्‌।
राघवायरामलक्ष्मणाभ्यांचेत्यपिवोध्यंउभयपदेवोभयोरुपदेशइतिवोध्यं २३ जपतः रामायदातुंतेषांवीर्यवत्त्वासं।
पादनायेतान्यस्त्राणिजपतइत्यर्थः उपतस्थुः गृहीतभामंडलवपूंषिउपतस्थुः उपस्थितानि
विश्वामित्रनियोगेनरामंच उपतस्थुः २४ ॥ ॥ ३४ २५ ॥ ॥

102

वा.
वा. टी.
१०१

सर्वे प्रसन्नदेवाः मुदिताः स्वाधिदेवतत्वामसंबंधेन तुष्टाः किंकराः अंगीकृतदासत्वाः २५ २९ समालभ्य उपस्पृश्य मानसाः सदा मनःस्थिताः यद्यपि भगवतो रामस्य सर्वं विदितमेव तथापि विद्यागुरूपदेशग्रहीतैव फलदाना न्यथेति लोकान् बोधयितुं विश्वामित्रत उपदेशग्रहणमिति बोध्यं २७ इति रामायणे बालकांडे सप्तविंशः २७

कृताश्च मुदिता राम मंत्राः सर्वे कृतांजलयस्तदा इमे च परमोदाराः किंकरास्तव राघव २५ यद्यदिच्छसि भद्रं ते तत्सर्वं करवाम वै ततो रामः प्रसन्नात्मा तैरित्युक्तो महाबलैः २९ प्रतिगृह्य च काकुत्स्थः समालभ्य च पाणिना मानसा मे भविष्यध्वमिति तान्यभ्यचोदयत् २७ ततः प्रीतमना रामो विश्वामित्रं महामुनिं अभिवाद्य महातेजा गमनायोपचक्रमे २८ इत्यार्षे रामायणे बालकांडे सप्तविंशः २७ प्रतिगृह्य ततोऽस्त्राणि प्रहृष्टवदनः शुचिः १ गच्छन्नेव च काकुत्स्थः विश्वामित्रमथाब्रवीत् गृहीतास्त्रोऽस्मि भगवन् दुराधर्षः सुरैरपि अस्त्राणां त्वहमिच्छामि संहारान्मुनिपुंगव २ ॥

गच्छन्नामित्युन्नसंहारान् त्वानमिति शेषः उपसंहारापरिज्ञाने पुनः प्रयोगानर्हतया प्राप्तप्रापकत्वात् तज्ञानेच्छां महात्मानाम पृच्छत् स्वस्य मंत्रविशेषेण पुनः स्वात्मनि स्थापनं २ ॥ २ ॥ ॥ २

एवमितिङ्कास्त्राणां संहारमार्गमुपदिश्य प्रश्नानंतरं तत्प्रसंगतः परमऋषिः अस्त्राणामप्यस्त्राणामुपदि
शति स्म तदाह सत्यवंतमित्यादि ददामीति सर्वत्र शेषः ५० सार्चिमाल्यादयोन्येतानपि ददामीत्यर्थः २९ भा

एवं ब्रुवति काकुत्स्थे विश्वामित्रो महातपाः संहारान्व्याजहाराथ धृतिमान्सुव्रतः शुचिः १ सत्य
वंतं सत्यकीर्तिं धृष्टं रभसमेव च प्रतिहारतरं नाम पराङ्मुखमवाङ्मुखम् ४ लक्ष्यालक्ष्याविमौ चैव दृढनाभसु
नाभकौ दशाक्षशतवक्त्रौ च दशशीर्षशतोदरौ ५ पद्मनाभमहानाभौ दुंदुनाभसुनाभकौ ज्योति
षं कृशनं चैव नैराश्यविमलावुभौ ६ यौगंधरविनिद्रौ च दैत्यप्रमथनौ तथा शुचिबाहुर्महाबाहु
र्निष्कलिर्विरुचस्तथा ७ सार्चिर्माली धृतिर्माली वृत्तिमान्रुचिरस्तथा पित्र्यः सौमनसश्चैव वि
धूतमकरावुभौ करवीरकरं चैव धनधान्यौ च राघव ८ कामरूपं काममरुचिं मोहमावरणं तथा
जृंभकं सर्पनाभं च पंथानवरुणौ तथा ९ कृशाश्वतनयान्राम भास्वरान्कामरूपिणः प्रती
च्छ मम भद्रं ते पात्रभूतोसि राघव १० बाढमित्येव काकुत्स्थः प्रहृष्टेनांतरात्मना दि
व्यभास्वरदेहाश्च मूर्तिमंतः सुखप्रदाः ॥

मवाङ्मुखम्

स्वरान्तेजोमया
न प्रतीच्छ इत्याह पात्रभूतः अस्त्रदानस्येति शेषः १० मममन्त्रः बाढमित्यंगीकारे प्रहृष्टेनांतरात्मनापलक्षितः

रितिशेषः मूर्तिमंतः सशरीराः तत्र ॥

रा॰
बा॰ टी॰
१२

बद्धांजलिपुटाः प्रकामनम्राः तेषु तेषु अंजलेः पुटं संश्लेषो येषां ना टप्पः १२ इमे सस्त्रं संनिहिता वयमिति शेषः शा

धि आज्ञापय १३ गम्यतां इदानीमिति शेषः कार्यकालेषु मानसाः मनसि संनिहिता भूत्वा साहाय्यं करिष्याथ

प्रदक्षिणां सकलस्त्रदेवताधिदेवतारूपत्वाद्रामस्य प्रदक्षिणाकरणं १५ एतदुक्तं ततस्तु रामः काकुत्स्थः

केचिदंगारसदृशाः केचिद्धूमोपमास्तथा वेद्यर्कसदृशाः केचित्प्रह्वांजलिपुटास्तथा १२ रा

मं प्रांजलयो भूत्वा ब्रुवन्मधुरभाषिणः इमे स्म नरशार्दूल शाधि किं करवाम ते १३ गम्यतामिति ता

नाह यथेष्टं रघुनंदनः मानसाः कार्यकालेषु साहाय्यं मे करिष्यथ १४ अथ ते रामम् आमंत्र्य कृत्वा

चापि प्रदक्षिणं एवमस्त्विति काकुत्स्थमुक्त्वा जग्मुर्यथागतं १५ स च तान्राघवो ज्ञात्वा विश्वामित्रं म

हामुनिं गच्छन्नेवाथ मधुरं श्लक्ष्णं वचनमब्रवीत् १६

रा सनाद्धृतवादिनः लक्ष्मणाय च तान् सर्वान् स्वचाप्ताग्नरकनंदनः स संहारास्त्रसंहृष्टः श्रीमांस्तस्मै।

मद्वेदयदित्यपि कं च हृष्यतेतस्य त्रितिमवल्लातिवल्लयोरिवास्त्राणामपि युगपदुभयोर्विश्वामित्रेणोपदेश

दानमस्त्रवान्समानाउपदिष्टान् अस्त्रान् राघवो रामः ज्ञात्वा मंत्रतो ज्ञात्वा ततः प्रयोगतस्त्रेति शेषः १६

२७

१२

मेरुमेकाशंकास्पीतनैविधाच्च हृष्टपंडंहृष्टसमहः किंवनसंबंधिडतत्राश्रमसंबंधीतिश्रुतः १७ वल्गु
भाषैः मधुभाषैः १८ रोमहर्षणात् नाटकायानिजेनीकरणात् नसभयानकतेनरोमहर्षणात् श्रुनया
देशमपन्नवेवनयाइदमाश्रमपदंनवगाह्यामि १९ आश्रमपदंतेनिर्णीयतत्कस्येतिदेशेनिष्टव्यतिसर्वं

किमेतन्मेघसंकाशेपर्वतस्याविदूरतः हृष्टवंउमितोभातिपरंकौतूहलंहिमे ९ दर्शनीयम
गाकीर्णमनोहरमतीवच नानाप्रकारैः शकुनैर्वल्गुभाषैरलंकृतं १० निःसृताः स्मोमुनिश्रेष्ठ
कांताराद्रोमहर्षणात् अनयात्वगाह्यामिदेशस्सुखवत्तया ११ सर्वंमेशंसभगवन्कस्या
श्रमपदंत्विदं संप्राप्तायत्रतेपापाब्रह्मघ्नादुष्टचारिणः १२ तवयज्ञस्यविघ्नायदुरात्मानोमहात्म
नेभगवंस्तस्यकोदेशः सायत्रतवयाज्ञिकी १३ रक्षितव्याक्रियाब्रह्मन्मयावध्याश्चराक्षसाः
एतत्सर्वंमुनिश्रेष्ठश्रोतुमिच्छाम्यहंप्रभो १४
वशोमसर्वंशाखावि
वक्तितेजितवास्यतरेख्यमेवाह
मेत्रामाइतिनवग्रहमाः नवयत्तस्युविघ्नाययत्रसंप्राप्ताः सदेशः १५ यत्रचतवयाज्ञिकीक्रियामया
रक्षितव्यायत्रचराक्षसावध्याः भगवंस्तस्यतदाश्रमस्यकोदेशः कः प्रदेशः इत्यन्वयः १२ २२

वि 104

रा॰
बा॰ टी॰
२९

इतिरामायणेवाल्मीकीयेटीकायामष्टाविंशःसर्गः २८ तस्यरामस्यपरिपृच्छतोवचनंश्रुत्वेतिशेषःआख्या-
तुमुपचक्रमेइतिशेषः १ इहवनेइहप्रदेशे २ तपश्चरणायोगार्थंसवायेनलोकप्रवर्तनायसतत्तपश्चरणंवाम-
नस्यकरिष्यमाणवामनावतारस्यविष्णोःपूर्वाश्रमःवामनावतारात्पूर्वकालेतपोयोगार्थंपरिगृहीत

इत्यार्षेरामायणेबालकांडेऽष्टाविंशःसर्गः २८ अथतस्याप्रमेयस्यवचनंपरिपृच्छतः वि-
श्वामित्रोमहातेजाव्याख्यातुमुपचक्रमे १ इहराममहाबाहोविष्णुर्देवनमस्कृतः वर्षाणिसुबहू-
नीहतथायुगशतानिच २ तपश्चरणयोगार्थमवासत्तमहातपाः एषपूर्वाश्रमोरामवामनस्यम-
हात्मनः ३ सिद्धाश्रमइतिख्यातःसिद्धोह्यत्रमहातपाः एतस्मिन्नेवकालेतुराजावैरोचनिर्बलिः ४
निर्जित्यदैवतगणान्सेंद्रान्सहमरुद्गणान् कारयामासतद्राज्यंत्रिषुलोकेषुविश्रुतः ५

आश्रमः ३ सिद्धाश्रमत्वव्यवहारेबीजमाहहियस्मात् अत्रमहातपाविष्णुःतपःसिद्धोजातइतिएतस्मि-
न्कालेविष्णोस्तपःकाले ४ मरुद्गणान्आवहादिवायुगणान् कारयामासराज्यमितिशेषः चकारेत्यर्थः ५
यद्वाऐंद्रादिराज्यंस्वीयैःकैश्चिदेवकारयामासेत्यर्थः ५ ५ ५ ॥

२९

बलेर्यजमानस्य च व्यवहारे द्वेतिरोधः साग्निपुरोगमाः पुरोगमेनाग्निना सहिताः तत्पुरुषः अग्निमुखत्वाच्च
देवानां तस्मिन् पुरोगमत्वं स्वयमेवागमनं न तु हूतमुखेन १ यजते कर्त्रभिप्रायत्वादात्मनेपदं ननु अस्य सव
लैर्देवैर्हविषो योगा[illegible]व्यपपत्तिः यागतर्पणीयदेवताभावात् इन्द्रादीनां तत्त्वहेतुत्वात् न च शक्यमात्रं देतेति युक्तं अ
पि वा तत्र मानं न देवतायां विग्रहवत्त्वे मीमांसायां सिद्धान्तितत्वादिति चेन्न कर्मदेवाजानदेवभेदेन देवा

यज्ञं वक्तारस्य महानस्य देहो महाबलः बलेस्तु यजमानस्य देवाः साग्निपुरोगमाः समागम्य स्वयं
चैव विस्मृत्य चरिता हामुने १ बलिर्वैरोचनिर्विश्वैर्यजते यज्ञमन्त्रमे असमास्तवोतेन तस्मिन् स्वकार्यमभि
पद्यते १

नां द्वैविध्यात् तत्र ये कर्मणा देवत्वं प्राप्ताः ते कर्मदेवाः आजानदेवास्तु यज्ञमंत्रार्थभूताः मंत्रेणाभिसमे
त्याः कर्मदेवेभ्यः प्राचीनाः पूर्वतनकर्मदेवानां हेयत्वेपि आजानदेवानां यजेत प्रयतेन दोषः विप्रकर्तारोप्यत्र क
र्मदेवाः पूर्वयज्ञाद्युपकाराभावात् आजानदेवानामेव यष्टव्यदेवतात्वाभावात् कर्मदेवानां तु तस्यैव अत्र
वेन्द्रादीनां यज्ञादिश्रवणानामप्रसक्तेः इत्यन्यत्र विस्तरः असमास्तवेत असमाः स्तयमेतेस्वकार्य आगमीयानां देवाः

105

वा॰
रा॰ टी॰
१८४

अस्मभाभ्रवते। इत्युक्तेः प्रयोजनं दर्शयन् तत्संपादने उपायमपि त्वयमेव वदेति ये चेति अभिवर्तन्ते प्राप्नुवंति
इत्यस्त्वतः नानादेशेभ्यः यज्ञगोभूहिरण्यादिविषये यच्च वस्तु याचंते तेभ्यः तत्सर्वं यथावत् यत्तस्मात् प्रणायत्र
वमानादिरहितं सत्कारपूर्वं प्रयच्छन्ति च प्रवार्थ्य ८ मायासंततताच्छादनेन प्राकृतमर्त्यादिभाव प्रकाशि
का शक्तिः तस्या योगसंबंधः तमाश्रितः वामनत्वप्राप्तावपि हेतुः वामनरूपस्यात्याश्चर्यत्वेन तत्साध्यं नादि

येचैनमभि वर्तंते याचितारस्तत्स्ततः यच्च यत्र यथावच्च सर्वं तेभ्यः प्रयच्छति ८ सत्वेत्वरहितार्थो
यमायायोगमुपाश्रितः वामनत्वंगतो विस्तोकरुकल्याणमुत्तमं ९ एतस्मिन्नंतरे राम कश्यपोऽग्नि
समप्रभः अदित्या सहितो राम दीप्यमान इवौजसा १० देवीसहायो भगवान्दिव्यं वर्षसहस्रकं
व्रतं समाप्य वरदं तुष्टाव मधुसूदनं ११

ष यस्यावशेषं यजमानकर्तव्यं तथा तद्रूपं प्रार्थनं ९ एतस्मिन्नंतरे देवै वामनावतारप्रार्थनसमये राम इति
हि संबोधनं स्वाश्रमसन्निधानेन रामेष्टत्वं सूचितं महत्वं कश्यपेन तद्वृत्तातिशयाच्च बोध्यं १० अदित्या सहितो व
तं समाप्य देवी महायत्वं शोवस्तवयः देवी अदितिरेव महादेवी सरस्वती वरदं विष्णुं पश्चात् प्राप्तुं देशेन

१८ क्षितवंगतोविसोकरुतेज्ञवं ॥

न्तोऽत्र प्रकारमाह तपोमय इत्यादि अत्र मयो घ्यजइतिवत्प्रचुरतपो ऽग्रत्त्वमित्यर्थः नात्वतापेवंकिमतग्राह त
पोराशिं इत्यादिना सकलतपोजन्यफलप्राप्त्याभरावतत्तपोराशित्वं नच तपसा त्वंच्युहेतत्कौनिवायःग्रत
आह तपोमूर्तिमितिएवंच तपसस्तदनन्यत्वेन नाहेतत्त्वानिः तपात्मकमिति च नर्थकोविधानमितिकप्रत्यये

तपोमयं तपोराशिं तपोमूर्तिं तपात्मकं तपसा त्वां सतप्तेन पश्याभिपुरुषोत्तमं १२ शरीरेतव पश्या
मि जगत्सर्वमिदंप्रभो त्वमनादिरनिर्देश्य स्त्वामहं शरणं गतः १३ तमुवाच हरिः प्रीतः कश्यपं धू
तकल्मषं वरं वरय भद्रं ते वरार्होसि मतो मम ॥ १४ तच्छ्रुत्वा वचनं तस्य मारीचः कश्यपोब्रवीत् अ
दित्या देवतानां च मम चैवानुयाचितं १५ वरं वरद प्रीतो दातुमर्हसि सुव्रत पुत्रत्वेगच्छ भगवन्नदि
त्या मम चानघ १६

तपनेन तपः ज्ञानेन तपश्चालोचनं इतिभावनवसारात् तदात्मके ज्ञानस्वरूपमित्यर्थः अतएवञ्च तप्ततपसा
दृष्टम प्रकारं तपसा त्वामिति १२ दृश्यमानेचैवेराजेरूपमित्याह शरीरेइत्यादि अनिर्देश्यः अशक्य
पोरिच्छेदः १३ वरंश्रमीहेवरार्हः दिव्यवर्षसहस्रतपसा वरदानयोग्यः १४ मारीचः मरीचिपुत्रः अदित्याइ

बा॰ यवीयान् कनिष्ठः साहाय्यं बलिनिग्रहरूपं १७ अयं यत्राश्रमे तपो मया देवैश्च तप्तस्य समेतस्यार्थः सिद्धेः एतदाश्र
रा॰ टी॰ मस्थानि साध्यते तपःकर्माणि सिद्धे सति निष्ठत्वे सति प्रयोजनाभावात् इतः उत्तिष्ठ देवकार्यायेति शेषः १८

१-४

भ्राता भव यवीयोस्त्वं शक्रस्यासुरसूदन शोकार्तानांतु देवानां साहाय्यं कर्तुमर्हसि १७ अयं सिद्धा
श्रमो नाम प्रसादात्ते भविष्यति सिद्धे कर्मणि देवेश उत्तिष्ठ भगवन्नितः १८ अथ विष्णुर्महातेजा अ
दित्यां समजायत वामनं रूपमास्थाय वैरोचनिमुपागमत् १९ त्रीन्पदानथ भिक्षित्वा प्रतिगृह्य
च मेदिनीं आक्रम्य लोकान् लोकार्थी सर्वलोकहिते रतः २० महेंद्राय पुनः प्रादान्नियम्य बलिमो
जसा त्रैलोक्यं स महातेजाश्चक्रे शक्रवशं पुनः २१ तेनैव पूर्वमाक्रांत आश्रमः श्रमनाशनः मा
यापि भक्त्या तस्यैव वामनस्योपभुज्यते २२ एतमाश्रममायांति राक्षसा विघ्नकारिणः अ
त्रैव पुरुषव्याघ्र हंतव्या दुष्टचारिणः २३

[illegible] १८ अथ देवकार्य नियोगानंतरं १९ आक्रम्य त्रिभिः पादैरिति शेषः लोकार्थी त्रैलो
क्याक्रमणार्थी २० नियम्य बद्ध्वा २१ तेनैव वामनावतारकर्त्रा मयापि विश्वामित्रेण २२ पूर्वमागतेनकृत

द्वितीयप्रश्नोत्तरमाह एतमिति २३

८५

अनन्तरं सर्वोत्तमं हे तात तदेतदाश्रमपदं यथा मम स्वभूतं तेन यथा तवापि विश्वस्वतामत्वादिति शुद्धो भिसंधिः २४
पुनर्वसू हे तारे २५ उत्पत्त्योत्पत्त्यसंतोषातिशयादिति शेषः २६ २७ अथैव अवे शादिन पवकालविलंबेफ

अथ गच्छामहे राम सिद्धाश्रममनुत्तमं तदाश्रमपदं तात तवाप्येतद्यथा मम २७ इत्युक्त्वा परमप्रीतो
गृह्य रामं सलक्ष्मणं प्रविशन्नाश्रमपदं व्यरोचत महामुनिः २८ शशीव गतनीहारः पुनर्वसुसमन्वितः
तं दृष्ट्वा मुनयः सर्वे सिद्धाश्रमनिवासिनः उत्पत्योत्पत्य सहसा विश्वामित्रमपूजयन् २९ यथार्हं चक्रिरे
पूजां विश्वामित्राय धीमते तथैव राजपुत्राभ्यामकुर्वन्नतिथिक्रियां ३० मुहूर्तमथ विश्रान्तौ राजपु
त्रावरिंदमौ प्रांजली मुनिशार्दूलमूचतू रघुनंदनौ ३१ अद्यैव दीक्षां प्रविश भद्रं ते मुनिपुंगव सि
द्धाश्रमोयं सिद्धः स्यात्सत्यमस्तु वचस्तव ३२ एवमुक्तो महातेजा विश्वामित्रो महानृषिः प्रविवे
श तदा दीक्षां नियतो नियतेंद्रियः ३३ कुमारावपि तां रात्रिमुषित्वा सुसमाहितौ प्रभातकाले चो
लाभावात् सिद्धः त्वयत्त सिद्ध्याश्रमत्वयं सिद्धस्तः तव वचः अत्रैव प्रकृषव्याघ्रहंतव्याड इत्यादि इतियत्ना
त्सत्यमस्त्वरात्तसत्त्वं यथा हतिष्येइतिभावः ३२ नियतो निगृहीतांतःकरणः ३३ कुमारावपि तां रात्रिम

रा.
बा. टी.
१०९

प्रभुवी अवनादवादसुचित्वसंभावनावाहित्येन प्रकर्षतः अवीनियमेन कर्तव्यं जप्यं समाप्येत्यन्वयः दीक्षा
मध्येनाग्निहोत्रमिति निषेधादग्निहोत्रपदमौपासनहोमपरमिति केचित् ३२ इति रामायणे बालकांडे
टीकायामेकोनत्रिंशः सर्गः २९ अथेति कौशिकं वचो ब्रूमामित्यन्वयः १ तौ निशाचरौ संरक्षणीयौ य।

अथ सूचीपरमं जप्यं समाप्य नियमेन च हुताग्निहोत्रमासीनं विश्वामित्रमवंदतां ३२ इत्यार्षे रामा-
यणे बालकांडे एकोनत्रिंशतमः सर्गः २९ अथ तौ देशकालज्ञौ राजपुत्रावरिंदमौ देशे काले च
वाक्यज्ञावब्रूतां कौशिकं वचः १ भगवन् श्रोतुमिच्छावो यस्मिन्काले निशाचरौ संरक्षणीयौ तावु-
दिनातिवर्तेत तत्क्षणं २ एवं ब्रुवाणौ काकुत्स्थौ त्वरमाणौ युयुत्सया सर्वे ते मुनयः प्रीताः प्रशशंसुर्नृ-
पात्मजौ ३ अद्यप्रभृति षड्रात्रं रक्षतां राघवौ युवां दीक्षां गतो ह्येष मुनिर्मौनित्वं च गमिष्यति ४ तौ तु तद्वच-
नं श्रुत्वा राजपुत्रौ यशस्विनौ अनिद्रं षडहोरात्रं तपोवनमरक्षतां ५ ॥

त संरक्षणीयौ निवारणीयौ ग्रहा।
दिताश्च ः तत्क्षणं मत्क्षणः यथा नातिवर्तेत नातिक्रमेत तथा ब्रूहीत्यन्वयः २२ एवं विश्वामित्रे इष्टे दीक्षया तस्य
मौनिनावरधयदश्च वः अथेति मौनित्वं च गमिष्यति अथापि दीक्षितत्वान्मौन्यवस्थातः परम षड्रात्रं पर्यंततो मौनित्व

यज्ञौसत्रह्वोपरमधान्विनाविन्यर्थः विश्वामित्रंतंयत्तं ९ कालेपंचाहोरात्रलक्षणोषष्ठेहनिआगतेशतिछेदः प्राप्तेइत्य
र्थः यद्वाषष्ठेहनिगतेरात्राविन्यर्थः यतः सज्जः समाहितः एकाग्रचित्तः ७ उपाध्यायोब्रह्मापुरोहितः उपद्रष्टा इ
हब्रह्मविगंतराणामपुयलक्षणंशदंज्वलनंवाह्नसमागमनसूचकउत्पातश्त्याइः ८ दर्भसहितचमससमुवतीम

उपासांचक्रतुर्वीरौयज्ञौपरमधान्विनौ रक्षंतस्मुनिवरंविश्वामित्रमरिंदमौ ९ अथकालेगतेतस्मिन्षष्ठे
हनितथागते सौमित्रिमब्रवीद्रामोयत्तोभवसमाहितः ७ रामस्यैवंब्रुवाणस्यत्वरितस्ययुयुत्सया प्रज
ज्वालततोवेदिः सोपाध्यायपुरोहिता ८ सदर्भचमससुक्कासससमित्कुसुमोच्चया विश्वामित्रेणसहिता
वेदिर्जज्वालसर्त्विजा ९ मंत्रवच्चयथान्यायंयज्ञोसौसंप्रवर्तते आकाशेचमहान्छब्दःप्रादुरासीद्भ
यानकः १० आवार्यगगनंमेघोयथाप्रावृषिदृश्यते तथामायांविकुर्वाणोराक्षसावभ्यधावतां ११ ॥

मित्कुसुमोच्चयैश्चसहिता ३ इदंवेदीज्वलनंयज्ञोद्दीपकं ९ संप्रवर्तते संप्रवर्त्ततेस्म आकाशेमहान्शब्दःप्राद
रासीत् १० यथाप्रावृषिगगनमावार्यगगनमावृत्यमहाशनिमहागर्जनमहावर्षादिविचित्रकार्यकारीयथा
दृश्यतेतथामायांप्रकटीकुर्वाणौराक्षसौअभ्यधावतां ११ ॥ नमः रामःरामः ॥ ११ ॥ ॥

कौतौ कुावसामायेत्यत्राह मारीचवत्स्यादि ग्रवासृजन्वहषुः १२ समुत्तितं ग्रभ्याशे शतिशोव: ग्रभिद्रुतः ग्रभि
तः शाला प्रधावत तत्राह दृष्ट्वा नतो दिवि तान यपपत १३ ग्रापतंतौ समसंसुवमागच्छंतौ १४ मानवास्त्रसमाभूता

मारीचस्य सुवाहुश्च तयोरनुचरास्तथा ग्रागम्य भीमसंकाशा रुधिरौघानवासृजन् १२ तांतेनरुधि
रौघेण वेदिं वीक्ष्य समुक्षितां सहसाभिद्रुतो रामस्तानपश्यत्ततो दिवि १३ तावापतंतौ सहसा दृष्ट्वा राजी
वलोचनः लक्ष्मणं त्वभिसंप्रेक्ष्य रामो वचनमब्रवीत १४ पश्य लक्ष्मण दुर्वृत्तान्राक्षसान्पिशिताशनान् ।
मानवास्त्रसमाधूतानानिलेन यथा घनान् १५ करिष्यामि न संदेहो नोत्सहे हन्तुमीदृशान् इत्युक्त्वा
वचनं रामश्चापे संधाय वेगवान् १६ मानवं परमोदारमस्त्रं परमभास्वरं चिक्षेप परमक्रुद्धो मारीचोरसि
राघवः १७ संपूर्णं योजनशतं क्षिप्तः सागरसंप्लवे स तेन परमास्त्रेण मानवेन समाहतः १८ विचेतनं वि
घूर्णंतं शीतेषुबलपीडितं निरस्तं दृश्य मारीचं रामो लक्ष्मणमब्रवीत १९ ॥

न करिष्यामि पश्येति यो
जना १५ ईदृशानास्थितापुः पोषान दुर्वलात्वा १६ परमोदारं परमश्रेष्ठं १७ स तेनेति स मारीचः सागर
संप्लवे समुद्रमध्ये १८ विचेतनं चेतनया रहितं भ्रमंतं पवविघूर्णमानं शीतेषु वीति मानवास्त्रनामा नरेंदृश्यपट

णीतेषु शीतेषुरित्यपरनामकं मानवास्त्रं मनुसंहितं मनुप्रयुक्तं वियुज्यते वियोजयतीति यावत् २० २१ २२ नि
जघान हरोत्साह रणहर्षकं नाशनं वायव्यास्त्रफलबोध्यं २३ २४ निरीतिकाः निराबाधाः २५ सत्यं कृतं ग्रन्थ

प्रपलक्षणशीतेषु मानवं मनुसंहितं मोहयित्वा नयत्येनं न च प्राणैर्वियुज्यते २० इमानपि वधिष्या
मि निर्घृणान् दुष्टचारिणः राक्षसान् पापकर्मस्थान् यज्ञघ्नान् रुधिराशनान् २१ इत्युक्त्वा लक्ष्मणं चाशु ला
घवं दर्शयन्निव विगृह्य सुमहच्चास्त्रमाग्नेयं रघुनंदनः २२ सुबाहुरसि चिक्षेप स विद्धः प्रापतद्भुवि शेषा
न्वायव्यमादाय निजघान महायशाः राघवः परमोदारो मुनीनां मुदमावहन् २३ स हत्वा राक्षसान्सर्वा
न्यज्ञघ्नान् रघुनंदनः ऋषिभिः पूजितस्तत्र यथेंद्रो विजये पुरा २४ अथ यज्ञे समाप्ते तु विश्वामित्रो महामु
निः निरीतिका दिशो दृष्ट्वा काकुत्स्थमिदमब्रवीत् २५ कृतार्थोऽस्मि महाबाहो कृतं गुरुवचस्त्वया सिद्धा
श्रममिदं सत्यं कृतं वीर महायशाः स हि रामं प्रशस्यैवं ताभ्यां संध्यामुपागमत् २६ इत्यार्षे रामायणे बाल
कांडे त्रिंशः सर्गः ३०

र्थं नामकं कृतमित्यर्थः २६ इति रामायणे बालकांडे टीकायां त्रिंशः सर्गः ३० ॥

३०

रा.
बा टी.
१०८

एवं स्वयज्ञविघ्नविनाशफलकं सर्वासमं वंधानुग्रहं कृत्वा भगवान्विश्वामित्रः सहजलक्ष्मीशक्तिसंवंधा·
त्र्यग्रहाय प्रवर्तत इत्याह अथेति तत्र यज्ञशालायां १ कृतापौर्वाह्णिकी क्रिया याभ्यां तौ अभिवादार्थमिति शेषः
तदुक्तं पूर्वसर्गान्ते संध्यामुपागमदिति सहगतो विश्वामित्रो होमार्थं तथा यज्ञशालामागत इति वा ध्येयं २ मुनिश्रे·

अथ तां रजनीं तत्र कृतार्थौ रामलक्ष्मणौ ऊषतुर्मुदितौ वीरौ प्रहृष्टेनान्तरात्मना १ प्रभातायां तु·
शर्वर्यां कृतपौर्वाह्णिकक्रियौ विश्वामित्रमृषींश्चान्यान्सहितावभिजग्मतुः २ अभिवाद्य मुनिश्रेष्ठं·
ज्वलन्तमिव पावकं ऊचतुर्मधुरोदारं वाक्यं मधुरभाषिणौ ३ इमौ स्म मुनिशार्दूल किंकरौ समुपा
गतौ आज्ञापय मुनिश्रेष्ठ शासनं करवाव किं ४ एवमुक्ते तयोर्वाक्ये सर्व एव महर्षयः
विश्वामित्रं पुरस्कृत्य रामं वचनमब्रुवन् ५ मैथिलस्य नरश्रेष्ठ जनकस्य भवि
ष्यति यज्ञः परमधर्मिष्ठस्तत्र यास्यामहे वयं ६ ॥ नमोः ॥

ष्टं विश्वामित्रं ३ सेत्यव्ययं ४ तयोरि
ति ताभ्यामित्यर्थे विश्वामित्रं पुरस्कृत्य विश्वामित्रानुमतिका इति यावत् ५ मैथिलस्य मिथिलाधिपतेः परमधर्मि
ष्ठः उत्कृष्टातिशयितधर्मवान् परे मतिष्ठं पृथक्पदं वा परमधर्मा यस्मिन्निमित्यर्थकं रामं संबोधनं ६ ॥ ६ ॥

॰ पूर्वं पूर्वस्मिन्काले देवरातात्व्यस्य प्राचीनजनकस्य यज्ञे सदसि दैवतैर्दत्तयज्ञवधे प्रसादिताच्छिवाल्लब्धं य
त्प्रसादितैः शिवसहितैर्दत्तं अत एव तत्र तिष्ठतीति शेषः ८ तस्याद्भुतत्वमाह नास्येति आरोपणं शरप्रक्षेपयोग्य
ज्यासंबंधः न कथंचन न कश्चमपीत्यर्थः ९ १० तत्र मिथिलायां यज्ञे चेति यज्ञं द्रक्ष्यसि चेत्यन्वयः चकारेण

मंचैव नरशार्दूल सहास्माभिर्गमिष्यसि अद्भुतं च धनूरत्नं तत्र त्वं द्रष्टुमर्हसि ॰ तद्धि पूर्वं नरश्रेष्ठ द
त्तं सदसि दैवतैः अप्रमेयबलं घोरं मखे परमभास्वरं ८ नास्य देवा न गंधर्वा नासुरा न च राक्षसाः क
र्तुमारोपणं शक्ता न कथंचन मानवाः ९ धनुषस्तस्य वीर्यं हि जिज्ञासंतो महीक्षितः न शेकुरारोप
यितुं राजपुत्रा महाबलाः १० तद्धनुर्नरशार्दूल मैथिलस्य महात्मनः तत्र द्रक्ष्यसि काकुत्स्थ यज्ञं च
परमाद्भुतं ११ तद्धि यज्ञफलं तेन मैथिलेनोत्तमं धनुः याचितं नरशार्दूल सुनाभं सर्वदैवतैः १२

जानकीसीताकारसमुच्चयः ११ कुतस्तादृशस्य धनुषस्तत्रावस्थितिस्तत्राह तद्धीति उत्तमं तद्धनुः मैथिलेन नि
जयज्ञप्रीतदेवेभ्यः यज्ञफलत्वेन याचितं सुद्दविद्विषूणां जयाय सर्वदेवतैर्दत्तं अतस्तत्र तिष्ठतीत्यर्थः तदुक्तं
पाद्मे वायवीये भो देयादत्तमिति को मे प्रीतस्त्व भगवानीशः शिम्पलीनीललोहितः प्रददौ पारुनाशार्थं जनका

रा० बा० टी० ९९

आयागमभ्रंतेपूजनीयदेवताभूतमित्यर्थः वेष्टनीत्यस्यनिष्ठतीतिशेषः अतएवाह अर्चितमित्यादि न्यास॰
भूतेनरपतेरितिक्वचित्पाठः तत्रापिन्यस्यतेअस्मिन्नदेवनेतिव्युत्पत्त्यान्यासएवार्थः देवतान्यासाश्रयागार्थ्यएवश्र
तिमादौ १३ एवमुक्तेतिमहर्षिगणाहारेतिशेषः मुनिवरोविश्वामित्रः वनदेवताः वनदुर्गाद्याः १४ सिद्धः नि।

आयागमभ्रंतेनृपतेतस्यवेश्मनियतस्यच अर्चितंविविधैर्गंधैर्पुष्पैश्चागुरुगंधिभिः १३ एवमुक्त्वामुनि
वरःप्रस्थानमकरोत्तदा सर्षिसंघःसकाकुत्स्थआमंत्र्यवनदेवताः १४ स्वस्तिवोस्तुगमिष्यामिसिद्धः
सिद्धाश्रमादहं उत्तरेजाह्नवीतीरेहिमवंतंशिलोच्चयं प्रदक्षिणंततःकृत्वासिद्धाश्रममनुत्तमं १५।
उत्तरांदिशमुद्दिश्यप्रस्थातुमुपचक्रमे १६ तंव्रजंतंमु॰
निवरमन्वगादनुसारिणां शकटीशतमात्रंतुप्रयाणेब्रह्मवादिनां १७ मृगपक्षिगणाश्चैवसिद्धाश्र
मनिवासिनः अनुजग्मुर्महात्मानोविश्वामित्रंतपोधनं १८ निवर्तयामासततःसर्षिसंघःसपक्षिणः ते॰

विंद्रयत्नसिद्धेतिभावः गमिष्यामीत्यत्राहउत्तरेइति १५ १६ अनुसारिणांउक्तदिगनुसारिणांपश्चाद्गामिनां।
शकटीशतमात्रंपाथेयादिभिःपाकसाधनपात्रादिभिश्चसंभारादिमत्तब्रह्मवादिनांपृथग्व्रजगादितिसंबं

शोणानद्यैव शोणा इत्यपि नामेत्याह वसन्त इति शोणा इति गिरिव्रजसमीपस्थो नदीविशेषः इत्येतदुत्तरसर्गे स्प
ष्टं अस्तंगते अस्तं जिगमिषतीत्यर्थः २१ २२ अथ देशः शोणाकूलस्थः २३ निखिलं वैभवमिति शेषः २४ ॥

वासं चक्रुर्मुनिगणाः शोणाकूले समाहिताः तस्मिन्नस्तंगते दिनकरे स्नात्वा हुतहुताशनाः २० विश्वा
मित्रं पुरस्कृत्य निषेदुरमितौजसः रामोऽपि सह सौमित्रिर्मुनींस्तानभिपूज्य च २१ अग्रतो निषसाद ह
विश्वामित्रस्य धीमतः अथ रामो महातेजा विश्वामित्रं तपोधनं २२ पप्रच्छ मुनिशार्दूलं कौतूह
लसमन्वितः भगवन् कोन्वयं देशः समृद्धवनशोभितः २३ श्रोतुमिच्छामि भद्रं ते वक्तुमर्हसि तत्त्व
तः नोदितो रामवाक्येन कथयामास सुव्रतः तस्य देशस्य निखिलमृषिमध्ये महातपाः २४ इ
त्यार्षे रामायणे बालकाण्डे एकत्रिंशः सर्गः ३१ ब्रह्मयोनिर्महानासीत्कुशो नाम महातपाः अक्लि
ष्टव्रतधर्मज्ञः सज्जनप्रतिपू०

इत्यार्षे रामायणटीकायां बालकाण्डे एकत्रिंशः सर्गः ३१ शोणाकूलदेशवै
भवप्रश्ने महं स्वयानामयं देश इत्युत्तरमाह ब्रह्मयोनिरिति ब्रह्मपुत्र इत्यर्थः अक्लिष्टव्रतश्चासौ धर्मज्ञश्चेति

युक्तायां प्रशस्तगुणयुक्तायामित्यर्थः असूर्तरजसं न विद्यते सूर्तैः प्रसृतं रजो यस्य तं असूर्तरजसमिति योगविभाग
वृत्त क्षत्रधर्मं चिकीर्षया क्षत्रधर्मवृद्धिकरणेच्छया २३ पालनं प्रजापालनं ४ निवेशं सन्निवेशं ५ महोदयम

स महात्मा कुलीनायां युक्तायां सुमहाबलान् वैदर्भ्यां जनयामास चतुरः सदृशान्सुतान् २ कुशाम्बं कु
शनाभं च असूर्तरजसं वसुं दीप्तियुक्तान्महोत्साहान्क्षत्रधर्मचिकीर्षया ३ तानुवाच कुशः पुत्रान्धर्मि
ष्ठान्सत्यवादिनः क्रियतां पालनं पुत्रा धर्मं प्राप्स्यथ पुष्कलं ४ कुशस्य वचनं श्रुत्वा चत्वारो लोकसत्तमाः
निवेशं चक्रिरे सर्वे पुराणां नृवरास्तदा ५ कुशाम्बस्तु महातेजाः कौशाम्बीमकरोत्पुरीं कुशनाभस्तु ध
र्मात्मा पुरं चक्रे महोदयं ६ असूर्तरजसो नाम धर्मारण्यं [illegible] महामतिः चक्रे पुरवरं राजा वसुर्नाम
गिरिव्रजं ७ एषा वसुमती नाम वसोस्तस्य महात्मनः एते शैलवराः पंच प्रकाशंते समंततः ८ सुमागधी
नदी रम्या मगधान्विश्रुता ययौ पंचानां शैलमुख्यानां मध्ये मालेव शोभते ९ सैषा हि मागधी राम वसो
स्तस्य महात्मनः पूर्वाभिचरिता राम सुक्षेत्रा सस्यमालिनी १० ॥

होदयनामकं १० एषा गिरिव्रजापरप
र्याया ८ सुमागधीत्सं ता ययाविति पदच्छेदः ९ सुमागधी मगधादागत नद्या मागधी तेन प्रसिद्धा यास्मा
त्स्तोणा नस्यमं है श्य सवेसार्भवति पूर्वाभिचरिता पूर्वादिक्गामिनी सुक्षेत्रा पार्श्वद्वयेपि विशेषः । १० ॥

घृताच्यां तन्नामिकाप्सरसि ॥ ११ ॥ ताः शतं कन्याः ॥ १२ ॥ आमोदं संतोषं ॥ १३ ॥ घनांतरे मेघमध्ये ताराश्चवदेजविति।
शेषः ॥ १४ ॥ १५ ॥ मत्कामनापूरणेन मम देवस्य मानुष्योपि भार्या भविष्यथेत्यादिवशीकरणार्थवादः ननु मानु-
षीणां देव[illegible] संबंधोऽनुचितस्तत्राह मानुषस्त्यज्यतां भाव इति मदंगीकारमात्रेणाविलक्षणशक्त्या विभे

कुशनाभस्तु राजर्षिः कन्याशतमनुत्तमं जनयामास धर्मात्मा घृताच्यां रघुनंदन ॥ ११ ॥ तास्तु यौवनशा-
लिन्यो रूपवत्यः स्वलंकृताः उद्यानभूमिमागम्य प्रावृषीव शतह्रदाः ॥ १२ ॥ गायंत्यो नृत्यमानाश्च वाद-
यंत्यस्तु राघव आमोदं परमं जग्मुर्वराभरणभूषिताः ॥ १३ ॥ अथ ताश्चारुसर्वांग्यो रूपेणाप्रतिमा भुवि
उद्यानभूमिमागम्य तारा इव घनांतरे ॥ १४ ॥ ताः सर्वगुणसंपन्ना रूपयौवनसंयुताः दृष्ट्वा सर्वात्मको
वायुरिदं वचनमब्रवीत् ॥ १५ ॥ अहं वः कामये सर्वा भार्या मम भविष्यथ मानुषस्त्यज्यतां भावो दीर्घ-
मायुरवाप्स्यथ ॥ १६ ॥ चलं हि यौवनं नित्यं मानुषेषु विशेषतः अक्षयं यौवनं प्राप्ता अमर्यश्च भविष्यथ ॥ १७ ॥

वा मानुषभावत्यागे सत्येव भवतीनां [illegible]मविष्यतीति तत्फलमाह दीर्घमिति ॥ १६ ॥ मानुषेषु हि यतः विशेषेण
नित्यमनुवृत्तं यौवनं चलं चंचलं क्षीयमाणमिति यावत् अतः मत्संबंधेन अक्षयं यौवनमित्याद्यन्वयः ॥ १७ ॥

112

अपहास्य हासपूर्वकमपमान्य १८ अंतश्चरसीति सर्वार्थेन सप्रभावत्वं ता वायोः सूचितानवद्यमस्त्रभापेत ८
मामत्यमावाधिकरति चेत्तत्राह प्रभावज्ञाश्च ते सर्वाः न यथा प्रभुमस्मा कार्षीरिति भावः तस्मादेवमनुचितप्रार्थन
यानुसमस्वमाननमनुचितमित्याह किमर्थमित्यादि १९ सप्रभावं दर्शयति कुशनाभेत्यादि स्थानात् वायुपद
त् देवमाधिनोच्यावयितुं समर्थाः इति शेषः रक्षामस्त्विति शापेन तत्क्षयकरणे हितत्वयः स्यादिति भावः २० दुर्मे

तस्य तद्वचनं श्रुत्वा वायोरक्लिष्टकर्मणः अपहास्य ततो वाक्यं कन्याशतमथाब्रवीत् १८ अंतश्च
रसि भूतानां सर्वेषां सुरसत्तम प्रभावज्ञाश्च ते सर्वाः किमर्थमवमन्यसे १९ कुशनाभसुता
देव समस्ताः सुरसत्तम स्थानात् च्यावयितुं देवं रक्षामस्तु तपो वयं २० मा भूत्स कालो दु
र्मेधः पितरं सत्यवादिनं अवमन्य स्वधर्मेण स्वयंवरमुपास्महे २१ ॥ २१।

धः दुर्बुद्धे यत्र का
ले पितरमवमन्य अपमानविषयं कृत्वा स्वधर्मेण कामेन स्वयंवरमुपास्महे आत्मना स्वातंत्र्येण वयं वरं
गीकुर्मः स कालः कदाचिदपि मा भूदित्यन्वयः नावमन्येति पाठस्तत्राविलोपपाठः तथा पाठेन श्रुतिच्छेदः स्वा
र्थे सदैव नः अस्माकं स कालो मा भूदित्यन्वयः कश्चिन्नोवमन्येति पाठः अतएव मा भूत्स कालो यत्र दौ
पितरं सत्यवादिनं कामतः समतिक्रम्य वयं स्वयंवरं इत्यतदर्थे विवरणश्लोका दृश्यन्ते कचित् २१ ॥

तत्र वीजमाह पिता हीति २२ हरिः वायुः क्वचिन्नवायुरित्येव पाठः २३ सलज्जाः अन्यायप्रसंगतः स-
लज्जाः २४ भग्नाः भग्नांगाः २५ धर्ममवमन्यते बलात्कारं करोतीति यावत् रोदनादिना चेष्टंताः क्रियाः।

पिता हि प्रभुरस्माकं दैवतं परमं च नः यस्य नो दास्यति पिता स नो भर्ता भविष्यति २२ तासां तु वच-
नं श्रुत्वा हरिः परमकोपनः प्रविश्य सर्वगात्राणि बभंज भगवान्प्रभुः २३ ताः कन्या वायुना भग्ना वि-
विशुर्नृपतेर्गृहं प्रविश्य च ससंभ्रांताः सलज्जाः साश्रुलोचनाः २४ स च ता दयिता भग्नाः कन्याः परम-
शोभनाः दृष्ट्वा दीनास्तदा राजा संभ्रांत इदमब्रवीत् २५ किमिदं कथ्यतां पुत्र्यः को धर्ममवमन्यते
कुब्जाः केन कृताः सर्वाश्चेष्टंत्यो नाभिभाषथ २६ एवं राजा विनिश्वस्य समाधिं संदधे ततः २७ इत्या-
र्षे रामायणे बालकांडे द्वात्रिंशः सर्गः ३२ तस्य तद्वचनं श्रुत्वा कुशनाभस्य धीमतः शिरोभिश्चरणौ
स्पृष्ट्वा कन्याशतमभाषत १ वायुः सर्वात्मको राजन्प्रधर्षयितुमिच्छति अशुभं मार्गमास्थाय।

भिभाषथेत्यन्वयः २६ एवं दृष्ट्वेति शेषः समाधिं संदधे इति तद्वचः श्रवणे कापि विक्षोभः दित्यर्थः २७ इति
श्रीरामायणे बालकांडे द्वात्रिंशः सर्गः ३२। तस्येति चरणौ स्पृष्ट्वा नमस्कृत्य १ प्रधर्षयितुमभिभवितुं इच्छ

वा॰
मा॰ ब
टी॰
११२

पितृमत्यः पित्रधीनाः सच्छंदे पतिस्वीकारविषये स्वातंत्र्येनास्थिताः न वर्त्तामहे यतः अतो नः पितरं वृणीष्व वंय
दि नः अस्मान् तुभ्यं संप्रदास्यति तदा न वन्दीयाः भविष्यामः तेन तव भद्रं अस्तु इति योजना ३ एवं ब्रुवतीनां नो वच
नेन प्रतीच्छता अनंगीकुर्वता पापानुबंधेन अधर्मवह्नाचितेन यद्वेधमेव ब्रुवत्यः सर्वा वायुनाभिहताः स्म इति योज

पितृमत्यः स्म भद्रं ते सच्छंदेन वयं स्थिताः पितरं नो वृणीष्व त्वं यदि नो दास्यते तव ३ तेन पापा
नुबंधेन वचनं न प्रतीच्छता एवं ब्रुवत्यः सर्वाः स्म वायुनाभिहता भृशं ४ तासां तु वचनं श्रुत्वा
राजा परमधार्मिकः प्रत्युवाच महातेजाः कन्याशतमनुत्तमं ५ क्षांतं क्षमावतां पुत्र्यः कर्त
व्यं सुमहत्कृतं एकमत्यमुपागम्य कुलं चावेक्षितं मम ६ अलंकारो हि नारीणां क्षमा तु
पुरुषस्य वा दुष्करं तच्च वै क्षांतं त्रिदशेषु विशेषतः ७ ॥

ना ४ ५ हे पुत्र्यः क्षमावतां त।
मावद्भिः कर्तव्यं यत् क्षांतं तत् क्षमा तत्सुमहत्कृतं महती क्षमा कृतेति यावत् गात्रभंगोत्थक्रोधवेगसह
नमतिदुष्करमिति भावः यच्च कुलं अवेक्षितं तं कामवेगमसहनं कृतं तदपि सुमहत् ६ पुरुषस्येति अविशेषे
णोक्तिमात्रः ततदुष्करं यत् त्रिदशाविषये तत् तं कामवेगमसहनं कृतं तत् अतिदुष्करं तेषां अभिरूप्यादिकाम

॥ १

नीतकं २८७

114

सकन्यानां प्राचुर्यतां दृशीत्तमां सत्कुले प्रार्थ्यते यादृशीति भो ब्रह्मः यादृशी ब्रह्माकं त्वमातादृशी ब्रह्मस-
त्कुले सर्वासामास्तिति शेषः अथवा विशेषतः सकलस्त्री ब्रह्मणा विशेषेणेत्यर्थः त्वमायाः प्रार्थनीयवे ति
मित्रमाह त्वमेव्यादि दान सत्य वचनयत्त समाधिज सकलधर्मफलसकलजगदाधारभूताचत्वमातः सो

सत्यंतमा

यादृशीवः त्वमा ब्रह्मः सर्वासामविशेषवतः त्वमादानंत्वमायत्त ब्रह्म प्रविकाः ८ त्वमायशाः त्वमाध
र्मः त्वमायां निष्ठितं जगत विसृज्य कन्याकाकुत्स्थराजा त्रिदशविक्रमः ९ मंत्रज्ञो मंत्रयामास प्र
दानं सह मंत्रिभिः देशेकाले च कर्तव्यं सदृशे प्रतिपादनं १० एतस्मिन्नेव काले तु चूली नाम महाद्यु
तिः ऊर्ध्वरेताः शुभाचारो ब्राह्मं तप उपागमत ११ तपस्यंतमृषिं तत्र गंधर्वी पर्युपासते सोमदा
नाम भद्रं ते ऊर्मिला तनया तदा १२ ॥ रामः ॥

पादेयेत्यर्थः ८ ९ प्रदानं कन्याप्रदानं उचिते देशे
कालेसदृशे स्वकुलादि सदृशे पात्रे प्रदानं कर्तव्यं इति मंत्रणप्रकमः १० ऊर्ध्वरेता ब्रह्मचारी ब्राह्मं तपः ब्र
ह्मविषये चित्तैकाग्र्यमनसश्चेंद्रियाणां च येकाग्र्यं परमं तप इति स्मृतिः ११ यदा चूली तपश्चरति तदा ऊर्मि
लातनया गोमदा नाम गंधर्वी तं पर्युपास्त समम्यनुग्रहं कुर्विति प्रार्थनया सेवतस्म पर्युपासत इत्यशाव

रा०

बा० टी०

११२

तमितिप्रतियोगेद्वितीयातत्समीपेत्र्यासेत्यर्थः १२ कालयोगेनसुश्रूषाजातितधर्मपरिपाकार्हकालसंबंधे
नसुनेनतरियायोगिनोःअकल्मषंतपःप्रवृत्तिःसूचिता १४ ब्राह्म्यालक्ष्म्याब्रह्मवर्चसेनब्रह्मभूतः ब्रह्मात्मभा
वनयाअतएवमहातपाः यतस्त्वमीदृशः अतःब्राह्मेणतपसायुक्तंपुत्रमिच्छामि ब्राह्मंतपः ब्रह्मविषय
मैकाग्र्यंयद्वाब्राह्मंतपः १६ ननुपुत्रप्रार्थनापत्न्याउचितातत्राह अपतिरस्मिअतः परमपिअस्मि अहं

साचतंप्रणताभूत्वासुश्रूषणपरायणा उवासकालेधर्मिष्ठातस्यास्तुष्टोभवद्गुरुः १३ सचतांका
लयोगेनप्रोवाचरघुनंदन परितुष्टोस्मिभद्रंतेकिंकरोमितवप्रियं १४ परितुष्टंमुनिंज्ञात्वागंध
र्वीमधुरस्वरं उवाचपरमप्रीतावाक्यज्ञावाक्यकोविदं १५ लक्ष्म्यासमुदितोब्राह्म्याब्रह्मभूतोमह
हातपाः ब्राह्मेणतपसायुक्तंपुत्रमिच्छामिधार्मिकं १६ अपतिश्चास्मिभद्रंतेभार्याचास्मिनकस्यचि
त्ब्राह्मयोपगतायाश्चदातुमर्हसि

नकस्यचिद्भार्याभविष्यामीतिशेषः अनेननैष्ठिकब्रह्मचारिणीत्वम्
वितं अपथापिपूर्वपुत्राबाणीर्भवतितथातेभद्रंअनुग्रहोस्तु नन्वेवंनैष्ठिकब्रह्मचर्येकथंपुत्रलाभःसंभा
वनपुत्रस्यारब्राह्मेणातिउपगतायाः किंकर्तव्यप्राप्तायाः ब्राह्मेणबलसंबंधिनाउपायेनमेसुतंदातुमर्हसि

११२

तस्याः सोमदायाः प्रसन्नश्चूलिननामा ब्रह्मर्षिः बाल्ये ब्रह्मतपसा युक्तं आत्मजं दत्तवान् ब्रह्मदत्त इति ख्या
तं मानसं सुतं तदा वित्यन्वयः फली फलिन इतिवत् चूली चूलिन इति ऋषेर्नाम द्वयं साधु १८ राज्ञां गंध
र्वीः सोमदायाः सावित्र्या त्वात् कांपिल्यां कंपिलेन निर्मिता १९ २१ देवपतिर्यथा इंद्रस्तद्वत् सोमहीपाल इत्य॰

तस्याः प्रसन्नो ब्रह्मर्षिरुत्तमं ब्रह्मदत्त इति ख्यातं मानसं चूलिनः सुतं १८ स राजा ब्रह्मदत्तस्तु पुरी
मध्यवसत्तदा कांपिल्यां परया लक्ष्म्या देवराजो यथा दिवि १९ स बुद्धिं कृतवान् राजा कुशनाभः सुधा
र्मिकः ब्रह्मदत्ताय काकुत्स्थ दातुं कन्याशतं तदा २० तमाहूय महातेजा ब्रह्मदत्तं महीपतिः ददौ क
न्याशतं राजा सुप्रीतेनांतरात्मना २१ यथाक्रमेण तत्पाणीन् जग्राह रघुनंदन ब्रह्मदत्तो महीपालस्ता
सां देवपतिर्यथा २२ स्पृष्टमात्रेण तत्पाणौ विकुब्जा विगतज्वराः युक्ताः परमया लक्ष्म्या बभौ कन्याश
तं तदा २३ स दृष्ट्वा वायुना मुक्ताः कुशनाभो महीपतिः बभूव परमप्रीतो हर्षं लेभे पुनः पुनः २४।

र्थः २२ तदा तेन राज्ञा पाणौ स्पृष्टमात्रेणाः कन्याः विकुब्जाः कुब्जत्वरहिताः आसन्निति शेषः बाल्य तपो युक्तवादे
वे सामर्थ्यं राज्ञः एवं च सति तदा तत्कन्याशतं परया लक्ष्म्या बभाविन्यन्वयः २३ सः राजा वायुमुक्ताः दृष्ट्वेत्यन्व

यः भगा इति पाठ बाह्याः केचित् तत्र सोइदं वैभगाः

115

लिगपु॰ २४॥

प्रेषयामासकांपिल्यांप्रतीतिशेषः २५ सदृशीं क्रियांदारक्रियामित्यर्थः प्रतिनंदनप्रकारमाहस्पृष्ट्वेत्यादि।
प्रशीस्पृष्ट्वागतेत्यर्थः आश्चर्यमासोधेर्येयदेवश्रेष्टस्याप्यनादरः धन्योयंराजायस्यईदृषाःसुताः अहोमेभाग्य
यस्यामेईदृषाःस्नुषाः इत्येवंप्रतिदिनंप्रनंदनस्त्रीमाहात्म्यंतमोमाहात्म्यंचदर्शितं २८ इतिवालकांडत्रयस्त्रिंश

कृतोद्वाहेतुवराजानेब्रह्मदत्तेमहीपतिम् सदारंप्रेषयामाससोपाध्यायगणंतदा २५ सोमदापिसुतं
दृष्ट्वापुत्रस्यसदृशींक्रियां यथान्यायंचगंधर्वीस्नुषास्ताःप्रत्यनंदत स्पृष्ट्वास्पृष्ट्वाचताःकन्याःकुशनाभं
प्रशस्यच २८ इत्यार्षेरामायणेत्रयस्त्रिंशःसर्गः ३३ कृतोद्वाहेगतेतस्मिन्ब्रह्मदत्तेचराघव अपुत्रः
पुत्रलाभायपौत्रीमिष्टिमकल्पयत् १ इष्ट्यांतुवर्तमानायांकुशनाभंमहीपतिं उवाचपरमोदारः
कुशोब्रह्मसुतस्तदा २ पुत्रस्तेसदृशःपुत्रभविष्यतिसुधार्मिकः गाधिंप्राप्स्यसितेनत्वंकीर्तिंलोकेच
शाश्वतीं ३ एवमुक्त्वाकुशोरामकुशनाभंमहीपतिं जगामाकाशमाविश्यब्रह्मलोकंसनातनं ४

ब्रह्मदत्तेचेति चस्त्वर्थः कन्याप्रदानसमनंतरंपुत्राभावात्पुत्रलाभायपुत्रप्राप्तये १ कुशःकुशनाभपिताकुशोवाक्य।
मारपुत्रस्सदृशःकोसौतत्राहगाधिंगाधिनामानं प्राप्स्यसितेनलोकेशाश्वतींकीर्तिंचप्रा॰

कुशोनामेतियावेपतनकुशवृत्तंनामप्रसिद्धमित्यर्थः आकाशमाविषयआकाशायरूपोभृत्वाअनेनतस्यमुक्तत्वंसूचितंतेनसर्वंशास्यमाहात्म्यातिशयःसूचितः ४ कस्यचिन्नथकालस्य [illegible] कस्यचित्कालस्यअनंतरमित्यर्थः ५ ममविश्वामित्रस्यकुशप्रसूतत्वादहंकौशिकः ६ नकेवलमहमेवगाधेपुत्रःममपूर्वजाज्येष्ठानाम्नास।

कस्यचित्त्वथकालस्यकुशनाभस्यधीमतः जज्ञेपरमधर्मिष्ठोगाधिरित्येवनामतः ५ सपितामसकाकुत्स्थगाधिःपरमधार्मिकः कुशवंशप्रसूतोस्मिकौशिकोरघुनंदन ६ पूर्वजाभगिनीचापिममराघवसुव्रता नाम्नासत्यवतीनामऋचीकेप्रतिपादिता ७ सशरीरागतास्वर्गंभर्तारमनुवर्तिनी कौशिकीपरमोदाराप्रवृत्ताचमहानदी ८ दिव्यापुण्योदकारम्याहिमवंतमुपाश्रिता लोकस्यहितकार्यार्थंप्रवृत्ताभगिनीमम ९ ॥ ९ ॥ ३४ ॥

त्यवतीतिप्रसिद्धनाम्नाऋचीकेप्रतिपादिताऋचीकायदत्ताइतिनामप्रसिद्धं ७ सशरीरस्वर्गंगतोहेतुर्भर्तारमनुवर्तिनीतिमरणमनेकृतवतीत्यर्थः अपिचअन्यदपितस्याश्चरितंकौशिकीनाम्नीमहानदीतद्रूपाप्रवृत्ताचजाता ८ हितकार्यार्थंहितकामार्थमितिपाठेहितंआमुष्मिकंकामःऐहिकंतदुभयदानार्थं ९ ॥ ९ ॥ रामः।

रा.
बा. टी.
११५

यतो भगिन्यां स्नेहसंयुक्तः अतः हिमवत्पार्श्वे कौशिक्यां नियतः नित्यं सुखं वसामीत्यन्वयः ९ इतश्च तस्या वास-
इत्याह सा त्विति सत्ये धर्मे प्रतिष्ठिता नत्वन्नपानादिना सत्यात् मतो निवर्तत इति भावः १० नन्वेवं कथं सिद्धाश्रमे स्थि-
तिरित्याह अहं हीति नियमात् गयापिंडदानवत् सिद्धाश्रमैकसाध्ययागजन्यसिद्धिहेतोः आगमनकार्यं च न

ततोऽहं हिमवत्पार्श्वे वसामि नियतः सुखं भगिन्यां स्नेहसंयुक्तः कौशिक्यां रघुनंदन ९ सा तु सत्यवती
पुण्या सत्ये धर्मे प्रतिष्ठिता पतिव्रता महाभागा कौशिकी सरितां वरा ११ अहं हि नियमाद्राम हित्वा तां स
मुपागतः सिद्धाश्रममनुप्राप्य सिद्धोऽस्मि तव तेजसा १२ एषा राम ममोत्पत्तिः स्वस्य वंशस्य कीर्तिता देश
स्य च महाबाहो यन्मां त्वं परिपृच्छसि १३ गतोऽर्धरात्रः काकुत्स्थ कथाः कथयतो मम निद्रामभ्येहि भद्रं
ते मा भूद्विघ्नोऽध्वनीह नः १४ निष्पंदास्तरवः सर्वे निलीना मृगपक्षिणः नैशेन तमसा व्याप्ता दिशश्च रघुने

दनुग्रहात् सिद्धमित्याह सिद्धाश्रममित्यादि १२ उपसंहरति एषेति मम गाधेः मत्काश्यपाद्युत्पत्तिः कीर्तिता स्वस्य वंश-
स्य उत्पत्तिः ब्रह्मपुत्रात् कुशात् उत्पत्तिः कीर्तिता देशस्य शोणाकूलीयगिरिव्रजदेशस्य यत्पृष्टं सोऽपि यत्पृष्टः तत्सर्वं मुक्त-
मिति शेषः १३ अतः परं न प्रष्टव्यमित्याह गत इति विघ्नः अंतराय अध्वनि निद्राभावप्रयुक्तो जाड्यमलः १४ १५।।१५

प्रथयात्रविज्ञात्याह निष्पंदाइतिमतिचलनाभावादितिभावः तदाहनिलीनाइति १५ शनैर्विसृज्यतेवियु
केत्यर्थः वर्तमानसामीप्येभूतेलट् संध्याशब्देनतदुपासनयोग्यगौणकालसाहित्येनसार्थयामद्रूपः न
क्षत्रताराग्रहनंतमः सदृशात्तवत् नेत्रैरावृतमिवततज्योतिर्भिः तद्रश्मिभिः प्रवभासते १६ उत्तिष्ठतेउदोन्मुखं

शनैर्विसृज्यतेसंध्यानभोनेत्रैरिवावृतं नक्षत्रताराग्रहनंज्योतिर्भिरवभासते १६ उत्तिष्ठतेचशीतांशुः
शशीलोकतमोनुदः ह्लादयन्प्राणिनांलोकेमनांसिप्रभयास्वया १७ नैशानिसर्वभूतानिप्रचरंति
ततस्ततः यक्षराक्षससंघाश्चरौद्राश्चपिशिताशनाः १८ एवमुक्त्वामहातेजाविरराममहामुनिः सा
धुसाध्वितितंसर्वेमुनयोह्यभ्यपूजयन् कुशिकानामयंवंशोमहान्धर्मपरःसदा ब्रह्मोपमामहा
त्मानःकुशवंशयानरोत्तमाः विशेषेणभवानेवविश्वामित्रमहायशः कौशिकीसरितांश्रेष्ठाकुल

कर्मणिइतितद्वत् नैशानिनिशाप्रभवानितान्येवाह यक्षेत्यादि १८ अभ्यपूजनप्रशस्तवन् १९ स्तुतिप्रकार
माह कुशिकानामित्यादि ब्रह्मोपमाःब्रह्मर्षितुल्याः २० हेमहायशोविश्वामित्रभवानेवविशेषेणमहा
त्मेतिशेषः यस्त्वपसाब्राह्मणत्वंप्राप्तइतिभावः किंचयस्तवभगिनीतवकुलस्योद्योतकरीउद्धारकर्त्रीस

२८

कालकौशिकी

117

रा.
बा. टी.
११९

प्रशान्तः स्ततः प्रसंगतस्त्वांशुमानितिपाठः २२ सेवतेसेवतेस्म २३ इतिश्रीरामाभिरामेश्रीरामीयेरामाय
णतिलकेबालकांडेचतुस्त्रिंशः सर्गः ३४ रात्रिशेषंउपास्यनिद्रयाप्रतिवाह्य १ गमनायगमनंकर्तुं २३ अथ

मुदितैर्मुनिशार्दूलैः प्रशस्तः कुशिकात्मजः निद्रामुपागमच्छ्रीमानस्तंगतस्त्वांशुमान् २२ रामोपिस
हसौमित्रिः किंचिदागतविस्मयः प्रशस्यमुनिशार्दूलंनिद्रांसमुपसेवते २३ इत्यार्षेरामायणेबाल.
कांडेचतुस्त्रिंशः सर्गः ३४ उपास्यरात्रिशेषंतुशोणाकूलेमहर्षिभिः निशायांसुप्रभातायांविश्वामि
त्रोभ्यभाषत १ सुप्रभातानिशारामपूर्वासंध्याप्रवर्तते उत्तिष्ठोत्तिष्ठभद्रंतेगमनायाभिरोचय २।

सक्रुन

तच्छ्रुत्वावचनंतस्यपूर्वाह्णिककृतक्रियः गमनंरोचयामासवाक्यंचेदमुवाचह ३ अयंशोणःशुभजलो
गाधःपुलिनमंडितः कतरेणपथाब्रह्मन्संतरिष्यामहेवयं ४ एवमुक्तस्तुरामेणविश्वामित्रोब्र.
वीदिदं एषपंथामयोद्दिष्टोयेनयांतिमहर्षयः ५ तेगत्वादूरमध्वानंगतेर्धदिवसेतदा जाह्न
वींसरितांश्रेष्ठांददृशुर्मुनिसेविताम् ६।

योगाइति शोणोविशोणाइतिव्यपदिष्टा कतरेणपथासं
तरिष्यामहेउत्तरिष्यामः प्रथमवीजमगाधइतिप्रतलस्पर्शोऽस्त्यर्थः ४ उद्दिष्टःगंतव्यतेननिश्चितः ५ ६।

सारसः पक्षिविशेषः ७ वासपरिग्रहं संमार्जनादिनाऽऽवासस्थानं चक्रुरित्यर्थः ८ अमृतवत् अमृत।
तुल्यं पवित्रपात्राय वसिष्ठमत्रं यद्वामृतवत् तत्सदृशं गंगाजलं हविश्च प्राग्रुक्तमाथोऽइत्यर्थः ९ विहिताः विशे॰
षेणाऽवस्थिताः यथार्हतः यथावत्स्थानमर्हं तत्स्थाऽवस्थिता इत्यर्थः १० गंगाश्रोतं गंगाविषयं किंचिच्छ्रोत

तां दृष्ट्वा पुण्यसलिलां हंससारससेवितां बभूवुर्मुनयः सर्वे मुदिताः सहराघवाः ७ तस्यास्तीरे तदा॰
सर्वे चक्रुर्वासपरिग्रहं ततः स्नात्वा यथान्यायं संतर्प्य पितृदेवताः ८ हुत्वा चैवाग्निहोत्राणि प्राश्य
चामृतवद्धविः विविशुर्जाह्नवीतीरे शुभे मुदितमानसाः ९ विश्वामित्रं महात्मानं परिवार्य समं॰
ततः विष्ठिताश्च यथान्यायं राघवौ च यथार्हतः संप्रहृष्टमना रामो विश्वामित्रमथाब्रवीत् १० भ॰
गवन् श्रोतुमिच्छामि गंगां त्रिपथगां नदीं त्रैलोक्यं कथमाक्रम्य गतानदनदीपतिं ११ चोदितो रामवा
क्येन विश्वामित्रो महामुनिः वृद्धिं जन्म च गंगाया वक्तुमेवोपचक्रमे १२ शैलेंद्रो हिमवान्नाम धातूना
माकरो महान् तस्य कन्याद्वयं राम रूपे

मित्यर्थः श्रोतव्यं विषयमाह त्रैलोक्यमित्यादि ११ वृद्धिं त्रैलो
क्यव्याप्तिरूपां १२ धातूनां स्वर्णादीनां १३ या मेरुदुहिता मेना नाम सा तयोः कन्ययोर्मातेत्यन्वयः १४।

रा.

वा. टी.
११०

तस्यां मेनायां याज्येष्ठा हिमवतः सुता कुटिला नाम सा इयं गंगा ॥ भवदित्यर्थः तस्यैव हिमवतः १५ देवका
र्यं वहस्माणां भववीर्यधारणां त्रिपथगां स्वर्गभूपातालमार्गगां इदं वर्तमानाम् पदेशेन वरणां च यस्याः शिव.
भार्यावाय १६ धर्मेण कन्यादानधर्मेण स्वच्छंदपथगामित्यपि वर्तमानामदेशेन स्वेच्छामार्गेण प्रवहादिवा
प्रमार्गगमनशीला १७ त्रिलोकार्थं तारकतोभीतत्रिलोकरक्षकपुत्रोत्पत्त्यर्थं प्रगच्छन् ब्रह्मलोकं तत्र ब्र.

यामेकडहितारामतयोर्माताह्रमघ्यमा नाम्ना मेना मनोज्ञा वै पत्नी हिमवतः प्रिया १५ तस्यां गंगे
यमभवज्ज्येष्ठा हिमवतः सुता उमा नाम द्वितीयाभवत्कन्या तस्यैव राघव श्रयज्येष्ठां सुराः सर्वे देवका.
र्यचिकीर्षया शैलेंद्रं वरयामासुर्गंगां त्रिपथगां नदीं १६ ददौ धर्मेण हिमवांस्तनयां लोकपाव.
नीं स्वच्छंदपथगां गंगां त्रैलोक्यहितकाम्यया १७ प्रतिगृह्य त्रिलोकार्थं त्रिलोकहितकारिणः

स्य शापवशाज्जलरूपतां प्राप्तामित्यादि वामनपुराणोक्तदिशा मध्ये ... यं वामनपुराणोक्तं तस्य प्रायेण
त्वप्रसिद्धत्वात् पर्वे हितत्वाद्व्याप्यपिका उमा ज्येष्ठा कुटिला नाम हिमवत्कन्या देवैः शिववीर्यधारणाय हिम
वंतं प्रार्थिता तेन दत्ता यातया महदेवा ब्रह्मलोकं गता ब्रह्मणा निवेदितवंतः ब्रह्मणा च समर्थ्येयं तद्वारणोत्स

॥ कि

११०

ऽवश्यंधारयामीतिकथितवान्‌ःब्रह्मनेनब्रह्माजलरूपाभवेतिप्रार्थितातत्रैवब्रह्मांडोर्ध्वकटाहेजलरूपेणालग्ना।
स्थितातस्यामेवाग्निनाशिववीर्यंदत्तमिति विस्तरेणप्रसक्ताकटाहेभेदितेवृत्तात्‌ कुटिलाविष्णुपादातात्पाता
कुलितातततः तस्माद्विष्णुपदीत्युच्यतेतिवामनपुराणोक्तेर्वैवब्रह्मांडोर्ध्वकटाहेलग्नेतिज्ञायते पतनसमयेचब्रह्मांड
वाह्यजलेनमहेद्वृत्ति ततज्जलंब्रह्मणाकमंडलौधृतंवाह्यजलंचशिवानंदवाष्पजातेनावायणात्मकामिति कामि
कामंमहितादोस्पष्ट ततोभगवतापदावरोपणेतेनैवकमंडलुजलेनतत्पादप्रक्षालनेकृतातज्जलंकमंडलावेवाति।

गंगामादायतेगम्भस्कृतार्थेनांतरात्मना १८ पार्वत्यापीशलज्जहिताकन्यासीद्रघुनंदन उग्रंसुव्रतमा।
स्थायतपस्त्येतपोधना १९ उग्रेणतपसायुक्तांददौशैलवरःसुतां रुद्रायाप्रतिरूपायउमांलोकन।
मस्कृतां २० एतेतेशैलराजस्यसुतेलोकनमस्कृते गंगाचसरितांश्रेष्ठाउमादेवीचराघव २१ ॥

मंशंकरसंहितोक्तरीत्यागौरीविवाहोत्सवलीलयागौर्यापाणिभ्यांशिवनयनाच्छादनेकृतेशिवेनललाटनेत्रंप्र
काशितंतेनभयाद्गौरीपाणिस्वेदजलंस्रुतंतदपिब्रह्मणाकमंडलौस्थापितमित्यध्यायगौरीविवाहकथने।
नमृचिंतवभगीरथप्रार्थनयाचब्रह्मरूपःसर्वपवित्रजलसमहस्तसेदतःसर्वमुक्तजलस्वरूपक्रम्यप्रवाणोभभ।
गीरथसंबंधश्रवणात्‌ विस्तरस्तस्मत्कृतगंगामहात्म्यप्रकाशेद्रष्टव्यः। १८ कन्याग्रेष्ठतयातिःप्रथमशिववी
र्यसंवलनादिवक्ष्यचैतन्द्वर्णनं उग्रंसुव्रतेपर्णाभोजनस्थापित्वागमंकल्पसूपंतपः शिवध्यानरूपं १९ २०।२१।

119

यथा चत्रिपथगामिनी गंगा तथा प्रतिपादयतीति शेषः तदेव विवृणोति खमित्यादि प्रथमं खं गतिं प्राकाश।
मार्गं गता २२ पश्चात् सुरलोकं समारूढा अभवत् जलवाहिनी तत्र भावाजाता विपापा सकलपापहंत्री २३ इ
ति टीकायां पंचत्रिंशः ३५ उक्तवाक्ये इति उपरते इत्यर्थः १ वक्तुमर्हसीत्यस्य विस्तरमित्यनेनान्वयः दिव

पतते सर्वमाख्यातं यथा त्रिपथगामिनी खं गता प्रथमं तात गतिं गतिमतां वर २२ सैषा सुरनदी
रम्या शैलेंद्रस्य सुता तदा सुरलोकं समारूढा विपापा जलवाहिनी २३ इत्यार्षे रामायणे पंचत्रिंशः।।
सर्गः ३५ उक्तवाक्ये मुनौ तस्मिन्नुभौ राघवलक्ष्मणौ प्रतिनंद्य कथां वीरावूचतुर्मुनिपुंगवं १ धर्म
युक्तमिदं ब्रह्मन्कथितं परमं त्वया दुहितुः शैलराजस्य ज्येष्ठाया वक्तुमर्हसि विस्तरं विस्तरज्ञोसि दिव्य
शिरःस्थापनयोरयुक्तायाः स्मृतिषूक्तेः तद्वैपर्यासेनशायनस्याशुचित्वसूचकत्वमस्त्येवेत्याहुः १९ पादयोः।

इत्युक्त्वा विदितिस्तत्र प्रामे मध्यंदिने स्वरे निद्रयापहृता देवी पादौ कृत्वाथ शीर्षतः १९ २
स्नाता मस्पृविशाङ्कः पादयोः कृतमूर्धजा शिरःस्थाने कृतौ पादौ जहास समुमोद च २०।
तस्याः शरीरविवरं प्रविवेश पुरंदरः गर्भं च समथायामविच्छेदयदात्मवान् २१।

तत्स्थापनदेशे कृतमूर्धजा मूर्धजसंबंधे मूर्धसंबंधोपि ज्ञातव्य एव अन्यथा वाशुचित्वाशिरःस्थानेन्यापा
दौ कृत्वा वत्सलामशुचिं दृष्ट्वेत्यर्थः अत्रैकेनैवोभयलाभेउभयोपादानं स्पष्टार्थं वस्तुतो वक्रग्रीवतया वक्रपादत
या वा शयने परस्थानवत्तयाभावेन तत्राप्यशुचित्वप्रतिपादनायोभयोपादानमिति बोध्यं मुमोद प्राप्तच्छिद्र
त्वादिति भावः मोदवशादेव जहास च २० शरीरविवरं योनिविवरं आत्मवान् सावधानः ॥ २१ ॥ १८।

रा.
बा. टी.
१४५

शतपर्वणा शतकोटिना अबुध्यत भिद्यमानगर्भस्य रोदनशब्देनेत्यर्थः १९ २० न हंतव्य इति विभागेपि प्राणवियोजनं मा कार्षीरित्यर्थः २१.२२ तदंतरं छिद्रं प्राप्य आहवे शक्रस्य मम हंतारं अंगं उरस्छेदनन्यायेनाभिदं तन्मे.

भिद्यमानस्ततो गर्भो वज्रेण शतपर्वणा रुरोद सुस्वरं राम ततो दितिरबुध्यत १९ मा रुदो मा रुद इति गर्भं शक्रोभ्यभाषत बिभेद च महातेजा रुदंतमपि वासवः २० न हंतव्यो न हंतव्य इत्येवं दितिरब्रवीत् निपपात ततः शक्रो मातुर्वचनगौरवात् प्रांजलिर्वज्रसहितो दितिं शक्रोभ्यभाषत अशुचिर्देवि सुप्तासि पादयोः कृतमूर्धजा २२ तदंतरमहं लब्ध्वा शक्रहंतारमाहवे अभिदं सप्तधा देवि तन्मे त्वं क्षंतुमर्हसि २३ इत्यार्षे रामायणे षट्चत्वारिंशः सर्गः ४६ सप्तधा तु कृते गर्भे दितिः परमदुःखिता सहस्राक्षं दुराधर्षं वाक्यं सानुनयाब्रवीत् ममापराधाद्गर्भोयं सप्तधा शकलीकृतः नापराधो हि देवेश तवात्र बलसूदन १

अपराधकर्मेदं त्वं क्षंतुमर्हसि पूर्वं तन्मे मे वांछते
तिशेषः २३ षट्चत्वारिंशः ४६ सप्तधा इति दुराधर्षं न्यायोपायेन जेतुमशक्यं दुरासदमाशयः । ममापराधात्

(४)

गर्भविपर्यये गर्भविपत्तौ यत्त्वया कृतं कर्म तन्नवमम च यथा प्रियं भवति तथा इच्छामि तत्प्रकारमाह सप्त मरुतामि·
ति सप्तानां मरुतां वातस्थानविशेषाणां सप्त इमे वदधीनाः स्थानपाला लोकरक्षिणो भवंत्वित्यन्वयः २ तद·
र्थमेव रे पुत्रक मारुता इति नाम्ना प्रसिद्धाः दिव्यरूपा मम पुत्राः ये इमे वातस्कंधा इति सप्त प्रसिद्धाः तेषु वंति·

मिद्धा

प्रियं त्वत्कृतं मिमम गर्भविपर्यये मरुतां सप्त सप्तानां स्थानपाला भवंतु ते ३ वातस्कंधा इमे सप्त·
वरं त्वदिवि पुत्रक मारुता इति विख्याता दिव्यरूपा ममात्मजाः ४ ब्रह्मलोके चरत्वेक इंद्रलोके त
थापरः दिव्यवायुरिति ख्यातस्तृतीयोपि महायशाः ५ चत्वारस्तु सरस्रे ष्टदिशो वै तव शासना·
त संचरिष्यंति भद्रं ते कालेन हि ममात्मजाः ६ त्वत्कृतेनैव नाम्ना वै मारुता इति विश्रुताः तस्मा
त्त्वद्वचनं श्रुत्वा सहस्राक्षः पुरंदरः ७ ॥ नमोनमः ॥

त्यन्वयः ४ एक इति एको गणा इत्यर्थः प्रथमे स
प्तधा विभक्तस्य पुत्रस्यैकधाः सप्तधाकरणमित्यस्यार्थः सप्तपुत्राणां तेरस्यष्टमक्रत्वान इहाभिविशेद च महातेजा·
रुदंतमपीत्यादि स्खलितत्रोव्रतिते वाच्यं प्रवमपर इत्याचपि व्याख्येयं इंद्रलोकमिति प्रचुरपाठः दिव्यवायुः दिवि·
ष्वतितिसे भव इत्यर्थः ५ दिशः पूर्वादिमहादिशः ६ त्वत्कृतेन मारुदो मा रुद इति वचनमस्लेन ७ ॥ ७।

यथोक्तं ब्रह्मादिस्थानपालकत्वं ८ मातापुत्रौ दितीन्द्रौ ९ वर्णितं इचरितस्य प्रकृतं पोषयन्नाह एष इति सप्त।
षड्स्यान्वयः १० एवं प्रायः जगरीत्याय एवंभूते देशे विशालोत्पत्तिप्रकारमाह इक्ष्वाकोरिति ११ विशालेति हे

वा०

वा॰ टी॰
१५२

उवाच प्रांजलिर्वाक्यमितीदं वलसूदनः सर्वमेतद्यथोक्तं ते भविष्यति न संशयः ८ विचरिष्यंति भ
वने देवद्रूपा लवाल्मजाः एवं तौ मिथुनं शक्रमाभाता पुत्रौ तपोवने ९ जग्मतुस्त्रिदिवं राम कृतार्थौ वि।
तिनः श्रुतं एष देशः स काकुत्स्थ महेंद्राध्युषितः पुरा १० दितिं यत्र तपःसिद्धामेवं परिचचार सः इक्ष्वा।
कोस्तु नरव्याघ्र पुत्रः परमधार्मिकः ११ अलंबुसायामुत्पन्नो विशाल इति विश्रुतः तेन चासीदिह स्थाने वि
शालेति पुरी कृता १२ विशालस्य सुतो राम हेमचंद्रो महावलः सुचंद्र इति विख्यातो हेमचंद्रादनंतरः सुचं
द्रतनयो राम धूम्राश्व इति विश्रुतः धूम्राश्वतनयश्चापि संजयः समपद्यत संजयस्य सुतः श्रीमान्सहदेवः प्र
तापवान् कुशाश्वः सहदेवस्य पुत्रः परमधार्मिकः १५ कुशाश्वस्य महातेजाः सोमदत्तः प्रतापवान् सो
मदत्तस्य पुत्रस्तु काकुत्स्थ इति।

ताभ्यामितिद्विसवचः १२ कृतेऽत्र वंश इति प्रश्नस्योत्तरमाह विशालस्येत्यादि १३ १४ १५ १६।

इमां पुरीं संप्राप्त्यावसतीत्यन्वयः १७ वैशालिकाः विशालानिवासो येषां ते इत्यर्थः अनेन तत्समानवंश्यो-
पमिति सूचितं १८ अतएवाह इहाद्येति १९ २० २१ इति रामायणटीकायां सप्तचत्वारिंशः सर्गः ४७ पृष्ट्वेति

तस्य पुत्रो महातेजाः संप्रत्येष पुरीमिमां आवसत्यमरप्रख्यः सुमतिर्नाम दुर्जयः १७ इ
क्ष्वाकोस्तु प्रसादेन सर्वे वैशालिका नृपाः दीर्घायुषो महात्मानो वीर्यवन्तः सुधार्मिकाः १८
इहाद्य रजनीमेकां सुखं स्वप्स्यामहे वयं श्वः प्रभाते नरश्रेष्ठ जनकं द्रष्टुमर्हसि १९ सु
मतिस्तु महातेजा विश्वामित्रमुपागतं श्रुत्वा नरवरश्रेष्ठः प्रत्यागच्छन्महायशाः २० ।
पूजां च परमां कृत्वा सोपाध्यायः सबांधवः प्रांजलिः कुशलं पृष्ट्वा विश्वामित्रमथाब्रवी
त् २१ धन्योस्म्यनुगृहीतोस्मि यस्य मे विषयं मुने संप्राप्तो दर्शनं चैव नास्ति धन्यतरो ।
मम २२ इत्यार्षे रामायणे सप्तचत्वारिंशः सर्गः ४७ ॥ पृष्ट्वा तु कुशलं तत्र परस्पर ।
समागमे कथान्ते सुमतिर्वाक्यं व्याजहार महामुनिं १ ॥

सुमतिर्नाम विशालाराजा महामुनिं विश्वामित्रं कथान्ते विश्वामित्रेण कथ्यमानकथान्ते १ ॥ १ ॥

रा॰ वा॰ टी॰ १५२

गजसिंहगती गजवद्वीरमंदगतीसिंहवदप्रतिहतगती यद्वाप्रमत्तगजगतीरामोऽन्यगतिर्लक्ष्मणः तथा॰ शार्दूलाकृतीरामोवृषभाकृतिर्लक्ष्मणः २ पद्मपत्रविशालाक्षाविपनेनभाग्येसंपत्सूचिता वीरधर्मसूचक खड्गेत्यादि ३ यदृच्छयादैववशात्संपन्नानिमित्तविशेषेणयया कया चित्स्वेच्छयेत्यर्थोवादेवलोकात् गांभुवं॰

इमौकुमारौभद्रंतेदेवतुल्यपराक्रमौ गजसिंहगतीवीरौशार्दूलवृषभोपमौ २ पद्मपत्रविशाला क्षौखड्गतूणीधनुर्धरौ अश्विनाविवरूपेणसमुपस्थितयौवनौ ३ यदृच्छयेवगांप्राप्तौदेवलोका दिवामरौ कथंपद्म्यामिहप्राप्तौकिमर्थंकस्यवामुने ४ भूषयंताविमंदेशंचंद्रसूर्याविवांबरं प॰ रस्परेणसदृशौप्रमाणेंगितचेष्टितैः ५ किमर्थंचनरश्रेष्ठौसंप्राप्तौदुर्गमेपथि वराशुधधरौ वीरौश्रोतुमिच्छामितत्वतः ६ ॥ ६ ॥ ६ ॥

प्राप्तौअवतीर्णौ अमराविवास्थितौकिमर्थंकिंवा प्रयोजनमुद्दिश्य कथंअतिसुकुमारचरणाभ्यात केनप्रकारेणपद्भ्यामिहप्राप्तौकस्यवासुताविति शेषः प्रमाणंशरीरोन्नत्यादि इंगितंश्रोतव्याभिप्रायबोधकंचेष्टितंवचनगमनादि तैस्तुल्यौ ४ भूषयंतावित्यादि तैरेवसमानलक्षणत्वादितिभावः प्रमाणेत्यादि इत्यादिनाक्रमौतरेषांसमं सदृशौ ५ आश्चर्यमित्यादि पुनःपृच्छतिकिमर्थंचेत्यादि दुर्गमेकांतारसंबंधो॰

॥ ५८ ॥ ४

१५२

यथावृत्तं न्यवेदयत् दशरथकुमारावस्य यज्ञविघ्ननिवारणाय मदाकारणात् अनुपलालनात् सिद्धाश्र-
मं प्राप्य तत्र विघ्नकर्तॄन् राक्षसादीन् हत्वा पथि ताटकां च हत्वा जनकादिष्टत्तयायत द्रष्टुमागताविति न्यवे-
दयत् ७ परमं मन्येन मादरणीयौ प्राप्तावतिथी तौ पूजयामासेत्यन्वयः ८ सुमनेति तिपंचमीड्युडपि

तस्य तद्वचनं श्रुत्वा यथावृत्तं न्यवेदयत् विश्वामित्रवचः श्रुत्वा राजा परमविस्मितः ७ अतिथी पर-
मं प्राप्तौ पुत्रौ दशरथस्य तौ पूजयामास विधिवत्सत्कारार्हौ महाबलौ ८ ततः परमसत्कारं सु-
मतेः प्राप्य राघवौ उष्य तत्र निशामेकां जग्मतुर्मिथिलां ततः ९ तां दृष्ट्वा मुनयः सर्वे जनकस्य
पुरीं शुभां साधु साध्विति शंसन्तो मिथिलां समपूजयन् १० मिथिलोपवने तत्र आश्रमं दृश्य राघ-
वः पुराणं निर्जनं रम्यं पप्रच्छ मुनिपुंगवं ११ इदमाश्रमसंकाशं किंस्विदं मुनिवर्जितं ।

वाग्रार्षमे

तत ९ इत्थं प्रकारः साधु साध्विति शंसनं १० मिथिलोपवने मिथिलासमीपवने दृश्य दृष्ट्वा पुराणमि-
त्यादि त्रयमाश्रमविशेषणं ११ मुनिशान्दिप्यादाश्रमवादस्याशाश्रमतमवाश्रमसंकाशमाश्रमवदव

श्रुतरदं किंनुतस्यैवविवरणं कस्यायं पूर्वः पूर्वसमन्ततः १२ १३ अहल्यानुग्रहहेतुकालस्यतिजसंतोषे।
हंतेति यस्यैतदाश्रमपदंभवतिमहात्मनः कोपाच्छापाशमंप्राप्तशापंतन्नेकथयिष्यामीत्यवधाः १४ दिव्य।
संकाशः शुभवाश्रमवत्स्यः १५ अनेकानिवर्षपूगानि अनेकवर्षसमन्वितान् १६ तस्याश्रमिस्यअंतरंश्रुतिमिति

श्रोतुमिच्छामिभगवन्कस्यायंपूर्वआश्रमः १९ तच्छ्रुत्वाराघवेणोक्तंवाक्यंवाक्यविशारदः प्रत्युवा।
चमहातेजाविश्वामित्रोमहामुनिः १२ हंततेकथयिष्यामिशृणुतत्त्वेनराघव यस्यैतदाश्रमपदंशप्तं।
कोपान्महात्मनः १४ गौतमस्यनरश्रेष्ठपूर्वमासीन्महात्मनः आश्रमोदिव्यसंकाशः सुरैरपि।
सुपूजितः सचात्रतपआतिष्ठदहल्यासहितः पुरा वर्षपूगान्यनेकानिराजपुत्रमहायशाः १६ क
दाचिद्दिवसेरामततोदूरगतेमुनौ तस्यांतरंविदित्वाचसहस्राक्षः शचीपतिः मुनिवेषधरोभूत्वा।
अहल्यामिदमब्रवीत् १७ ऋतुकालंप्रतीक्षंतेनार्थिनः सुसमाहिते संगमंत्वहमिच्छामित्वयासह

धानवर्हितंकालंशचीपतिवित्यनेनशचीपतितोपिसौंदर्यमहल्यायाः मुनिवेषधरः गौतमवेषधरः समन्तूपंसमा
स्यावेपतिवत्समागानात १० ऋतुकालंशामोत्कर्षतिकालंअर्थिनोऽयंऋर्थिनः सुसमाहितेसंगमोचिन्तूपप्रमाथ

विज्ञायऋतुकालेप्रतीतंतेनार्थिनइतिवचनात्तपसाचाश्रमवर्तिसर्वप्राणिजातस्यशंकाभावायगो
तमवेषायमिंद्रइतिज्ञात्वेत्यर्थः देवराजकुतूहलात्समामभिलषतीतिकौतुकात् द्विरतिकौतुकाद्वेत्यर्थः
दुर्मेधाअहल्यातेनसहरत्यर्थंमतिंचकारेत्यन्वयः १९ कृतार्थातादृशादिव्यपुरुषलाभात्स्वात्मतपःफला २०

मुनिवेशंसहस्राक्षंविज्ञायरघुनन्दन मतिंचकारदुर्मेधादेवराजकुतूहलात् १९
अथाब्रवीत्सुरश्रेष्ठंकृतार्थेनांतरात्मना कृतार्थास्मिसुरश्रेष्ठगच्छशीघ्रमितः
प्रभो २० आत्मानंमांचदेवेशसर्वथारक्षगौतमात् इंद्रस्तुप्रहसन्वा
क्यमहल्यामिदमब्रवीत् २१ सुश्रोणिपरितुष्टोस्मिगमिष्या
मियथागतं एवंसंगम्यतुतदानिश्चक्रामोटजात्ततः २२।

शीघ्रगमनेहेतुर्भयमप्र
अहल्यायाआत्मनइंद।
स्ववशापतोरक्षणंतदाह आत्मानमित्यादिप्रहसन्नितिविशिष्टस्त्रीचरितेनप्रहासः रक्षणस्यदुर्लभत्वाद्वा
गौतमस्यतपोभंगस्यसहस्यकरणेनअग्निसमशापादिभयमस्त्यमितिवा २१ संगम्यअहल्ययासहेतिशेषः २ २।

रा॰
वा॰ टी॰
१४४

सशंङ्कसंभ्रमात् गौतमभयात् वरतानिष्क्रामेत्यन्वयः निर्गमसमये गौतमं प्रति तदागमनं प्रति शंकित।

ससंभ्रमाद्वरतरामशंकितो गौतमं प्रति गौतमं संददर्शाथ प्रविशंतं महामुनिं २३।
देवदानवदुर्धर्षं तपोबलसमन्वितं तीर्थोदकपरिक्लिन्नं दीप्यमानमिवानलं २४
गृहीतसमिधं तत्र सकुशं मुनिपुंगवं दृष्ट्वा सुरपतिस्त्रस्तो विषण्णवदनोभवत् २५
अथ दृष्ट्वा सहस्राक्षं मुनिर्वेषधरं मुनिः दुर्वृत्तं वृत्तसंपन्नो रोषाद्वचनमब्रवीत् २६ म
मरूपं समास्थाय कृतवानसि दुर्मते अकर्तव्यमिदं यस्माद्विफलस्त्वं भविष्यसि २७
गौतमेनैवमुक्तस्य सरोषेण महात्मना पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणात् २८
तथा शप्त्वा च वै शक्रं भार्यामपि च शप्तवान् इह वर्षसहस्राणि बहूनि निवसिष्यसि २९

भासीदिति — शेषः अथ।
निष्क्रमणानन्तरमेव २३, २६ ममगौतमस्य रूपं कृतवानसि मद्भार्याभोगरूपमकार्यं तस्मात् विफलः विग

= ॥ रा॰ १॥ ५॥ ४८ ॥ ४९ ॥ बाटहप्र

शापस्वरूपं वातभक्षेत्यादि तपंती स्वकृताकार्यस्मरणेन पीडिता पुराणादिप्रसिद्धशिलारूपप्राप्तिशापस्त
कल्पांतरीण इति न विरोधः अत्र शिलारूपत्वेन तात्पर्यकल्पने वातभक्षेत्यनेन न विरोधः स्पष्टमेवेति केचित् व
स्तुतस्तु दृश्येत्यस्य स्वरूपेणादृश्या शिला प्रतिमारूपेण सर्वैर्दृश्येत्यर्थः न च तावचैतन्यहानिरिति तथाहि पीडा।
स्यादेवेत्यतो वातभक्षत्वानुदति निराहाराभावाद्वा निराहारा तपंती स्वकर्मणेति शेषः तादृश्यपि भस्मशायि-
नी तनुस्थिता इति न कश्चिद्विरोधः इदं शापोपलक्षणं अनेन भगवच्छापस्य तदुक्तं पाद्मे शापदत्या

वातभक्षा निराहारा तपंती भस्मशायिनी अदृश्या सर्वभूतानामाश्रमेऽस्मिन्वसिष्यसि ३० यदैतद्
वनं घोरं रामो दशरथात्मजः आगमिष्यति दुर्धर्षस्तदा पूता भविष्यसि ३१ तस्यातिथ्येन दुर्वृत्ते
लोभमोहविवर्जिता मत्सकाशं मुदा युक्ता स्वं वपुर्धारयिष्यसि ३२ ॥

पुराभक्तो रामशङ्कापवायतः
अदृश्याख्या शिला जनेषा तलिंगः सर्वाडिति शिला तत्प्रतिमाकारा शतधाहोऽनंतवाची लिंगशब्देन भ-
गाकारं चिह्नं सत्ताङ्कितः ३० पापांतमाह यदेति घोरमित्यनेन मुनिराहित्यसूचनं रामो यदा आगमिष्यति तदा।
आगमनकाले जायमानचरणविन्यासेन तानायासतस्तत्पादस्पर्शात्पूता व्यभिचारकृतपापनाशान्पविष्य-
सि यद्वितेन च तपस्विनो दृष्टरूपा भविष्यसि ३१ ततो मत्सकाशं मत्सान्निध्यं प्राप्ता स्वं वपुः पूर्ववत्स्वदेहं रूपभ-

श्री. ३२ ॥

३३ ३४ कनककारस्तय दावित्यादि षष्पांत प्रतिपादकं संवत्सुर्धारयिष्यसीत्यंत श्लोकद्वयं प्रतिमसि॰
त्याह एवमुक्तेत्यादिमार्धश्लोकस्तु प्राणिक एवं वद्वात्रिंशत् श्लोका एवात्रेत्याहुः इति रामायणटीकायां।
अष्टचत्वारिंशः सर्गः ४८ धर्मक्षुद्रं यद्रस्यापि पाकस्याधर्मे प्रवृत्तौ वीतं दर्शयितुमाह अफल इति अवृषण

एवमुक्त्वा महातेजा गोतमो दुष्टचारिणीं इममाश्रममुत्सृज्य सिद्धचारणसेविते ३३ हिमवच्छि
खरे रम्ये तपस्तेपे महातपाः ३४ इत्यार्षे रामायणे अष्टचत्वारिंशः सर्गः ४८ । अफलस्तु ततः शक्रो
देवानग्निपुरोगमान् अब्रवीत् त्रस्तनयनः सिद्धगंधर्वचारणान् १ कुर्वता तपसो विघ्नं गोतमहा मस्य
त्मनः क्रोधमुत्पाद्य हि मया सुरकार्यमिदं कृतं २ अफलोस्मि कृतस्तेन क्रोधात्सा च निराकृता ।
शापमोक्षेण महता तपोस्यापहृतं मया ३ ।

इत्यर्थः त्रस्तेति त्रासेन सकारणं दैन्यं व्यज्यते १ सुर॰
कार्यमिति यथा सुरान्न एता सकलदेवस्यानापहारस्तेन कृतः स्यादिति भावः २ सा अहल्या उष्टचारि॰
त्वेति निराकृता उक्तशापरूपं वेत्स्नाया एवमपि सुरकार्यनिष्पत्तिः कथं तत्राह शापेति शापमिनु गोतमकर्तृकशा
पमोक्षेण नमस्यातपो मयाहृतं महतः शापेन विना तपोव्ययमिति भावः तपोव्ययसंपादकक्रोधोत्पादनमेव

सफलं मां सवृषणं सर्वे इत्यस्य वारद्वयं पाठे हे सर्वे सुरवराः सर्वे यूयमित्यन्वयो ज्ञेयः पद्वद्वयमित्येव पाठः
प्रायेण ४ पितृदेवाः कव्यवाहनादयः तानुपेत्य हव्यवाहनाग्निमुखेनाहुः अग्नेस्त्ववचनं श्रुत्वेति वस्यमाणा
नात् ५ अयं मेषः सवृषणो भवतो हविष्ट्वेन कल्पितः त्वत्सकाशात् गृहीत्वा ६ अफलस्त्विति न विद्यते फलं यस्य तं नहि मेषाश्च

तन्मां सुरवराः सर्वे सर्षिसंघाः सचारणाः सुरकार्यकरं यूयं सफलं कर्तुमर्हथ ४ शतक्रतोर्वचः श्रु-
त्वा देवाः साग्निपुरोगमाः पितृदेवानुपेत्याहुः सर्वे सह मरुद्गणैः ५ अयं मेषः सवृषणः शक्रो ह्यवृष-
णः कृतः मेषस्य वृषणौ गृह्य शक्रायाशु प्रयच्छत ६ अफलस्तु कृतो मेषः परां तुष्टिं प्रदास्यति भव-
तां हर्षणार्थं च ये च दास्यन्ति मानवाः ७ अक्षयं हि फलं तेषां यूयं दास्यथ पुष्कलं अग्नेस्तु वचनं श्रु-
त्वा पितृदेवाः समागताः उत्पाट्य मेषवृषणौ सहस्राक्षे न्यवेशयन् ८ ॥

वृषणात् स्वर्पं तदुक्तिचेत्न भवद्दृष्टेशेन कृतो हविष्ट्वेन कल्पितो योऽफलः षण्डो मेषः वृषणवृषणाभ्यां भिन्नो यो मेषो
मेषावयवो भवद्धविष्ट्वेन कल्पितः स भवतां परां तुष्टिं दास्यतीत्यन्वयात् ये चाफलं मेषं भवतां हर्षणार्थं ते
यायभवद्भ्यो दास्यन्ति तेषामक्षयं फलं यूयं दास्यथेत्यन्वयः ७ समागताः मिलिताः ८ ॥ ८ ॥ ८ ॥

रा॰
बा॰ टी॰
१४०

अफलान्मेषान्दानान्तदंशा रहि तान्याद्यतस्तेषां फलैः फलाभ्यां वृषणाभ्यामिन्द्रमयोजयन् ९ तदाप्रभृति ततो
हेतोः इंद्रो मेषवृषणोऽस्त्वयः तपसा प्रभावेन तपःकृतप्रभावेन वस्तापचारेण च १० महातेन इतिरा मम वो॰
यन्ने पुण्यकर्मणो गौतमस्य न तु ताटकयेव घोररूपया हि लमावष्टब्धमाश्रमं कथं गच्छेयमत आह देवरूपि
णीमिति शापस्यैतदवधिकत्वात् अयं तत्मादस्पर्शनान्नक्रमाप्तया देवरूपिणीमित्यर्थः पुनातारयभरे

तदाप्रभृति काकुत्स्थपितृदेवाः समागताः अफलान्भुंजते मेषान्फलैस्तेषामयोजयन् ९ इंद्रस्तु मे॰
षवृषणस्तदाप्रभृति राघव गौतमस्य प्रभावेण तपसा च महात्मनः १० तदागच्छ महातेज आश्रमं पु॰
ण्यकर्मणः तारयैनां महाभागामहल्यां देवरूपिणीं ११ विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः वि
श्वामित्रं पुरस्कृत्य आश्रमं प्रविवेश ह १२ ददर्श च महाभागां तपसा द्योतितप्रभां लोकैरपि समागम्य
दुर्निरीक्ष्यां सुरासुरैः १३ ॥

प्रस्तापरिफलकमाति ध्यं गृहीनाभ
तं प्रापयतीनैनामनुग्रहाण ११ १२ ददर्शेति
आश्रमप्रवेशकाले ः नाद्यापि मतः स्ववरणस्पर्शाव्यभिचारकृतपापनाशेन शापनिवृत्त्या शापवशात् सुराणदेवैः स॰
मागम्यापि लिखापि सर्वैर्लोकैर्दुर्निरीक्ष्यां विश्वामित्रोपयायाद्देवरूपिणीमिति तथा ददर्शेत्यर्थः तदुक्तं तपसा द्योति॰
तप्रभामिति एवं रघोनंतनस्य मेघवर्णमलक्ष्मणविश्वामित्राणामि वसद्वेदपपवं न भगवदातिथ्यकार्यमिति वा एवं

१३
१४७

प्रयत्नादित्यादिना दिव्यरूपवत्त्वमुक्तं १४ रामादेरपि दर्शनं नान्येन तस्य दृष्टतया किं त्वेवं रूपेण भर्तृसंतोषकारस्य भ-
र्तृमात्रविषयस्य भाग्यांतकरणस्याभावादित्याह धूमेनेति धूमेनाभिपरीतानि व्याप्तान्यंगानि यस्याः सा उपमात्रयम
स्मादृतत्वेन नभ्रंभसः लक्षणया तद्युक्तमेघस्य मध्यस्थां रविप्रभामिव ददर्श दुराधर्षां स्वहमणकां १५ तथाद-

प्रयत्नान्निर्मितां धात्रा दिव्यां मायामयीमिव धूमेनाभिपरीतांगीं दीप्तामग्निशिखामिव १४
सतुषारावृतां साभ्रां पूर्णचंद्रप्रभामिव मध्येंभसो दुराधर्षां दीप्तां सूर्यप्रभामिव १५ सा-
हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह त्रयाणामपि लोकानां यावद्रामस्य दर्शने १९ शा-
पस्यांतमुपागम्य तेषां दर्शनमागता १७ ॥ श्रः ॥:

शीनेहेतु माहसाहीति त्रयाणामपिलो-
कानां दुर्निरीक्ष्यत्वं शापवशाद्रामादीनामप्येवं दर्शनविषया जाता अन्येषां तु दर्पेव रामादीनां तु ऽ। दृष्ट-
हेतुरयः १६ शापस्यांतं तदंतस्यावधिकालं प्राप्य तेषां रामादीनां दर्शनं पूर्वोक्तप्रकारेण दर्शनविषयत्वं प्राप्ते-
त्यर्थः तयावपामेगच्छतस्तस्य पादस्पर्शान्महाशिला कांविवेयाशाभवत्सापि विस्मितो मुनिरब्रवीत

रा.

बा. टी.

शिलां तत्प्रतिमाकारां सोपि रामः विस्मितः सरवासीत् तथाभूतां तं दृष्ट्वा मुनिरवदद् इत्यर्थः शापदग्धां पुरा भ
र्ग्रां राम शक्राय दत्तां तये अहल्यां ख्यां शिलां जनेश तलिंगीकृतां स्वराट् बदांघ्रिस्पर्शनात्रस्यैषा पातेत्प्राह गोतमः
तस्मादियं ने पादाब्जस्पर्शात् सृष्टा भवत्स भोः इति यत् दृष्टा संतं मयेहानीतः से षे वेति शेषः एवं मङ्क करोत्यात्मस र्वे
षां मवि रो धे मं भवति कल्पान्तरपरत्वेना विरोध वर्णनं कतक व्याघु कं चित्त्यं यदपि तेन धूमेनेत्यादि सार्धश्लो
कैतामिवइनिर्दीरत्या मिति शोषं इदापि ताउन्निर्दीस्वेनहेतमाह सा हीति तेषां दर्शन मित्यत्र ते षां त्रया णां लो ॥

राघवौ तु तदा तस्याः पादौ जगृहतुर्मुदा स्मरंती गोतमवचः ॥

प्रतिजग्राह सा हि तौ १८ ॥ १८ ॥

कानामिति व्याख्यातं तत्र भिन्नितुं १० तदा सपदस्पर्शमात्रेण शिलारूपतां परित्यज्य गोतमवचः स्मरंती
महाश्रमप्राप्तवाघवसृज या पुनर्मत्सं बंधश्च त्येवं तद्वचः स्मरंती त्यर्थः स्त स्य शिलारूपपरित्यागमात्रेण तत ॥
क्षितता मकलिष्ठपावा स्याः तौ रामपादौ प्रतिजग्राह स्पष्टा प्रणनामयत्तौ रामलक्ष्मणौ प्रतिजग्राह पूज्य न
गृहमकोपीति तत्र प्रेषकाकाल्य इतेकवचनं प्रयोगात् १८ ॥ ॥ १८ ॥ ॥

सुसमाहिता प्रप्रसन्ना काकुत्स्थो रामः तस्यैव सुव्यक्ततया पूजनात् १९ देवदुंदुभिनिःस्वनैः सह पुष्पवृष्टिरासी-
त् रामस्य अहल्यायाश्चेत्यर्थः २० रामपूजया निष्पापत्वादहल्यायाः पूजा तपोवलविशुद्धांगी नदुललब्धराम-
स्पर्शेन शुद्धांगी प्राप्तपव गौतमस्य वशानन्नतचित्ता प्राप्तपव पूर्वैपरत्रकाले शरीरेणापि तदनुगा २१ अह

पाद्यमर्घ्यं तथातिथ्यं चकार सुसमाहिता प्रतिजग्राह काकुत्स्थो विधिदृष्टेन कर्मणा १९ पुष्पवृष्टि-
र्महत्यासीद्देवदुंदुभिनिःस्वनैः गंधर्वाप्सरसां चैव महानासीत्समुत्सवः २० साधुसाध्विति देवास्ता-
महल्यां समपूजयन् तपोवलविशुद्धांगीं गौतमस्य वशानुगां २१ गौतमोपि महातेजा अहल्यास-
हितः सुखी रामं संपूज्य विधिवत्तपस्तेपे महातपाः २२ रामोपि परमां पूजां गौतमस्य महामु-
नेः सकाशाद्विधिवत्प्राप्य जगाम मिथिलां ततः २३ इत्यार्षे रामायणे एकोनपंचाशः सर्गः ४९
ततः प्रागुत्तरां गत्वा रामः सौमित्रिणा सह विश्वामित्रं पुरस्कृत्य यज्ञवाटमुपागमत् १ रामस्तु
मुनिशार्दूलमुवाच सहलक्ष्मणः साध्वी यज्ञसमृद्धिर्हि जनकस्य महात्मनः २॥

हल्यासहितः सुखी इत्यनेन योगवलाद्रामागमनं ज्ञात्वा तत्स्थलादेव फा दृतिततदाश्रमप्राप्तिर्गौतमस्येति वोध्यं २२ २
२३ इतिरामायणटीकायामेकोनपंचाशः सर्गः ४९ प्रागुत्तरां ऐशानीं ततः गौतमाश्रमात् १२ ॥ २

रा॰
बा॰टी॰
१५५

बहूनीति स्पष्टं तत्र इति शेषः ३ पाकटीशतं अग्निहोत्रसंभारवाहकं ऋषिवाटाः यत्राश्रममागतानां साग्निहोत्र ऋषीणां निवासाः यद्वनैवं थाम्नावास देशविचारः देशमहत्यादिदेशो निवासस्थाने विधीयतो विचार्यतां ४ विविक्ते सलिलान्विते रम्ये तेनात्र स्थानसौकर्यं ५८ ऋत्विजोपीत्यत्र पुरस्कृत्यैत्यनुकर्षः महात्मा इति द्वितो

बहूनीह सहस्राणि नानादेशनिवासिनां ब्राह्मणानां महाभाग वेदाध्ययनशालिनां ३ ऋषिवाटाश्च दृश्यन्ते शकटीशतसंकुलाः देशो विधीयतां ब्रह्मन्यत्र वत्स्यामहे वयं ४ रामस्य वचनं श्रुत्वा विश्वामित्रो महामुनिः निवासमकरोद्देशे विविक्ते सलिलान्विते ५ विश्वामित्रमनुप्राप्तं श्रुत्वा स नृपवरस्तदा शतानंदं पुरस्कृत्य पुरोहितमनिंदितः ६ ऋत्विजोपि महात्मानस्त्वर्घमादाय सत्वरं प्रत्युज्जगाम सहसा विनयेन समन्वितः ७ विश्वामित्राय धर्मेण ददौ धर्मपुरस्कृतं प्रतिगृह्य तु तां पूजां जनकस्य महात्मनः ८ पप्रच्छ कुशलं राज्ञो यज्ञस्य च निरामयं स तांश्चाथ मुनीन्पृष्ट्वा सोपाध्यायपु

॥ ५ ॥

पार्थं यथान्यायेन प्रथमा ७ धर्मेण शास्त्रमार्गेण ददौ अर्घ्यमिति शेषः धर्मपुरस्कृतमित्यर्घ्यविशेषणं महाजं वा महार्हं वा प्रीतिपात्रयोपकल्पितमिति शास्त्रोक्तेन धर्मसाधनेन पुरस्कृतं तत्सहितमिति यावत् ८ राज्ञः कुशलं निरामयं यज्ञस्य पप्रच्छ तान् कुशलं निर्विघ्नत्वं समविकलत्वं वा यज्ञस्य कुशलं स विश्वामित्रः तानपृच्छदिति पृष्ट्वा कुशलमि

१५५

यथार्हं यथान्यायं प्रहृष्टवत् प्रहर्षवत् तोषसहितं यथा भवति तथेत्यर्थः समागच्छत् तं तोषसहितमालिंगनं यथा भवति तथा सर्वैः संगतो बभूवेत्यर्थः १ १२ यज्ञसमृद्धिर्वैकल्यराहित्यं साङ्गुण्यं च अत एव सफला कृता इष्टिरिति शेषः १३ १४ तत्र हेतुमाह यज्ञोपसदनमिति यज्ञस्थानं द्वादशाहं द्वादशदिनसमाहारः द्वादशदिना

यथार्हमृषिभिः सर्वैः समागच्छत्प्रहृष्टवत् अथ राजा मुनिश्रेष्ठं कृताञ्जलिरभाषत १ आसने भगवानास्तां सहैभिर्मुनिपुंगवैः जनकस्य वचः श्रुत्वा निषसाद महामुनिः पुरोधा ऋत्विजश्चैव राजा च सह मन्त्रिभिः। आसनेषु यथान्यायमुपविष्टाः समन्ततः १२ दृष्ट्वा स नृपतिस्तत्र विश्वामित्रमथाब्रवीत् अद्य यज्ञसमृद्धिर्मे सफला दैवतैः कृता १३ अद्य यज्ञफलं प्राप्तं भगवद्दर्शनान्मया धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुंगव १४ यज्ञोपसदनं ब्रह्मन्प्राप्तोऽसि मुनिभिः सह द्वादशाहं तु ब्रह्मर्षे दीक्षामाहुर्मनीषिणः १५ ततो भागार्थिनो देवान्द्रष्टुमर्हसि कौशिक इत्युक्त्वा मुनिशार्दूलं प्रहृष्टवदनस्तदा पुनस्तं परिपप्रच्छ प्राञ्जलिः प्रयतो नृपः इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ १ गजतुल्यगती वीरौ शार्दूलवृषभोपमौ अश्विनाविव रूपेण समुपस्थितयौवनौ १८

निरीक्षां कर्तव्यत्वेनाहुः दीक्षायां तावन्ति दिनान्यवशिष्टानि ऋत्विज आहुः १५ विश्वामित्रस्य योगेन सर्वं सामर्थ्यादाह देवान्द्रष्टुमर्हसीति १६ इमौ कुमारावित्यादि व्याख्यातप्रायं १७ ॥ १६॥

१५१

य

वा.

बा॰ टी॰

१५

मद्भ्यां वाहनरहिताभ्यां पद्भ्यां सुकुमारौ कोमलत्वात् कथमेतावद्दूरं प्राप्ताविति विस्मयः किमर्थमिति प्रयोजनप्रश्नः कस्य
वेति पुत्राविति शेषः उत्तरश्लोको यदि प्रमाणान्तर्गतः स्यैव विवरणं बोध्यं कचित्तु कस्य त्वय्य पुरुषस्य कार्यं साधयि॰
तुमिति शेषः आकृष्टत्वात् प्रयोजनप्रश्नेनैव गतार्थं १९ २० निवेदयदिति पादेऽडभाव आर्षः २२ तत्राव्यग्रमागम॰

यदृच्छयैव गां प्राप्तौ देवलोकादिवामरौ कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने १९ वरा॰
युधधरौ वीरौ कस्य पुत्रौ महामुने भूषयंताविमं देशं चंद्रसूर्याविवांबरं २० परस्परस्य सदृशौ
प्रमाणेंगितचेष्टितैः काकपक्षधरौ वीरौ श्रोतुमिच्छामि तत्वतः २१ तस्य तद्वचनं श्रुत्वा जनक॰
स्य महात्मनः निवेदयदमेयात्मा पुत्रौ दशरथस्य तौ २२ सिद्धाश्रमनिवासं च राक्षसानां
वधं तथा तत्रागमनमव्यग्रं विशालायाश्च दर्शनं २३ अहल्यादर्शनं चैव गौतमेन समागमं म
हाधनुषि जिज्ञासां कर्तुमागमनं तथा २४ ॥

नं ततः मम आक्रान्तेऽपि मार्गे भयरहितमागमनं २३ महाधनुषि जिज्ञासां तद्विषयां रामस्य दिदृक्षां ज्ञानमिह दर्शनं तत्कृ॰
वेदह्य धनुर्नेह मार्गे जिज्ञासां तथा रघुस्य मन्त्रोऽद्गमादिकं च कर्तुमागमनमिमेन संवेनिवेद्य विरराम तदेतिपादेऽथ

१५

२५ इत्यार्षे रामायणे पंचाशः सर्गः ५० तस्येति हृष्टरोमा समानंदः शायो दारश्रवणजसंतोषेण जातरोमोचः १ एवं विस्मयमिति भगवद्दर्शनस्यान्यासुलभत्वात् २ निषण्णावासने ३ अमुमय्यर्थमत्कं द्योतिशायेन मुनः ष्ट। कुतिदार्न्याया यांश्रयितेश्रतिश्रपिः प्रश्नेतेन्वया ४ रामेरामविषये पूजार्हे इति रामविषेषणं ५ देवेन दुं॥

152

यतत्सर्वं महातेजा जनकाय महात्मने निवेद्य विररामाथ विश्वामित्रो महामुनिः २५ इति बाल काण्डे पंचाशः सर्गः ५० तस्य तद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः हृष्टरोमा महातेजाः शतानंदो महातपाः १ गौतमस्य सुतो ज्येष्ठस्तपसा द्योतितप्रभः रामसंदर्शनादेव परं विस्मयमागतः २ स तौ नि षण्णौ संप्रेक्ष्य सुखासीनौ नृपात्मजौ शतानंदो मुनिश्रेष्ठं विश्वामित्रमथाब्रवीत् ३ अपि ते मुनि शार्दूल मम माता यशस्विनी दर्शिता राजपुत्राय तपो दीर्घमुपागता ४ अपि रामे महातेजा मम माता यशस्विनी वन्यैरुपाहरत्पूजां पूजार्हे सर्वदेहिनां ५ अपि रामाय कथितं यथा वृत्तं पुरातनं मम मातुर्महातेजो देवेन दुरनुष्ठि तं गौतमसंवेषधारणपूर्वकं तत्कर्तृकं दुरनुष्ठान रूपं मातुर्यदुत्तं चरितं पुरातनं तद्रामाय कथितमित्यन्वयः महातेज इति विश्वामित्रसंबोधनं ६ ॥

स्थानि

रा.
बा. टी
१५१

मम गुरूणां मम मातेत्यन्वयः अत्र वा द्वयं ममेति प्रयोगो हर्षातिशयात् रामसंदर्शनादित इत्यस्य गतमा
पेति शेषः आदिना पूजापाद्यस्वीकारो ७ महातेजा रामः मद्गोः सकाशात् पूजां प्राप्य इहचागत इति
हृस्यैवार्थस्य संपंतरेण प्रश्नः ८ शांतेन मनसा उपलक्षितो मे गुरुः इहागतेन गौतमाश्रममागतेन गौतम

अपि कौशिक भद्रं ते गुरूणां मम संगता मम माता मुनिश्रेष्ठ रामसंदर्शनादितः ७ अपि मे गुरु
णा रामः पूजितः कुशिकात्मज इहागतो महातेजाः पूजां प्राप्य महात्मनः ८ अपि शांतेन मनसा
गुरुर्मे कुशिकात्मज इहागतेन रामेण पूजितेनाभिवादितः ९ तच्छ्रुत्वा वचनं तस्य विश्वामित्रो
महामुनिः प्रत्युवाच शतानंदं वाक्यज्ञो वाक्यकोविदं १० नातिक्रांतं मुनिश्रेष्ठ यत्कर्तव्यं कृतं म
या संगता मुनिना पत्नी भार्गवेणेव रेणुका ११ तच्छ्रुत्वा वचनं तस्य विश्वामित्रस्य धीमतः श
तानंदो महातेजा राम वचनमब्रवीत् १२

पूजितेन रामेणाभिवादितः न तु मन्मात्रदोषातिरस्कृत
इति प्रश्नार्थः तं पूजांगीकारं वंदने प्रतिरक्षार्थं विद्धमिति भावः ९ १० यत्कर्तव्यं तन्नातिक्रांतं न विस्मृतं किं तु म
याकृतमेवेत्यर्थः भार्गवो जमदग्निः तत्कोपहतो रेणुका परशुराममाता यथा जमदग्निना संगता तद्वदि

१
३
४
५
६
टि

दिष्टांयपि न १२ विश्वामित्रयत्नतमवनेनसहप्रामित्तनपवचमातः पापोऽस्मरइतितंस्तोति अचिंत्येत्या।
दिनामनसाप्यन्यैनाशक्या तेनसहष्टादिकर्ता परमांगतिंजगतः परमहितप्रदं अत्येतवममचेत्याऽऽः १४ गो।

स्वागतंतेनरश्रेष्ठदिष्ट्याप्राप्तोसिराघव विश्वामित्रंपुरस्कृत्यमहर्षिमपराजितं १३ अचिंत्यकर्मात
पमाब्रह्मर्षिरमितप्रभुः विश्वामित्रोमहातेजावेत्स्यनंपरमांगतिं १४ नास्तिधन्यतरोरामत्वत्तोन्योभु।
विकश्चन गोप्ताकुशिकपुत्रस्तेयेनतप्तंमहत्तपः १५ श्रूयतांचाभिधास्यामिकौशिकस्यमहात्मनः।
यथाबलंयथातत्त्वंतन्मेनिगदतः शृणु १६ राजासीदेषधर्मात्मादीर्घकालमरिंदमः धर्मज्ञः।
कृतविद्यश्चप्रजानांचहितेरतः १७ प्रजापतिसुतस्त्वासीत्कुशोनाममहीपतिः कुशस्यपुत्रोबलवान्कु वा
शनाभः सुधार्मिकः १८ कुशनाभसुतस्त्वासीद्गाधिरित्येवविश्रुतः गाधेःपुत्रोमहातेजाविश्वामि
त्रोमहामुनिः १९ विश्वामित्रोमहातेजाःपालयामासमेदिनीं बहुवर्षसहस्राणिराजाराज्यमका
रयत २०

स्माप्रसदानादिना १५ बलंतपोबलंयथायादृशंतत्त्वंब्रह्मर्षित्वंचयथातत्त्व स्वाविलपर्धःद्वत्त
मितिकवित्याढः द्वनंचारितं १६ १७ सराजाकस्यपुत्रस्तत्राहप्रजापतेरित्यादि १८ १९ प्रकारयत्स्वार्थेणि २०।

153

वरूथिनीं चतुरंगबलं योजयित्वा समुपस्थाप्य तद्रूपाक्षौहिणीसंख्येन परिवृतो भ्रमन् २१ २२ २३ तपोनि
धायात् प्रशांतहरिणत्वं २४ स्नानमात्राधिकृतं तेनारतया देवलोकसंचारिणो देवर्षयः स्नानकर्माभयाधिकृ।

कदाचित्तु महातेजा योजयित्वा वरूथिनीं अक्षौहिणीपरिवृतः परिचक्राम मेदिनीं २१ न
गराणि च राष्ट्राणि सरितश्च महागिरीन् आश्रमान्क्रमशो राजा [illegible] विचरन्नाजगाम ह २२
वसिष्ठस्याश्रमपदं नानापुष्पलताद्रुमं नानामृगगणाकीर्णं सिद्धचारणसेवितं २३ दे।
वदानवगंधर्वैः किन्नरैरुपशोभितं प्रशांतहरिणाकीर्णं द्विजसंघनिषेवितं २४ ब्रह्म
र्षिगणसंकीर्णं देवर्षिगणसेवितं तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभिः २५ सत।
तं संकुलं श्रीमद्ब्रह्मकल्पैर्महात्मभिः अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा २६।

ताब्रह्मर्षयो ब्रह्मनिष्ठाः अग्नितुल्यैरृषिभिः संकुलं व्याप्तमित्यन्वयः २५ तथा ब्रह्मकल्पैः चतुर्मु [illegible] ॥
खकल्पैः तेषां च महत्तपोवैभवत्वात् अब्भक्षैर्मात्रभक्षैः संकुलं २८ ॥ २९ ॥ २८

ब्रह्मणेमनःस्वेजावालखिल्यावैखानसाश्च येनखास्ते वैखानसायेवालास्तेवालखिल्याइतिश्रुतेरितिकत।
कः २२ परमकल्याणस्वभावत्वाद्ब्रह्मलोकोपमाश्रमस्य जयतांश्रेष्ठाणां २८ इतिश्रीरामायणटीकायांप

फलमूलाशनैर्दान्तैर्जितदोषैर्जितेंद्रियैः ऋषिभिर्वालखिल्यैश्चजपहोमपरायणैः २२ अन्यैर्वैखा।
नसैश्चैवसमंतादुपशोभितं वसिष्ठस्याश्रमपदंब्रह्मलोकमिवापरं ददर्शजयतांश्रेष्ठोविश्वामित्रो
महाबलः २८ इत्यार्षेरामायणेवालकांडेएकपंचाशःसर्गः ५१ ततःष्ट्वापरमप्रीतोविश्वामित्रो
महाबलः प्रणतोविनयाद्वीरोवसिष्ठंजपतांवरं १ स्वागतंतववचेत्युक्तोवसिष्ठेनमहात्मना आस।
नंचास्यभगवान्वसिष्ठोव्यादिदेशह २ उपविष्टायचतदाविश्वामित्रायधीमते यथान्यायंमुनि
वरःफलमूलमुपाहरत् ३ प्रतिगृह्यतुतांपूजांवसिष्ठाद्राजसत्तमः तपोऽग्निहोत्रशिष्येषुकु।
शलंपर्यपृच्छत ४ विश्वामित्रोमहातेजावनस्पतिगणेतदा सर्वत्रकुशलंप्राहवसिष्ठोराजसत्त

कपंचाशःसर्गः ५१ वसिष्ठंप्रणतोवसिष्ठेनस्वागतमित्युक्तइतियोजना १ आदिदेशप्रादापयत २ फ।
लमूलमित्जातिवाचकत्वं ३४ वनस्पतिशब्देनवृक्षमात्रं नतुविनापुष्पंफलवंतएवतादृशेष्वपिकुशलंप।

पंचाशत्तमसर्गप्रारंभः ५१ ॥

रा॰
बा॰ टी॰
१५२

जपतांतपस्विनां ८ कच्चिदितिप्रश्नोहे धार्मिक धर्मेणतदनुष्ठानेनप्रजारंजयन् राजवृत्तेनन्यायेनार्जनसं॰
रक्षणवर्धनंपालनंतेनतथासत्पात्रेप्रतिपादनं सराजवृत्तेचतुर्विधमित्युक्तेनराजवृत्तेनपालयसेइत्यन्वयः ७ स
मतावेतनदानादिना ८ वलेषुचतुरंगेषुप्रधर्षसमर्थेषुपुत्रपौत्रेगवाक्षप्र॰ भृतित्वादेकवचनं ९ पकोव॰

सत्वोपविष्टंराजानंविश्वामित्रंमहातपाः पप्रच्छजपतांश्रेष्ठोवसिष्ठोब्रह्मणःसुतः ८ कच्चित्ते॰
कुशलंराजन्कच्चिद्धर्मेणरंजयन् प्रजाःपालयसेराजन्राजवृत्तेनधार्मिक ७ कच्चित्तेसुभृताभृत्याः
कच्चित्तिष्ठंतिशासने कच्चित्तेविजिताःसर्वेरिपवोरिपुसूदन ८ कच्चिद्वलेषुकोशेषुमित्रेषुचप॰
रंतप कुशलंतेनरव्याघ्रपुत्रपौत्रेतथानघ ९ सर्वत्रकुशलंराजावसिष्ठंप्रत्युदाहरत् विश्वा॰
मित्रोमहातेजावसिष्ठंविनयान्वितं १० कृत्वातौसुचिरंकालंधर्मिष्ठौताःकथास्तदा मुदापर॰
मयायुक्तौप्रीयेतांतौपरस्परं ११ ततोवसिष्ठोभगवान्कथांतेरघुनंदन विश्वामित्र[illegible]मिदं।
वाक्यमुवाचप्रहसन्निव १२ आतिथ्यंकर्तुमिच्छामिवलस्यास्यमहावल तवचैवाप्रमेयस्ययथा॰

मिष्टाक्षेष्टाविशिष्टवाचौ १० तौउक्तविशेषणकौवसिष्ठविश्वामित्रौताःकथाः अन्योन्यकुशलप्रश्नोत्तरादिरूपा
प्रीयेतांमुदःप्रावयामासतुःतोबालेटि. ११ प्रहसन्निवउत्तमातिथ्यलाभजहर्षेण १२ संप्रतीच्छेमभवत्कृतमातिथ्यामेगां।

ज ॥ ५३ ॥

देवगर्भ विशेषणाणामतिथिश्रेष्ठ इति १४ पूजावाक्येन प्रीति प्यंकरिष्यामीत्येवंरूपेणैव मम पूजनं कृतमिति।
राजाब्रवीत् १५ विद्यते यत्तवाश्रमे फलमूलं तेन पूजित इत्यनेन राजभोज्याभावादनेनैव वयं संतुष्टा इति ध्व॰

सत्क्रियां हि भवानेतां प्रतीच्छतु मया कृतां राजंस्त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः १४ ए॰
वमुक्तो वसिष्ठेन विश्वामित्रो महामुनिः कृतमित्यब्रवीद्राजा वाक्येन मे त्वया १५ फलमूलेन
भगवन्विद्यते यत्तवाश्रमे पाद्येनाचमनीयेन भगवद्दर्शनेन च १६ सर्वथा च महाप्राज्ञ पूजा
र्हेणा सुपूजितः गमिष्यामि नमस्तेस्तु मैत्रेणेक्षस्व चक्षुषा १७ एवं ब्रुवंतं राजानं वसिष्ठः पुनरेव
हि न्यमंत्रयत धर्मात्मा पुनः पुनरुदारधीः १८ बाढमित्येव गाधेयो वसिष्ठं प्रत्युवाच ह यथा
प्रियं भगवतस्तथास्तु मुनिपुंगव १९ एवमुक्तस्तथा तेन वसिष्ठो जपतां वरः आजुहाव ततः
प्रीतः कल्माषीं धूतकल्मषः

प्रिय

ति: १६ पूजार्हेणावयेति शेषः मैत्रेणा स्नेहयुक्तेन मनवर्धीयाजंतं १७
निमंत्रणं भोजनांगीकाराय प्रार्थनं १८ बाढमित्यस्य विवरणं यथाप्रियमित्यादि १९ तेन विश्वामि

शवलेतस्मामेऽस्यराजर्षेर्महार्हेणभोजनेनसत्कारंकर्तव्यवसितोस्मितंमेव्यवसायंविधत्स्वसंपादयतदुपयो
गिपदार्थदानेनेतिशेषः २१ षड्रसेषुमधुरादिषुयस्ययदभिहृजितंअभीष्टं २२ तत्सर्वंयथाकामंतस्मौत्सृजन।
तिक्रमेणममकृतेमत्तोवार्थेरसेनान्नमरसमुतान्नेन भक्ष्यशाकुल्यादिनारसेनेतिसर्वान्वापि पानेनपानकरसा।

एह्येहिशबलेक्षिप्रंशृणुचापिवचोमम सबलस्यास्यराजर्षेःकर्तुंव्यवसितोस्म्यहं २१ भो
जनेनमहार्हेणसत्कारंसंविधत्स्वमे यस्ययस्ययथाकामंषड्रसेष्वभिपूजितं २२ तत्सर्वं।
कामधुग्दिव्येअभिवर्षकृतेमम रसेनान्नेनपानेनलेह्यचोष्येणसंयुतं २३ अन्नानांनि
चयंसर्वंसृजस्वशबलेद्रुतं २३ इत्यार्षेरामायणेबालकांडेद्विपंचाशः ५२ सर्ग।
मुक्तावसिष्ठेनशबलाशत्रुसूदन विदधेकामधुक्कामान्यस्ययस्येप्सितंयथा १॥

दिनालेह्यंजिह्वाग्राह्यंतोऽत्रादिचोष्यंअथवपुटग्राह्यंआम्रफलादिअन्नानांशाल्यन्नादीनां निचयंराशिं २३ इति
रामायणटीकायांद्विपंचाशः ५२ यस्ययस्ययथायथेप्सितंतथातथा सर्वान्कामान्विदधेइत्यर्थः १॥

तदेव प्रपंचयति इक्षूनिति सविकारानिक्षून् मधून् क्षौद्राणि मैरेयं च धातकीगुडवारिभिः कृतं मद्यं
मद्यान् वरासवान् उच्चावचान् अनेकविधान् ३ उष्णाढ्यस्य उष्णत्वगुणयुक्तस्य राशयः आसन्निति शेषः मृष्टा
न्यन्नानि पायसभेदाः दधिकुल्याः दधिपललतां गमयादेरपि २ अनेकविधस्वादुरसयुतानां खाण्डवानां भक्ष्यवि

156

इक्षून्मधूंस्तथा लाजान्मैरेयांश्च वरासवान् पानानि च महार्हाणि भक्ष्यांश्चोच्चावचानपि ३ उष्णाढ्य
स्यौदनस्यापि राशयः पर्वतोपमाः मृष्टान्नानि सूपांश्च दधिकुल्यास्तथैव च २ नानास्वादुरसानां च
खाण्डवानां तथैव च भोजनानि सुपूर्णानि गौडानि च सहस्रशः ४ सर्वमासीत्सुसंतुष्टं हृष्टपुष्टजना
युतं विश्वामित्रबलं राम वसिष्ठेन सुतर्पितं ५ विश्वामित्रोऽपि राजर्षिर्हृष्टपुष्टस्तदाभवत् सान्तःपु
रवरो राजा सब्राह्मणपुरोहितः ६ सामात्यो मंत्रिसहितः सभृत्यः पूजितस्तदा युक्तः परेण हर्षेण व
सिष्ठमिदमब्रवीत् ७

शेषाणां पूर्णानि भक्ष्यविशेषवर्तीनि पूर्णानि भोजनपात्राणि गौडानि राजान्नानि आस
न्निति शेषः गौडम् इक्षुविकारविधानमिति कतकः ५ हृष्टं सुसंतोषः पुष्टिः दृढपुष्टिस्तद्युक्तजनैरासमन्ता
द्युक्तः ५ सान्तःपुरश्रेष्ठैः सहितः ६ अमात्याः कर्मसचिवाः मंत्रिणो मंत्रसचिवाः पूजितः आतिथ्येन सत्कृ

वा.
बा. टी.
१५५

पूजार्हेणमादृशपूजाकरणयोग्येन पूजितइत्यस्यैवविवरणमादरातिशययोतनायसुसत्कृतइतिहर्षाद्वापुन॰
रुक्तिरदोषः ८ शतसहस्रेणनिष्क्रयमस्तेतेनेतिशेषः ९ धर्मतोन्यायतःपार्थिवस्यरत्नस्वामित्वात्रत्नहरत्वाच्च

पूजितोहंत्वयाब्रह्मन्पूजार्हेणसुसत्कृतः श्रूयतामभिधास्यामिवाक्यविशारद ८ गवां
शतसहस्रेणदीयतांशबलामम रत्नंहिभगवानेतद्रत्नहारीचपार्थिवः ९ तस्मान्मे।
शबलांदेहिममैषाधर्मतोद्विज एवमुक्तस्तुभगवान्वसिष्ठोमुनिपुंगवः १० विश्वामि
त्रेणधर्मात्माप्रत्युवाचमहीपतिं नाहंशतसहस्रेणनापिकोटिशतैर्गवां ११ राज।
न्दास्यामिशबलांराशिभीरजतस्यवा नपरित्यागमर्हेयंमत्सकाशादरिंदम १२ शाश्व
तीशबलामह्यंकीर्तिरात्मवतोयथा अस्यांहव्यंचकव्यंचप्राणयात्रातथैवच १३ ॥

वाक्यं

ममैषायोग्येतिशेषः १० ॥ १२ कुतइत्यंयपरित्यागंनार्हेस्यत्राह शाश्वतीतियथात्मवतोराजयोगवतोविद्यादिजा॰
कीर्तिःशाश्वतीतिनित्यंममवडायवंममवाप्यब्रह्मदत्ता शबलानित्यंममत्वंवडापवमादेवीजमाह हव्यंदैवं कव्यंपित्र्यं प्रा॰

प्राप्तमधीतं बलिर्भूतबलिः होमो वैश्वदेवादिः प्राप्तश्चास्य सर्वत्रानुकर्षः स्वाहाकारवषट्कारौ तत्साध्ययज्ञो विद्याश्रुतिपठनमयः प्राशनेनुविनष्टदेः प्राप्तात्मेदं हृ पाटवाच्चन तत्साध्य विद्यानामेतदायत्तत्वं १४ एतत्सर्वं मानिष्यादि एतन्नृपाबलात् रूपमेव सर्वं हं समेनशापेइतिशेषः तथादर्शनादिना ममतुष्टिकरीच १५ कार

प्राप्तमग्निहोत्रं च बलिर्होमस्तथैव च स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा १४
प्राप्तमत्र राजर्षे सर्वमेतन्न संशयः सर्वस्वमेतत्सत्येन मम तुष्टिकरी तथा १५ का
रणैर्बहुभी राजन्न दास्ये शबलां तव वसिष्ठेनैवमुक्तस्तु विश्वामित्रोऽब्रवीत्तदा १६ ।
संरब्धतरमत्यर्थं वाक्यं वाक्यविशारदः हैरण्यकक्ष्याग्रैवेयान् सुवर्णाङ्कुशभूषितान् १७
ददामि कुञ्जराणां ते सहस्राणि चतुर्दश हैरण्यानां रथानां च श्वेताश्वानां चतुर्युजां १८

रोक्तैः साभिप्रायं चैतद्बोध्यं १६ संरब्धतरमत्याग्रहयुक्तं हैरण्याः हिरण्यविकाराः कक्ष्याः घटोपेतमध्य बंधनार्थं शृंखलाः ग्रैवेयग्रीवालंकारशृंखलादि १७ श्वेताश्वानां चतुर्युजां चेतः सप्ताकश्वेताश्वप्रतानामि

रा.
वा. टी.
१५८

किंकिणीकविभूषितानितिच्छेदः द्वितीया ह्यानां विशेषणमेतत् देशो बाल्हीकादि कुलमुच्चैःश्रवआदीनां गंधर्वकुलं वा गंधर्वकुलजातत्व[illegible]मितिपुराणवचनात् १९ अनेकवर्णौर्विभक्तानां प्राग्भेदानां वयःस्था

ददामि ते षष्टिनागानां षष्ठीः किंकिणीकविभूषितान् हयानां देशजातानां कुलजानां महौजसां १९
सहस्रमेकं दशच ददामि तव सुव्रत नानावर्णविभक्तानां वयस्थानां तथैवच २० ददाम्येकां गवां कोटिं शबलादीयतां मम यावदिच्छसि रत्नानि हिरण्यं वा द्विजोत्तम २१ तावद्ददामि ते सर्वं दीयतां शबला मम एवमुक्तस्तु भगवान्विश्वामित्रेण धीमता २२ न दास्यामीति शबलां प्राह राजन्कथंचन एतदेव हि मे रत्नमेतदेव हि मे धनं २३ एतदेव हि मे सर्वमेतदेव हि जीवितं दर्शश्च पौर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः २४ एतदेव हि मे राजन्विविधाश्च क्रियास्तथा अदोमूलाः क्रियाः सर्वा मम राजन्न संशयः २५।

नां तरुणानां वयःस्थस्तरुणः[illegible]णोश्वे
तिकोशात् २० एकां कोटिमित्यन्वयः यावदिति उतोप्यधिकं यावदिच्छसि तमर्थः २१ २२ एतत् शबलारूपं वस्तु २ आप्तदक्षिणा उत्तमेन हयादिवद्दक्षिणा प्येतदधीनेति सूचितं २४ एतदेव क्रिया उत्पत्यैव विवरणं अतोमूलाः।

॥ १९ ॥ [illegible]

सर्वपादानाभावेऽहेनगर्भविशेषणं कामदोहिनीं स्वेच्छाविषयदोहनशीलां काव्यलिंगमलंकारः २९ इ।
ति बालकांडे त्रिपंचाशः सर्गः ५३ अथ दंडोपायप्रवृत्तिमाह कामधेनुमिति नत्यजनेनात्यजन् अपकर्षत
बलादिति शेषः १२ राजभृतैः राजसेवकैः भंदेरितिकृ वितपाद्ः ह्रियमाणः कर्मणि लिङ् भृशादुःखिताभृ

वहुनाकिंप्रलापेन न दास्ये कामदोहिनीं २९ इत्यार्षे रामायणे त्रिपंचाशः सर्गः ५३ कामधेनुं
वसिष्ठोपि यदा न त्यजते मुनिः तदास्य शबलां राम विश्वामित्रोन्वकर्षत १ नीयमाना तु शबला रा
म राम महात्मना दुःखिता चिंतयामास रुदंती शोककर्शिता २ परित्यक्ता वसिष्ठेन किमहं
सुमहात्मना याहं राजभृतैर्दीना ह्रियेयं भृशदुःखिता ३ किं मयापकृतं तस्य महर्षेर्भावितात्म
नः यन्मामनागसं दृष्ट्वा भक्तां त्यजति धार्मिकः ४ इति सा चिंतयित्वा तु निःश्वस्य च पुनः पुनः ज
गाम वेगेन तदा वसिष्ठं परमौजसं ५ निर्धूय तांस्तदा भृत्यान्शतशः शत्रुसूदन जगामानिलवे
गेन पादमूलं महात्म

पोनप्रतिषेधेन दुःखितास्मीति शेषः भृशा पाहो वहुपर्यायो वा ३ अपकृतं अपरा
धं दृष्ट्वा तां वापि भक्तां सेवापरां ४ ५ शतशो भृत्यानपकर्षकान् पादमूलं पादसमीपं महात्मनो वसि

॥ ५८ ॥

158

रा.
बा. टी.
१५

रोदनमश्रुपातः क्रोशनमार्तशब्दः रुदंत्यापवज्रविसर्जनीयगमनं रुदंत्यैव वचकथनमित्येतदर्थं द्वी रुदंतीति ७
सकाशः मन्नीयस्य साभगिनी ९ बलात्त्राज्ञातमतोऽविवेकी ९ महममनहितद्वलेनतत्समित्यर्थः तपोव
लेनत्वत्समित्यर्थः तपोवलेनतर्हि दंड्यतां तत्राह राजा चेत्यादि राजत्वात्तपोवलेननदंड्य इतिभावः तदस्याति

शवला सा रुदंती च क्रोशंती चेदमब्रवीत् वसिष्ठस्याग्रतः स्थित्वा रुदंती मेघनिस्वना ७ भ
गवन्किं परित्यक्ता त्वयाहं ब्रह्मणः सुत यस्माद्राजभटा मां हि नयंते त्वत्सकाशतः ८ प.
वमुक्तस्तु ब्रह्मर्षिरिदं वचनमब्रवीत् शोकसंतप्तहृदयां स्वसारमिव दुःखितां ९ न त्वां त्य
जामि शवले नापि मेऽपकृतं त्वया एष त्वां नयते राजा बलान्मत्तो महाबलः १० नहि तुल्यं
बलं मह्यं राजा त्वद्य विशेषतः बली राजा क्षत्रियश्च पृथिव्याः पतिरेव च ११

किष्किंधायां लेभस्व
वधर्मस्य जीवितस्य शुभस्य च राजानो वानर [illegible] श्रेष्ठ प्रदातारो न संशयः तान्न हिंसान्न चाक्रोशे
न्नाक्षिपेन्नाप्रियं वदेत् देवा मानुषरूपेण चरंत्येते महीतल इति श्रुयविशेषतः श्रुयकृत्तानि यादिने तेनातिथि.
माहिंशेषतोऽवध्य इतिभावः बली राजेत्यनेन न प्रबोजेयत्वमुक्तं पृथिवीपतिः क्षत्रियत्वेनतदृध्यस्य महापातक

१५

।वलित्वमेवउपपादयति इयमिति हस्तिध्वजैः समाकीर्णा १२ विनीतवत् विनयोपेतं १३ नवलंक्षत्रस्यवलंवल
वत्तराः क्षत्रियादिभ्यः ब्राह्मणाः क्षत्रियवलादपिवलवत्तरं ब्राह्मंअधिकं १४ तुभ्यंतवनत्वयासदृशोपीतिशेषः वलवत्तरइति
दूरेइतिशेषः महावीर्यःमहावीर्योपितवतेजस्तेजस्त्वेत्यादि १५ नत्वमेवतस्यवलनाशायतत्राह नियुंक्ष्वेति।

इयमक्षौहिणीपूर्णागजवाजिरथाकुला हस्तिध्वजमहाकीर्णातेनासौवलवत्तमः १२ एवमुक्तावसिष्ठे
नप्रत्युवाचविनीतवत् वचनंवचनज्ञामांब्रह्मर्षिममितप्रभं १३ नवलंक्षत्रियस्याहुर्ब्राह्मणावलवत्तराः
ब्रह्मन्ब्रह्मवलंदिव्यंक्षात्राच्चवलवत्तरं १४ अप्रमेयंवलंतुभ्यंनत्वयावलवत्तरः विश्वामित्रोमहावीर्यस्ते
जस्तवद्रुतामदं १५ नियुंक्ष्वमांमहातेजस्त्वंब्रह्मवलसंभृतां तस्यदर्पंवलंयत्नं नाशयामिदुरात्मनः
१६ इत्युक्तस्तु तयारामवसिष्ठस्तुमहायशाः सृजस्वेतितदोवाचवलंपरवलार्दनं १७ तस्यास्तद्वचनं श्रु
त्वासुरभिःसासृजत्तदा तस्याहुंभारवोत्सृष्टाःपह्लवाःशतशोनृप १८ ॥

कामधेनुत्वात्रियोगापेक्षायत्रकाम्यार्थस्रष्ट्रीवेवतस्याःसामर्थ्यात् ब्रह्मवलसंभृतांतादृशकार्यसमर्थत्वेन
मांध्यायस्वेत्यर्थः १६ १७ हुंभानामगवांशब्दाःपह्लवशकयवनकांवोजवर्वराम्लेच्छजातिविशेषाः १८ ॥।

पश्यतस्त्यनादरे षष्ठी विस्फारितं विवृतं १९ अर्दिताः पीडिताः २० २१ प्रभावद्भिर्दीप्तं तेजः हेमाः किंजल्कस-
वर्णैः हेमवर्णाम्बरं पीताम्बरं २२ २४ इति रामायणे टीकायां चतुःपंचाशः सर्गः ५४ आकुलायमानान्

नाशयंती बलं सर्वं विश्वामित्रस्य पश्यतः स राजा परमक्रुद्धः क्रोधविस्फारितेक्षणः १९ पह्लवान्नाश-
यामास शस्त्रैरुच्चावचैरपि विश्वामित्रार्दितान्दृष्ट्वा पह्लवान्शतशस्तदा २० भूय एवासृजद्घोराञ्छ-
कान्यवनमिश्रितान् तैरासीत्संवृता भूमिः शकैर्यवनमिश्रितैः २१ प्रभावद्भिर्महावीर्यैर्हेमकिंजल्कस-
न्निभैः दीर्घासिपट्टिशधरैर्हेमवर्णाम्बरावृतैः २२ निर्दग्धं तद्बलं सर्वं प्रदीप्तैरिव पावकैः ततोऽस्त्राणि
महातेजा विश्वामित्रो मुमोच ह २३ तैस्तैर्यवनकांबोजा बर्बराश्चाकुलीकृताः २४ इत्यार्षे रामायणे च-
तुःपंचाशः सर्गः ५४ ततस्तानाकुलान्दृष्ट्वा विश्वामित्रास्त्रमोहितान् वसिष्ठश्चोदयामास कामधु-
क्सृज योगतः १ तस्या हुंकारतो जाताः कांबोजा रविसन्निभाः ऊधसस्त्वथ संभूताः पह्लवाः शस्त्रपाण-
यः योनिदेशाच्च यवनाः शकृद्देशाच्छकास्तथाः रोमकूपेषु म्लेच्छाश्च हारीताः सकिरातकाः ३ ।

कामधुगिति संबोधनं योगतः योगमहिम्ना १२ रोमकूपेषु रोमकूपेभ्यः म्लेच्छहारीतकिराता जातिविशेषाः ३।

विश्वामित्रस्य तत्सैन्यं ४ विश्वामित्रसुतानांशतं क्रुधिरेवधेनोर्वलमतोऽयमेवनाशनीयइत्याशयेनवसिष्ठमभ्य
यावत् ५ हुंकारेणतपोवलसंभृतेन त्ताविपदेपिष्टाध्यिवीपतिनाभावान्नवधेब्रह्मप्रायश्चित्तं आततायित्वादेतिभा
वः ८ मुहूर्त्तेनभस्मीकृताइत्यपवर्गेतृतीयामासेनात्तुवाकोऽधीतइतिवत् ९ सर्वान्सुज्ञानसव्रीडमितिक्रियाविशे॰

तैस्तैर्निषूदितंसर्वंविश्वामित्रस्यतत्क्षणात् सपदातिगजंसाश्वंसरथंरघुनंदन ४ दृष्ट्वानिषू[illegible]दितंसैन्यंव
सिष्ठेनमहात्मना विश्वामित्रसुतानांतुशतंनानाविधायुधं ५ अभ्यधावत्ससंक्रुद्धंवसिष्ठंजपतांवरं हुंकारे
णैवतान्सर्वान्निर्ददाहमहानृषिः ८ तेसाश्वरथपादाताववसिष्ठेनमहात्मना भस्मीकृतामुहूर्त्तेनविश्वा॰
मित्रसुतास्तथा ९ दृष्ट्वाविनाशितान्सर्वान्बलंचसुमहायशाः सव्रीडंचिंतयाविष्टोविश्वामित्रोभवत्तदा १० स
मुद्रइवनिर्वेगोभग्नदंष्ट्रइवोरगः उपरक्तइवादित्यःसद्योनिष्प्रभतांगतः ११ हतपुत्रवलोदीनोलूनपक्षइव॰
द्विजः हतसर्ववलोत्साहोनिर्वेदंसमपद्यत १२ सपुत्रमेकंराज्यायपालयेतिनियुज्यच पृथिवींक्षत्रधर्मेणवन
मेवाभ्यपद्यत १३ ॥

सत्त्वं १० निर्वेगोवेगसमुद्रोपमानिष्प्रभत्वेइतरेउपमे उपरक्तोराहुग्रस्तः ११ हतसर्ववलोत्साहः सर्वाणिवलानिशारी
रवौद्धावादीनितज्जन्योत्साहहीनः निर्वेदंसर्वत्रनिष्फलत्वबुद्धिं[illegible] चित्तखेदं १२ एकंप्रवाशिष्टमितिशेषः राज्याय॰

रा॰
बा॰ टी॰
१५५

दर्शयामास आत्मानमिति शेषः १२ २४ सांगानि उपकारकाणि अंगानि आराद् उपकारकाणि उपांगानि मंत्रा उपनिषदः समाहारद्वंद्वे द्वंद्वाच्चुदेति टच् तेन सहितो धनुर्वेद इत्यर्थः रहस्यं आचार्यमुखैकगम्यं विद्याजातं १६ १७ प्रसादात्तनत्प

सगत्वाहिमवत्पार्श्वेकिंनरोरगसेविते महादेवप्रसादार्थंतपस्तेपेमहातपाः १२ केनचित्त्वथकालेनदेवेशो वृषभध्वजः दर्शयामासवरदोविश्वामित्रंमहामुनिं १३ किमर्थंतप्यसेराजन्ब्रूहियत्तेविवक्षितं वरदोस्मिवरो यस्तेकांक्षितःसोभिधीयतां १४ एवमुक्तस्तुदेवेनविश्वामित्रोमहातपाःप्रणिपत्यमहादेवंविश्वामित्रोब्र वीदिदं १५ यदितुष्टोमहादेवधनुर्वेदोममानघ सांगोपांगोपनिषदःसरहस्यःप्रदीयतां १६ यानिदेवेषु चास्त्राणिदानवेषुमहर्षिषु गंधर्वयक्षरक्षःसुप्रतिभांतुममानघ १७ तवप्रसादाद्भवतुदेवदेवममेप्सितं एवमस्त्वितिदेवेशोवाक्यमुक्त्वागतस्तदा १८ प्राप्यचास्त्राणिदेवेशाद्विश्वामित्रोमहाबलः दर्पेणमहतायु क्तोदर्पपूर्णोभवत्तदा १९ विवर्धमानोवीर्येणसमुद्रइवपर्वणि हतमेवतदामेनेवसिष्ठमृषिसत्तमं २० ततोगत्वाश्रमपदंमुमोचास्त्राणिपार्थिवः यैस्तत्तपोवनंनामनिर्दग्धंचास्त्रतेजसा २१ ॥

देशापेक्षेतिभावः १८

तदेवपर्वणिसमुद्रइवदर्पेणसमृद्धेनतेनसलाभात १९ २० यैरस्त्रैरस्त्रतेजसासीपतेजसातपोवनंनिर्दग्धंभवेत्तान्यस्त्रा

१५५

विश्वामित्रस्य शेषणीनेनोदीर्यमाणं विसृज्यमानं २२ भयान्महत्तोरस्रजालात् नानादिग्भ्यः अन्वयेन द्वितीया।
यैवं तृतीया पंचमी वा २३ सूत्रं सर्वप्राणिपलायनात् प्रलयवनिःशाद्वमिव ईरिणं सस्वरं निर्हृत्तनिर्मानुषकांता।
रसटशं इतियावत् २४ वदतोवैवदतोपीत्यर्थः ताटशस्यापिवसिष्ठस्य वचनमनाटत्य उत्तुरित्यर्थः

उदीर्यमाणमस्त्रं तद्विश्वामित्रस्य धीमतः दृष्ट्वा विप्रद्रुता भीता मुनयः शतशो दिशः २२ वसिष्ठस्य चये शि
ष्याये च वैमृगपक्षिणः विद्रवंति भयाद्भीता नानादिग्भ्यः सहस्रशः २३ वसिष्ठस्याश्रमपदं शून्यमासी
न्महात्मनः मुहूर्तमिव निःशब्दमासीदीरिणसन्निभं २४ वदतो वै वसिष्ठस्य माभैरिति मुहुर्मुहुः ना।
शयाम्येष गाधेयं नीहारमिव भास्करः २५ एवमुक्त्वा महातेजा वसिष्ठो जपतां वरः विश्वामित्रं तदा वाक्यं स
रोषमिदमब्रवीत् आश्रमं चिरसंवृद्धं यद्विनाशितवानसि दुराचारोसि यन्मूढ तस्मात्त्वं न भविष्यसि २७

२५ एवमुक्त्वा पलायमानप्राणिजातं प्रतीति शेषः उद्वेवस्यमाणं २६ यच्चस्मान्मेआश्रमं विनाशितवानसि यत त्य।
स्माच्च हि प्रसिद्धं दुराचारोसि मूढ त्वं तस्मान्न भविष्यसि नंस्यसीत्यर्थः २७ ॥ ॥ २७ ॥ ॥ ॥

विधूमः कालाग्निरिव क्रोधाद्वसिष्ठोऽपरं यमदंडं ब्रह्मदंडं तस्यावितिशेषः २८ इति बालकांडे पंचपंचाशः सर्गः ५५।
एवमुक्तो न भविष्यामीत्युक्तः १२ तिष्ठ तिष्ठेति भीषयन्ते प्रति संभीत्यभावमाह स्थितोस्म्येष इति तवशास्त्रस्य दर्पं नया।

उद्यम्य परमक्रुद्धो दंडमुद्यम्य सत्वरः विधूम इव कालाग्निर्यमदंडमिवापरं २८ इत्यार्षे रामायणे
बालकांडे पंचाशः सर्गः ५५ एवमुक्तो वसिष्ठेन विश्वामित्रो महाबलः आग्नेयमस्त्रमुद्दिश्य तिष्ठ
तिष्ठेति चाब्रवीत् १ ब्रह्मदंडं समुद्यम्य कालदंडमिवापरं वसिष्ठो भगवान् क्रोधादिदं वचन
मब्रवीत् २ क्षत्रबंधो स्थितोस्म्येष यद्बलं तद्विदर्शय नाशयाम्येष ते दर्पं शस्त्रस्य तव गाधिज ३
व क्व च ते क्षत्रियबलं क्व च ब्रह्मबलं महत् पश्य ब्रह्मबलं दिव्यं मम क्षत्रियपांसन ४ तस्यास्त्रं गाधि
पुत्रस्य घोरमाग्नेयमुत्तमं ब्रह्मदंडेन तच्छांतमग्नेर्वेग इवांभसा ५ वारुणं चैव रौद्रं च ऐंद्रं पा
शुपतं तथा ऐषीकं चापि चिक्षेप कुपितो गाधिनंदनः ६ मानवं मोहनं चैव गांधर्वं स्वाप
नं तथा जृंभणं मोहनं चैव संतापन विलापने ७ ॥

तं ध्वजमस्त्ररूपं भासनं तत्त्वाभिजं तेन तव दर्पं ३ ४
तद्विषयं मनेनयुक्ता स्थितस्य तस्य वशिष्ठस्य ब्रह्मदंडेन गाधिपुत्रस्याग्नेयं शांतमासीत् ५ ६ ७ ॥

८ दर्पितं शिवस्येति शेषः ९।१०।११।१२ ग्रसते ग्रस्त १३ अग्निपुरोगमो वायुस्तत्सहिताः अग्निसहितो वायुः पुरोग
मो येषां पुरइति वा १४ समुदीरिते प्रयुक्ते १५ ब्राह्मेण तेजसा ब्रह्मविद्याभ्यासजेन तेजसा युक्तेन ब्रह्मदंडेन क

शोषणं दारुणं चैव वज्रमस्त्रं सुदुर्जयं ब्रह्मपाशं कालपाशं वारुणं पाशमेव च ८ पिनाकमस्त्रं द।
यितं शुष्कार्द्रे अशनी तथा दंडास्त्रमथ पैशाचं क्रौंचमस्त्रं तथैव च ९ धर्मचक्रं कालचक्रं विष्णुचक्रं त।
थैव च वायव्यं मथनं चैव अस्त्रं हयशिरस्तथा १० शक्तिद्वयं च चिक्षेप कंकालं मुसलं तथा वैद्याधरम।
हास्त्रं च कालास्त्रमथ दारुणं ११ त्रिशूलमस्त्रं घोरं च कापालमथ कंकणं एतान्यस्त्राणि चिक्षेप सर्वा।
णि रघुनंदन १२ वसिष्ठे जपतां श्रेष्ठे तदद्भुतमिवाभवत् तानि सर्वाणि दंडेन ग्रसते ब्रह्मणः सुतः १३
तेषु शांतेषु ब्रह्मास्त्रं क्षिप्तवान् गाधिनंदनः तदस्त्रमुद्यतं दृष्ट्वा देवाः साग्निपुरोगमाः १४ देवर्षयश्च संभ्रां।
ता गंधर्वाः समहोरगाः त्रैलोक्यमासीत् संत्रस्तं ब्रह्मास्त्रे समुदीरिते १५ तदप्यस्त्रं महाघोरं ब्राह्मं ब्रा।
ह्मेण तेजसा वसिष्ठो ग्रसते सर्वं ब्रह्मदंडेन राघव १६ ॥

दंडेन ग्रसते स्मेत्यन्वयः ब्राह्मेणैव तेजसा ब्राह्मतेजः शामनस्य साध्यत्वादिति भावः ॥॥ १६ ॥ १६ ॥ ॥

रा.
बा. टी.
२६१

त्रैलोक्यमोहनं भयात् त्रिलोकी चित्तमूर्च्छाकरं रौद्रं सर्वलोकभयदं सुदारुणं उग्रदर्शं नृसिंहवीरभद्रादिवत् घो
रमिति पाठांतरं तस्योर्थः १७ रौद्रदारुणत्वे उपपादयति रोमेत्यादि रोमकूपेषु रोमकूपेभ्यः मरीच्यो विस्फुलिंगाः
अस्येर्विश्वामित्रब्रह्मास्त्राज्जातत्वात् धूमाकुलार्चिषमग्नेर्विशेषणं १८ विधूमः कालाग्निरिव ब्रह्मदंडश्च प्राज्व

ब्रह्मास्त्रं ग्रसमानस्य वसिष्ठस्य महात्मनः। त्रैलोक्यमोहनं रौद्रं रूपमासीत्सुदारुणं १७ रोमकूपेषु सर्वे
षु वसिष्ठस्य महात्मनः। मरीच्य इव निष्पेतुरग्नेर्धूमाकुलार्चिषः १८ प्राज्वलद्ब्रह्मदंडश्च वसिष्ठस्य करोद्यतः
विधूम इव कालाग्निर्यमदंड इवापरः १९ ततोस्तुवन्मुनिगणा वसिष्ठं जपतां वरं अमोघं ते बलं ब्रह्मंस्ते
जो धारय तेजसा २० निगृहीतस्त्वया ब्रह्मन्विश्वामित्रो महाबलः अमोघं ते बलं श्रेष्ठ लोकाः संतु गत
व्यथाः २१ ॥

लत तत्समर्पित ब्रह्मतेजसेति भावः १९ ततोस्तुवन्साधु साध्वित्युपश्लोकितवंतः
हे ब्रह्मन् ते बलं अमोघं अमत्तं अवार्तं अविसर्जनेनात्तीत्यमत्तं प्रति ब्रह्मास्त्रमाग्रस्त्वेति यावत् पारकं तेजः
स्वतेजसा महतेन धारय विलाप्य कीकुरु २० नन्वेवं विश्वामित्रे कथमप्रतियोगात्तत्राह निगृहीत इति ब्रह्मास्त्र
ग्रासेन नष्टसामर्थ्यः सत्यवमज प्रायो जात इत्यर्थः २१ ॥ २१ ॥

१६१

श्रामं चक्रे प्रतियोगतो ३ शांतिना शानाद्वपरत इत्यर्थः विनिकृतः निरस्तसर्वशक्तिः २२ क्षत्रियबलं धिक्बलं निंद्यं ब
लमित्यर्थः ब्रह्मतेजोबलं प्रशस्तं बलं २३ प्रसन्नेंद्रियमानसः परित्यक्तस्त्वसभाव इति यावत् २४ इति रामायणे

163

एवमुक्तो महातेजाः श्रमं चक्रे महातपाः विश्वामित्रो विनिकृतो विनिश्वस्येदमब्रवीत् २२ धिग्बलं क्षत्रि
यबलं ब्रह्मतेजोबलं बलं एकेन ब्रह्मदंडेन सर्वास्त्राणि हतानि मे २३ तदेतत्प्रसमीक्ष्याहं प्रसन्नेंद्रियमानसः
तपो महत्समास्थास्ये यद्वै ब्रह्मत्वकारणं २४ इत्यार्षे रामायणे षट्पंचाशः सर्गः ५६ ततः संतप्तहृद
यः स्मरन्निग्रहमात्मनः विनिश्वस्य विनिश्वस्य कृतवैरो महात्मना १ स दक्षिणां दिशं गत्वा महिष्या सह रा
घव ततापपरमं घोरं विश्वामित्रो महातपाः २ फलमूलाशनो दांतश्चचार परमं तपः अथास्य जज्ञिरे पु
त्राः सत्यधर्मपरायणाः ३ हविष्पंदो मधुष्पंदो दृढनेत्रो महारथः पूर्णे वर्षसहस्रे तु ब्रह्मलोकपितामहः ४
अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनं जिता राजर्षिलोकास्ते तपसा कुशिकात्मज ५।

टीकायां षट्पंचा
शः सर्गः ५६ तत इति कृतवैरः इति इदमेदत्तपोनाशाकमस्य १ ततापतपश्चकारेत्यर्थः २ तपसो घोरत्वं दर्शय॥
तिफलेत्यादि दांतो जितेंद्रियः पुत्रा हविष्पंदादयः ३ ब्रह्मर्षित्वाय ब्रह्मविद्या तपः कारणात नद्यधिदैवत्वात् ब्रह्मा॰

बालि ४८ ॥

वा.
वा. टी.
१८२

८ दैवैः सह त्रिविष्टपं स्वर्गं गत्वा तदनु स्वं लोकं गतः लोकानां भूरादीनां ७ समन्युः सदैन्यः संप्राप्तवैदैन्य वचः सम
हतितपश्चिकृते पिसर्षिगणाद् देवा मां राजर्षिरित्येव विदुः एवगच्छतितस्मादस्य न यमः तद्ब्राह्मणत्वं फलं नास्तिन ॥

अनेन तपसा त्वां हि राजर्षिरिति विद्महे एवमुक्त्वा महातेजा जगाम सह दैवतैः ८ त्रिविष्टपं ब्रह्मलोकं ।
लोकानां परमेश्वरः विश्वामित्रोऽपि तच्छ्रुत्वा ह्रिया किंचिदवाङ्मुखः ७ दुःखेन महताविष्टः समन्युरिदमब्रवीत् ।
तपश्च सुमहत्तप्तं राजर्षिरिति मां विदुः ८ देवाः सर्षिगणाः सर्वे नास्ति मन्ये तपःफलं एवं निश्चित्य मनसा भू
य एव महातपाः ९ तपश्चचार धर्मात्मा काकुत्स्थ परमात्मवान् एतस्मिन्नेव काले तु सत्यवादी जितेन्द्रियः ॥
त्रिशंकुरिति विख्यात इक्ष्वाकुकुलवर्धनः तस्य बुद्धिः समुत्पन्ना यजेयमिति राघव ११ गच्छेयं स्वशरीरेण देवता
नां परां गतिं वसिष्ठं स समाहूय कथयामास चिंतितं १२ अशक्यमिति चाप्युक्तो वसिष्ठेन महात्मना प्रत्याख्या
तो वसिष्ठेन स ययौ दक्षिणां दिशं १३ ततस्तत्कर्मसिद्ध्यर्थं पुत्रांस्तस्य गतो नृपः वासिष्ठा दीर्घतपसस्तपो यत्र

स्वदत्तिमन्ते ८९ परमात्मवान् परमात्मध्यानवान् परमधीरश्च १०॥ गच्छेयं यज्ञबलेनातिशेषः देवतानां परां ग
तिं स्वर्गं १२ अशक्यमेक इति नष्टं वैकं प्रत्याख्यानं वालं च प्रसिद्धं त्रिशंकुनमेवातिप्रख्यातश्च स्पष्टं १३ तत्कर्म स्वशरी

शतशब्देन स्वावयवगतबहुत्वेन बहुवचनं अनभिधानात् शतशब्दः संख्यावाची संख्येयवाची च विंशत्यादिवत् अ॰
त्र संख्येयवाची शतं वसिष्ठपुत्रान् संख्याकानित्यर्थः अत्रावयवप्राधान्येन तद्बहुत्वेन वचनं प्राप्तं तत् अनभिधा॰
नान्न भवति एकवचनमेव भवति यथा विंशतिर्ब्राह्मणाः संख्यावाचिनोपि एकवचनं ब्राह्मणानां शतं शतिपर्थ

त्रिशंकुस्तु महातेजाः शतं परमभास्वरं वसिष्ठपुत्रान् ददृशे तप्यमानान्मनस्विनः १५ सोभिगम्य महात्मानः
सर्वानेव गुरोः सुतान् अभिवाद्यानुपूर्व्येण ह्रिया किंचिदवाङ्मुखः १६ अब्रवीत्स महात्मानः सर्वानेव कृतांज॰
लिः शरणं वः प्रपन्नोहं शरण्यान् शरणागतः १७ प्रत्याख्यातो हि भद्रं वो वसिष्ठेन महात्मना यष्टुकामो महा॰
यज्ञं तदनुज्ञातुमर्हथ १८ गुरुपुत्रानहं सर्वान् नमस्कृत्य प्रसादये शिरसा प्रणतो याचे ब्राह्मणांस्तपसि स्थितान् १९
ते मां भवन्तः सिद्ध्यर्थं याजयन्तु समाहिताः सशरीरो यथाहं वै देवलोकमवाप्नुयाम् २० प्रत्याख्यातो वसिष्ठेन ग॰
तिमन्यां तपोधनाः गुरुपुत्रानृते सर्वान्नाहं पश्यामि कांचन २१ ॥ अनभिधानात् अतः वसिष्ठपुत्रानित्यनेन न श॰
तमित्यनेन च सामानाधिकरण्यं १५ ह्रिया तन्निमित्तकृतप्रत्याख्यानजया महात्मन इति द्वितीयार्थे महात्मान इत्यादि १६
शरण्यान् रक्षणसमर्थान् शरणागतः अन्यशरण्याभावं गतोपि शरणं प्रपन्नोपीत्यर्थः १७ १८ ब्राह्मणान् अनर्थ्यं
ब्राह्मणान् सिद्ध्यर्थं सशरीरस्वर्गगमनसिद्ध्यर्थं २० गुरुपुत्रानृते तान्विना अन्यां कांचन गतिमहं न पश्यामीत्यन्वयः २१

164

अयं श्लोकः प्रतिमशतिकतकसरसः तस्मात् इक्ष्वाकूणां परमगतिरूपात् रोपसो वसिष्ठादनंतरमित्यर्थः २२ इ
ति बालकांडे सप्तपंचाशः सर्गः ५७ क्रोधसमन्वितमिति ऋषिपुत्रशतविशेषणं १ हे दुर्बुद्धे शाखांतरं
याजनादिना रसकांतरं २ न चातिक्रमितुं शक्यमिक्ष्वाकुभिरिति शेषः ३ सोवाचेति सोविलोपवेदिति साधुतं क्रतुं

इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः तस्मादनंतरं सर्वे भवंतो दैवतं मम २२ इत्यार्षे रामायणे वा
लकांडे सप्तपंचाशः सर्गः ५७ ततस्त्रिशंकोर्वचनं श्रुत्वा क्रोधसमन्वितं ऋषिपुत्रशतं राम राजानमिद
मब्रवीत् १ प्रत्याख्यातोसि दुर्मेधो गुरुणा सत्यवादिना तं कथं समतिक्रम्य शाखांतरमुपेयिवान् २ इ
क्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः न चातिक्रमितुं शक्यं वचनं सत्यवादिनः ३ अशक्यमिति सोवा
च वसिष्ठो भगवानृषिः तं वयं वै समाहर्तुं क्रतुं शक्ताः कथंचन ४ बालिशस्त्वं नरश्रेष्ठ गम्यतां स्वपुरं पुनः
याजने भगवान् शक्तस्त्रैलोक्यस्यापि पार्थिव ५ अवमानं कथं कर्तुं तस्य शक्ष्यामहे वयं तेषां तद्वचनं श्रुत्वा
क्रोधपर्याकुलाक्षरं ६

यम वाक्यमित्यवाचतं यजमित्यर्थः कथंचन कथमपि शक्ता इत्यर्थः ४ बालिशोऽज्ञः त्रै
लोक्यस्यापि किंयायाजनेन इत्यर्थः भगवान्वसिष्ठः ५ अवमानेनेनासाध्यनयोः कार्यस्साधनरूपं ६ ॥ ५८।

पतान् वासिष्ठान् ७ अन्त्यांगतिं राजकांतरं घोराभिसंहितं घोराभिप्रायसंयुक्तं कुलगुर्वतिक्रमेणान्याश्रयस्य
कुलनाशहेतुतया तदभिप्रायस्य घोरत्वं ८ चंडालत्वं गमिष्यसीति शेषः इति योजना ताहृशपापिदर्शनस्य पापज

165

५

स राजा पुनरेवैनानिदं वचनमब्रवीत् प्रत्याख्यातो भगवता गुरुपुत्रैस्तथैव हि ७ अन्त्यांगतिं ग
मिष्यामि स्वस्ति वोऽस्तु तपोधनाः ऋषिपुत्रास्तु तच्छ्रुत्वा वाक्यं घोराभिसंहितं ८ शेपुः परमसं
क्रुद्धाश्चंडालत्वं गमिष्यसि इत्युक्त्वा ते महात्मानो विविशुः स्वं स्वमाश्रमं ९ तच्छ्रुत्वा घोरसंका
शं ऋषिपुत्रैस्तु भाषितं प्रविशन्नस्तु पुरं राजा चिंतयामास दुःखितः १० अथ रात्र्यां व्यतीतायां
राजा चंडालतां गतः नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्धजः ११ चित्यमाल्यांगरागश्च आ
यसाभरणोऽभवत् तं दृष्ट्वा मंत्रिणः सर्वे त्यक्त्वा चंडालरूपिणं १२ प्राद्रवन्सहिता राम पौरा येऽस्या
नुगामिनः एको हि राजा काकुत्स्थ जगाम परमात्मवान् १३ ॥

नेकतात्स्वाश्रमप्रवेशात्तेषां ९
परुषो रूक्षांगः ध्वस्तमूर्धजः ऊर्ध्वकेशः १० चिता स्मशानं तत्र भवं पुष्पं भस्मादि माल्यांगरागो यस्य अयो विकार आ
यसं तदाभरणं यस्य सः ११ अनुगामिनः सहगताः प्राद्रवन् तत्यक्त्वा गताः परमात्मवान् धीरः १२ ॥ १३ ॥ ।

रा.
बा.टी.
१८४

दह्यमानइत्यस्यत्रिशंकुः स्वेनेत्यादि विश्वामित्रंजगामेतिपूर्वेणान्वयः वसिष्ठवैरित्वात् विफलीकृतंवसिष्ठपुत्रैः।
विनाशितैर्हिकामस्वर्गकार्ये १३ १४ यस्त्वंशापात्चंडालतांगतस्तस्यतेइहागमनकार्यंकिमित्यन्वयः १८ १९

दह्यमानोदिवारात्रंविश्वामित्रंतपोधनं विश्वामित्रस्तुतंदृष्ट्वाराजानंविफलीकृतं १३ चंडालरू
पिणंराममुनिः कारुण्यमागतः कारुण्यात्समहातेजावाक्यंपरमधार्मिकः १४ इदंज
गादभद्रंतेराजानंघोरदर्शनं किमागमनकार्यंतेराजपुत्रमहाबल १५ अयोध्याधिपते
वीरशापाच्चंडालतांगतः अथतद्वाक्यमाकर्ण्यराजाचंडालतांगतः १६ अब्रवीत्प्रांजलिर्वा
क्यंवाक्यज्ञोवाक्यकोविदं प्रत्याख्यातोस्मिगुरुणागुरुपुत्रैस्तथैवच १७ अनवाप्यैवतंकामं
मयाप्राप्तोविपर्ययः सशरीरोदिवंयायामितिमेसौम्यदर्शन १८ मयाचेष्टंक्रतुशतंतच्चना
वाप्यतेफलं अनृतंनोक्तपूर्वंमेनचवक्ष्येकदाचन १९।

यंकाममहमिष्यगतस्तंकाममवाप्यनैतावदेव।

न

म

अपितुविपर्ययोजातिभ्रंशोपिवृत्तइत्यर्थः कामम् आह सशरीरइत्यस्यकामइतिशेषः सौम्यदर्शनेतिसंबोधनं १८ तच्चतथा
विधफलंममनावाप्यतेइत्यन्वयः कृतेष्वप्यनेनकृत्येनपर्याप्तमितिचेन्नेत्याह अनृतमिति १९ ॥ ॥

हे कैकेय पितृगतोन्नतं नवत्से इत्यन्वयः त्वत्त्रयं धर्मेण तत्सान्त्वितया २० शीलं सद्गुणः वृत्तमाचारः इच्छतो ममेति शेषः
नगच्छंति नगच्छंति स्म यदेव मतो देवमेव प्रारब्धफलमदृष्टमेव परं श्रेष्ठं हिताहितप्रापणे योग्यं इदानीं तन्न धर्मानु
ष्ठानं निरर्थकं प्रारब्धतिरस्कारे केवलमित्यर्थः २२ दैवमत्रकं प्राक्रमातेप्र भिभूयते परमागतिः सात्वादितरातिर।

हे कैकेयपितृगतः सौम्य त्वत्त्रयं धर्मेण ते शपे यज्ञैर्बहुविधैरिष्टं प्रजा धर्मेण पालिताः २० गुरवश्च महात्मानः शी
लवृत्तेन तोषिताः धर्मे प्रयतमानस्य यज्ञं चाहर्तुमिच्छतः २१ परितोषं न गच्छंति गुरवो मुनिपुंगव देवमेव
